गादीनि यैस्तेषां यदृच्छया प्राप्तानि च ऐश्वर्याणि पुनः क्लेशदानि भवितुं नार्हंति॥ अतस्तत्किमिति नाभ्यनंददित्यर्थः॥१॥
ऋषीत्यपरिहरति सत्यमिति॥ एके तु इह मतोऽनवस्थानस्य चंचलस्य मनसो विश्वासो नानुगच्छति न सम्यक्कुर्वाप्नुवंति
शठः किरातश्च यथा पतेष्वपि मृगेषु॥ शठो हि किरातो यथा मृगैः संगच्छते स भ्रम्यते वा॥ पागंत रे शठो वंचकः॥ किरातो वलि

गौ १ राजोवाच॥ न नूनं भगव आत्मारामाणां योगसमीरितज्ञानावभर्जितकर्मबीजानामैश्वर्याणि पुनः क्लेशदा
नि भवितुमर्हंति यदृच्छयोपगतानि॥१॥ ऋषिरुवाच॥ सत्यमुक्तं किंत्विह वा एके न मनसोऽद्धा वि
श्रंभमनवस्थानस्य शठकिरात इव संगच्छंते॥२॥ तथा चोक्तं॥ न कुर्यात्कर्हिचित्सख्यं मनसि ह्यनवस्थि
ते॥ यद्विश्रंभाच्चिराच्चीर्णं चस्कंद तप ऐश्वरं॥३॥ नित्यं ददाति कामस्य च्छिद्रं तमनु येऽरयः॥ योगिनः कृत
मैत्रस्य पत्युर्जायेव पुंश्चली॥४॥

कृत्यवहर्त्तरि विश्वासं न याति इत्यर्थः॥ पाश्चिकादोषो वर्जनीय इत्युपदेशेन नाभ्यनंददिति भावः॥२॥ यद्विश्रंभात्
यस्य विश्वासात् चिराच्चीर्णं बहुकालसंचितं तपश्चस्कंद सुस्राव॥ ऐश्वरं विष्णोर्मोहिनीरूपदर्शनेन॥ यद्वा ईश्व
राणां समर्थानामपि सोभरिप्रभृतीनां तपः॥३॥ तत्र हेतुः॥ नित्यमिति॥ कृतविश्वासाय योगिने तदीयं मनः कामस्य तमनु
नु येऽरयः तेषां च छिद्रमेवावकाशं ददाति॥ यथा कृतविश्वासस्य पत्युः पुंश्चली जाया जाराणामवकाशं दत्वा पति
घातयति॥ तथा मनोपि कामादिभिर्योगिनं भ्रंशयति॥४॥

२२

वीभत्समिवाशंक्याह॥ तस्येति पुरीषस्य सुरभिगंधेन सौगंध्यं यस्य स वायु ॥३३॥ एवं गवादिचर्ययापानादि करोति
स्म ॥ तदेवाह ॥ व्रजन्नित्यादिका कमृगगवामिवान्यदपि चरितं चरित्रं यस्य ॥३४॥ नानायोगचर्याश्चाचरतीति तत्त्या लो
कयात्रापहरायैयोगिभिरेवं वर्त्तितव्यमिति प्रदर्शनाय तत्तथा कृतवान् वस्तुतस्तु भगवान् यतः ॥ अविरतः परम महानन्द

तस्य ह पुरीषसुरभिसौगंध्यवायुस्तं देशं दशयोजनं समंतात्सुरभिं चकार ॥३३॥ एवं गोमृगकाकचर्य
या व्रजंस्तिष्ठन्नासीनः शयानः काकमृगगोचरितः पिबति खादत्यवमेहति स्म ३४॥ इति नानायोगचर्याच
रणो भगवान्कैवल्यपतिः ऋषभोऽविरतपरममहानंदानुभव आत्मनि सर्वेषां भूतानामात्मभूते भगव
ति वासुदेव आत्मनोऽव्यवधानानंतरोदरभावेन सिद्धसमस्तार्थपरिपूर्णो योगैश्वर्याणि वैहायसम
नोजवांतर्धानपरकायप्रवेशदूरग्रहणादीनि यदृच्छयोपगतानि नांजसा नृप हृदयेनाभ्यनंदत ॥३५॥
इति श्रीमद्भागवते महापुराणे पंचमस्कंधे ऋषभदेवानुचरिते पंचमोऽध्यायः ॥ ५ ॥

उत्तरोत्तरशतगुणत्वेनोत्कर्षो य ॥ आनंदः तदनुभवस्वरूपः किंच वासुदेवे ॥ आत्मनोः व्यवधानेन अभेदेन विद्यते
अन्येषामिव अंतराम ध्येउदरस्य देहोपाधेर्भविस्तन नित्यनिवृत्तोपाधित्वेनेत्यर्थः ॥ स्वत एव सिद्धैः समस्तैरर्थैः
फलैः परिपूर्णस्तथापि योगैश्वर्याणि नाभ्यनंदत ॥ वैहायसत्वं खेचरत्वं मनोजवं मनस इव देहस्य वेगः ॥ दूरग्रह

भा० पं०
२३

समीरवेगेन विधूतानां वेणूनां संघर्षणेन जातेनोग्रदवानलेनाऽऽलेलिहानः सर्वतोग्रसन् ॥९॥ अवधूतवेषेण ऋष-
भदेवस्तत्र गतः ॥ इत्येतस्य स्तूयकमाह ॥ यस्य किलासमातीतमनुचरितं तद्देशवासिभ्य उपाकर्ण्य अर्हन्निति तन्ना-
मधेयस्य स एव जातः स्वयं तत्र उपशिक्ष्य शिक्षित्वा ॥ कुपथश्चासौ पाषंडश्च तस्मिन्निजमनीषया संप्रवर्त्तयिष्यते
इत्यन्वयः ॥ तत्र हेतुः कलावित्यादि भवितव्येन प्राक्तन्या एवं संचितपापफलेन ॥१०॥ येन प्रवर्त्तकेन मनुजेष्व-

अथ समीरवेगविधूतवेणुविकर्षणजातोग्रदावानलस्तद्वनमालेलिहानः सह तेन ददा-
ह ॥९॥ यस्य किलानुचरितमुपाकर्ण्य कोंकवेंककुटकानां राजार्हन्नामोपशिक्ष्य कलावध-
र्म उत्कृष्यमाणे भवितव्येन विमोहितः स्वधर्मपथमकुतोभयमपहाय कुपथपाषंडमस-
मंजसं निजमनीषया मंदः प्रवर्त्तयिष्यते ॥१०॥ येन ह वाव कलौ मनुजापसदा देवमायामोहिताः
स्वविधिनियोगशौचचारित्रविहीना देवहेलनान्यपव्रतानि निजनिजेच्छया गृह्णाना अस्नानाना-
शौचकेशोल्लुंचनादीनि कलिनाऽधर्मबहुलेनोपहतधियो ब्रह्मब्राह्मणयज्ञपुरुषलोकविदूषकाः प्रा-
येण भविष्यंति ॥११॥ ते च ह्यर्वाक्तनया निजलोकयात्रयांधपरंपरयाश्वस्तास्तमस्यंधे स्वयमेव प्रपतिष्यंति ॥१२॥

पसदा निकृष्टाः ॥ स्वविधिना नियोगो यस्मिन् ॥ शौचचारित्रे तद्विहीनाः ॥ देवावज्ञारूपाण्यस्नानादीनि कुव्रतानि गृह्णान
वेदादीनां विदूषका भविष्यंति ॥११॥ तत्फलं चांधं तमः प्राप्स्यंतीत्याह ॥ ते चेति ॥ अर्वाक्तनया अर्वाचीनया निजलो-
कयात्रया स्वेच्छाकृतमर्यादया आश्वस्ताः ॥ कृतविश्वासाः ॥१२॥

रा

२३

अरीन्कथयन्नुपसंहरति ॥ कामइति ॥ यन्मूलः यन्निमित्तो भवति तन्मनः ॥ को नु बुधः स्वीकुर्यात्स्वाधीनं इति मन्येत ॥ ५ ॥ प्रा
संगिकं समाप्य प्रस्तुतमाह ॥ अथेति ॥ अखिलानां लोकानां ललामो मंडनभूतोपि तत्परत्वावधितानुवृत्तिर्यस्मात्स्व
परम देहाभिमानं जहौ ॥ विलक्षणैरनेकप्रकारैरवधूतवेषादिभिः न विलक्षितो भगवत्प्रभावो यस्मिन् ॥ सांपरायवि
धिं देहत्यागप्रकारं ॥ आधाराधेयभावव्यावृत्त्यर्थमाह ॥ अनर्थांतरभावेनाभेदेन ॥ उपासनाव्यावृत्त्यर्थमाह ॥ असंव्यव

कामो मन्युर्मदो लोभः शोकमोहभयादयः ॥ कर्मबंधश्च यन्मूलः स्वीकुर्यात्को नु तद्बुधः ॥ ५ ॥ अथैवमखिल
लोकपालललामो विलक्षणैर्जडवदवधूतवेषभाषाचरितैरविलक्षितभगवत्प्रभावो योगिनां सांपरायविधिमुप
शिक्षयन्स्वकलेवरं जिहासुरात्मन्यात्मानमसंव्यवहितमनर्थांतरभावेनान्वीक्षमाण उपरतानुवृत्तिरुपरराम ॥ ६ ॥
तस्य ह वा एवं मुक्तलिंगस्य भगवत ऋषभस्य योगमायावासनया देह इमां जगतीमभिमानाभासेन संक्र
ममाणः ॥ ७ ॥ कोंकवेंककुटकान्दक्षिणकर्णाटकान्देशान्यदृच्छयोपगतः कुटकाचलोपवन आस्यकृताश्म
कवल उन्माद इव मुक्तमूर्धजोऽसंवीत एव विचचार ॥ ८ ॥

हित्वाम् ॥ ६ ॥ मनसा स्वयं त्यक्तेप्यभिमाने केनापि
संस्कारेण देहः प्रचलति ॥ यथा कुलालचक्रं सोयमभिमानाभासः ॥ तेन स च जीवन्मुक्तानाम विद्यावास
नया भवतीति अतो विशेषमाह ॥ योगमायावासनयेति ॥ ७ ॥ कोंकादीन्देशान्गतः सन्कयापि वासनया
आस्ये कृतमश्मकवलो येन ॥ असंवीतो नग्नः ॥ ८ ॥ रामराम ॥ ॥

भक्तेः परमपुरुषार्थमाह ॥ यस्यां भक्तावेव नतु योगादिषु अनुसवनमविरतं ॥ आत्मानं स्नापयंतः स्वयमासादितं ॥ अप्रा
र्थितं भगवता स्वयमेव दीयमानमपि स्वनादरे हेतुः भगवदीयत्वेनैव परितः समाप्ताः सम्यक्प्राप्ताः सर्वे पुरुष
षार्था यैस्ते ॥ १७ ॥ ननु भगवतोऽतिसुलभत्वदर्शनान्मोक्षस्याप्यतिदुर्लभत्वादियमतिस्तुतिरिवेत्याशंक्याह हे
राजन्भवतां पांडवानां यदूनां च पतिः ॥ पालकः ॥ गुरुः उपदेष्टा दैवं उपास्यः ॥ प्रियः सुहृत् कुलस्य पतिः ॥ नियं

यस्यामोकवय आत्मानमविरतं विविधवृजिनसंसारपरितापोपतप्यमानमनुसवनं स्नापयंतस्तये
वपरयानिर्वृत्याह्यपवर्गमात्यंतिकं परमपुरुषार्थमपि स्वयमासादितं नो एवाद्रियंते भगवदीयत्वेने
वसमाप्तसर्वार्थाः ॥ १८ ॥ राजन्पतिर्गुरुरलं भवतां यदूनां दैवं प्रियः कुलपतिः क्वच किंकरो वः ॥ अस्त्वे
भग ४
वमंगभगवान्भजतां मुकुंदो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम् ॥ १९ ॥ नित्यानुभूतनिजलाभनि
वृत्ततृष्णः श्रेयस्यतद्रचनया चिरसुप्तबुद्धेः ॥ लोकस्य यः करुणयाऽभयमात्मलोकमाख्यान्नमो भगवते
ऋषभाय तस्मै ॥ २० ॥

ता ॥ किंबहुना क्व च कदाचिद्दौत्यादिषु वः ॥ पांडवानां किंकरोऽपि आज्ञावर्ती ॥ अस्तु नामैवं तथापि ॥ अन्येषां नित्यं भजतां
मुक्तिं ददाति नतु कदाचिदपि सप्रेमभक्तियोगं ॥ १९ ॥ वर्लिंतमृषभावतारं नमस्करोति ॥ नित्यमनुभूतं यन्निजं
रूपं स एव लाभः ॥ तेन निवृत्ता तृष्णा यस्य सः ॥ अतद्रचनया देहाद्यर्थमनोरथेन श्रेयसि विषये चिरं सुप्ता बुद्धिर्यस्य
तस्य जनस्य करुणया निर्भयमात्मस्वरूपं यः ॥ आ
ख्यातवांस्तस्मै नमः ॥ २० ॥

ननु नर्षधीनर्थकारी किमर्थोयमृषभावतारस्तत्राह ॥ अयमिति ॥ रजोव्याप्तानां जनानां मोक्षमार्गोपशिक्षणार्थः ॥ तस्य
वैकल्योपशिक्षणस्यानुरूपान् ॥१३॥ अधिकं पुण्यं यस्मिन् ॥ एतद्भारतं वर्षं ऋषभाद्यवतारयुक्तानि कर्माणि ॥१४॥ प्रियव्रत
स्य वंशः अवदातः शुद्धः ॥ यत्र वंशे यद्यस्मात् ॥ अकर्म मोक्षस्तस्य हेतुं धर्मं चचार ॥१५॥ अपरः कोन्नु योगी अस्य काष्ठां दिश

अयमवतारो रजसोपप्लुतकैवल्योपशिक्षणार्थः तस्यानुगुणान् श्लोकान् गायंति ॥१३॥ अहो भुवः सप्त
समुद्रवत्या द्वीपेषु वर्षेष्वधिपुण्यमेतत् ॥ गायंति यत्रत्यजना मुरारेः कर्माणि भद्राण्यवतारवंति
॥१४॥ अहो नु वंशो यशसावदातः प्रैयव्रतो यत्र पुमान् पुराणः ॥ कृतावतारः पुरुषः स आद्यश्चचार धर्मं
यदकर्महेतुं ॥१५॥ को न्वस्य काष्ठामपरोनुगच्छेन्मनोरथेनाप्यभवस्य योगी ॥ यो योगमायाः स्पृहय
त्युदस्ता ह्यसत्तया येन कृतप्रयत्नाः ॥१६॥ इति ह स्म सकलवेदलोकदेवब्राह्मणगवां परमगुरो
र्भगवत ऋषभदेवस्य विशुद्धाचरितमीरितं पुंसां समस्तदुश्चरिताभिहरणं परममहामंगलायनमिद
मनुश्रद्धयोपचितयानुशृणोत्याश्रावयति वावहितो भगवति तस्मिन्वासुदेव एकांततो भक्तिरनयोरपि
समनुवर्त्तते ॥१७॥

मप्यनुगच्छेत् ॥ यो योगी येन ऋषभेण असत्तया अवस्तुत्वेन उदस्ताः निरस्ताः योगमायाः सि
द्धीः वांछति कथंभूताः कृतप्रयत्नाः यासु तदर्थं प्रयत्नं च करोतीत्यर्थः ॥ यद्वा ॥ कथंभूताः ॥ उदस्ताः कृतप्रयत्नाः सेवितुमु
द्यता अपीत्यर्थः ॥१६॥ विशुद्धाचरितं यत् यत्तदीरितं कथितं तत्र समस्तदुश्चरितमभिहरतीति तथा परममहामंगला

भा०पं० २५

एव१

किंच॥संचरत्सुप्रवर्त्तमानेषुनानायागेषुरचिताअनुष्ठिताःअंगक्रियायेषांतेषुयदपूर्वंतद्वासुदेवेभावयमा
नश्चिंतयन्नसयजमानोयज्ञभाजोयेदेवाः॥सूर्यादयस्तान्पुरुषस्यवासुदेवस्यावयवेषुचक्षुरादिष्वभ्यध्यायत्
नतुपृथक्केनेत्यन्वयः॥अपूर्वेपितद्यमीमांसकानांतदानीमेवस्वर्गत्वेनोत्पन्नंफलमेवापूर्वंकालांतरफ
लोत्पादिकाकर्मशक्तिर्वेति॥तदुक्तंयागादेवफलंतच्छिशक्तिद्वारेणसिध्यतीति॥सूक्ष्मशक्त्यात्मकंवोपिफलमेवो
पजायतइति॥तदेवाह॥क्रियाफलंधर्माख्यमिति च॥ननुयद्यंगदेवताःकर्मप्रधानमितिमतंतर्हिकर्तृनिष्ठमपू
र्वंस्यात्॥तदुक्तंकर्मभ्यः॥प्रागयोग्यस्यकर्मणः॥पुरुषस्यवायोग्यताशास्त्रागम्यायापरासापूर्वमिष्यतेइति॥अथयदे

संप्रचरत्सुनानायागेषुविरचितांगक्रियेष्वपूर्वंयत्तत्क्रियाफलंधर्माख्यंपरेब्रह्मणियज्ञपुरुषेसर्वदेवतालिं
गानांमंत्राणामर्थनियामकतयासाक्षात्कर्त्तरिपरदेवतायांभगवतिवासुदेवएवभावयमानआत्मनैपुण्य
मृदितकषायोहविःष्वध्वर्युभिर्गृह्यमाणेषुसयजमानोयज्ञभाजोदेवांस्तान्पुरुषावयवेष्वभ्यध्यायत्॥६॥

वताप्रधानंकर्मेतुदेवताराधानार्थंतदादेवताप्रसादरूपत्वात्॥अपूर्वस्यदेवताश्रयत्वमेवयुक्तं॥प्रोक्तेनाद्यपूर्वस्येवश्रीया
द्याश्रयत्वमुक्तंनोवासुदेवाश्रयमपूर्वंभावयन्तिउच्यते॥यदिकर्तृनिष्ठमपूर्वंतर्हिवासुदेवस्यांतर्यामिरूपःप्रवर्तकत्वेन
मुख्यकर्तृत्वात्तदाश्रयमेवापूर्वंननुतस्ययोज्ययजमानाश्रयंशास्त्रफलंप्रयोक्तरीतिन्यायात्॥अन्यथाऋत्विजामप्यपू
र्वाश्रयत्वप्रसंगात्॥तदेतदाह॥साक्षात्कर्त्तरीतिदेवताश्रयत्वेपिवासुदेवाश्रयत्वमेवेत्याह॥परदेवतायामिति परदेवतात्वेहे
तुःसर्वदेवतालिंगानांतत्तद्देवताप्रकाशकानांमंत्राणांयेऽर्थाइंद्रादिदेवतास्तेषांनियामकतयातस्यैवप्रसादनीयत्वा

२५

इति पंचमे षष्ठः ॥ ६ ॥ अध्यायानां त्रयेणैव ऋषभाख्यानमीरितं ॥ अष्टभिर्भरताख्यानमतः प्रस्तूयते स्फुटं ॥ स प्रथमे भरतो
राज्ये चिरं यज्ञैर्हरिं यजन्न् ॥ आरब्धकर्मनिर्वाणेन हरिक्षेत्रे हरिं यजन् ॥ संचिंतितः संकल्पेनैव राज्यादौ नियुक्तः ॥ १ ॥
आत्मनोनुरूपान् भूतादिरहंकार इव भूतसूक्ष्माणि इति संतति दृष्टांतः ॥ २ ॥ भारतमिति स्वनाम्नाख्यायकत्वेन

इति श्रीमद्भागवते पंचमस्कंधे ऋषभदेवानुचरिते षष्ठोध्यायः ॥ ६ ॥ श्रीशुक उवाच ॥ भरतस्तु महाभागवतो यं
दा भगवतावनितलपरिपालनाय संचिंतितस्तदनुशासनपरः पंचजनीं नाम विश्वरूपदुहितरमुपयेमे ॥ १ ॥ त
स्यामु ह वा आत्मजान् कार्त्स्न्येनानुरूपानात्मनः पंचजनयामास भूतादिरिव भूतसूक्ष्माणि ॥ २ ॥ सुमतिं राष्ट्र
भृतं सुदर्शनमावरणं धूम्रकेतुमिति ॥ अजनाभं नामैतद्वर्षं भारतमिति यत आरभ्य व्यपदिशंति ॥ ३ ॥
स बहुविन्महीपतिः पितृपितामहवदुरुवत्सलतया स्वे स्वे कर्मणि वर्तमानाः प्रजाः स्वधर्ममनुवर्तमानः
पर्यपालयत् ॥ ४ ॥ ईजे च भगवंतं यज्ञक्रतुरूपं क्रतुभिरुच्चावचैः श्रद्धयाहृताग्निहोत्रदर्शपूर्णमासचातुर्मा
स्यपशुसोमानां प्रकृतिविकृतिभिरनुसवनं चातुर्होत्रविधिना ॥ ५ ॥
धर्माधीतिशायः स्वचित्तः ॥ ३ ॥ बहुवित्तु वित्तसर्वज्ञः ॥ ४ ॥ यज्ञाः अयूपाः क्रतवः सयूपाः तद्रूपं उच्चावचैर्महद्भिरल्पैश्च क्र
तुभिः कर्मभिः श्रद्धयाईजे च तानेवाह आहृताः स्वाधिकारेणात्मसात्कृताः ॥ ये अग्निहोत्रादयस्तेषां प्रकृतिभिः अ
ग्निहोत्रादयोहि विधाः सकलांगयुक्ताः प्रकृतयः विकलांगा विकृतयः इति तैर्विविधैरपीष्टवानित्यर्थः ॥ अनुसव

नमित्यंतं चातुर्होत्रविधिना इत्यंतं वाक्यं ॥ ५ ॥

आश्रमस्थानानि उभयत्र ॥ उपर्य्यधश्च नाभिर्यस्यां तैर्दृषच्चक्रैः शिलामध्यगतैः चक्रनदी गंडकी सरितां श्रेष्ठा
पवित्रीकरोति ॥ १० ॥ एकफलः एकः आराधनं समीहमानः कुर्वाणः विविक्तः शुद्धः अतएव उपरतो विषयाभिलाषो
यस्य उपभृतः संरुद्धः उपशमो यस्य ॥ ११ ॥ प्रवर्द्धमानानुरागाय स्यभारेण द्रुतं द्रवीभूतं हृदयं तस्मिन् शैथिल्य
मनुष्यमो यस्य ॥ आत्मनि देहे उद्भिद्यमानैः रोमपुलककुलैः रोमांचवृंदं यस्य ॥ ककोरः संभ्रमो सो तः ॥ औत्कंठ्यात्प्रवृत्ते

यत्राश्रमपदान्युभयतोनाभिभिर्दृषच्चक्रैश्चक्रनदी नाम सरित्प्रवरा सर्वत्र पवित्रीकरोति ॥ १० ॥ तस्मिन्वा
व किल स एकलः पुलहाश्रमोपवने विविधकुसुमकिशलयतुलसिकांबुभिः कंदमूलफलोपहारै
श्च समीहमानो भगवत आराधनं विविक्त उपरतविषयाभिलाष उपभृतोपशमः परां निर्वृतिमवा
प ॥ ११ ॥ तयेत्थमविरतपुरुषपरिचर्य्यया भगवति प्रवर्द्धमानानुरागभरद्रुतहृदयशैथिल्यः प्रहर्षवेगे
नात्मन्युद्भिद्यमानरोमपुलककुलक औत्कंठ्यप्रवृत्तप्रणयबाष्पनिरुद्धावलोकनयन एवं निज
रमणारुणचरणारविंदानुध्यानपरिचितभक्तियोगेन परिप्लुतपरमाह्लादगंभीरहृदयह्रदावगाढ
धिषणस्तामपि क्रियमाणां भगवत्सपर्य्यां न सस्मार ॥ १२ ॥

तत्प्रणयबाष्पेण निरुद्धो अवलोको ययोः ते नयने यस्य सः
एवं वर्तमानस्तामपि भगवत्सपर्य्यां न सस्मारेत्यन्वयः ॥ तत्र हेतुः ॥ निजरमणस्य स्वप्रीतिदातुर्येत्र्र हरेश्चरणार
विंदेन योरनुध्यानेन परिचितः सम्यक्रूढो भक्तियोगः तेन परिप्लुतः सर्वतो व्याप्तः ॥ परमआह्लाद परमानंदो यस्मिन्

पस्कं ॥ ४ ॥

[illegible]

एवंभूतया कर्मविशुद्ध्या विशुद्धसत्त्वस्य भक्तिर् जायतेत्यन्वयः ॥ ७ ॥ अंतर्हृदये यस्मिन्नाकाशः स एव शरीरमभिव्यक्तिस्था
नं यस्य तस्मिन् ब्रह्मणि कीदृशे ॥ महापुरुषरूपस्योपलक्षणं आकारो यस्य तस्मिं ॥ किंच ॥ श्रीवत्सादिरुपलक्षिते निजपुरु
षाणां नारदादीनां हृदि लिखितवत् स्थितस्तत्तया स्थितेन तत्क्तेन पुरुषरूपेण आत्मनि स्वमनसि विरोचमाने कीदृशी भक्तिः
अत्यंतातिशयेन एधमानो रयो वेगः प्रकर्षो यस्याः ॥ ७ ॥ एवं अनुष्ठानाद् वर्षाणाम् अयुतानि तेषां सहस्रं तत्पर्यंतकालि

एवं कर्मविशुद्ध्या विशुद्धसत्त्वस्यांतर्हृदयाकाशशरीरे ब्रह्मणि भगवति वासुदेवे महापुरुषरूपोपल
क्षणश्रीवत्सकौस्तुभवनमालारिदरगदादिभिरुपलक्षिते निजपुरुषहृल्लिखितेनात्मनि पुरु
षरूपेण विरोचमान उच्चैस्तरां भक्तिरनुदिनमेधमानरयाऽयाजयत ॥ ७ ॥ एवं वर्षायुतसह
स्रपर्यंतावसितकर्मनिर्वाणावसरोऽधिभुज्यमानं स्वतनयेभ्यो रिक्थं पितृपैतामहं यथादा
यं विभज्य स्वयं सकलसंपन्निकेतात् स्वनिकेतात् पुलहाश्रमं प्रवव्राज ॥ ८ ॥ यत्र ह वाव भग
वान् हरिरद्यापि तत्रत्यानां निजजनानां वात्सल्येन संनिधाप्यत इच्छारूपेण ॥ ९ ॥

वसितो निश्चलः ॥ कर्मनिर्वाणावसरः ॥ राज्यभोगाद् दृष्टसमाप्तिसमयो येन सः ॥ अधिकृत्य भुज्यमानं रि
क्थं धनं यथाविभागं विभज्य सकलसंपदां निकेतात् आश्रयात् स्वगृहात् पुलहाश्रमं हरिक्षेत्रं प्रवव्राज
॥ यत्र क्षेत्रे विद्याधरकुंडे वात्सल्यं कर्तृत्वं न संनिहितः क्रियते ॥ भक्तो नाम अपेक्षितेन रूपेण संनिहितो भवती

॥ ९ ॥ भा० पं

भा० पं० स्वष्टमेभजतो विस्मृतस्यकर्मान्तरायतः ॥ एणस्तत्प्रसक्तस्य ज्ञात मृगत्वमीर्य्यते ॥ कृपयापि कृतः संगः पत्त
२७ नाये वयेगिमुहूर्त्तिप्रदर्शयन्नाह ॥ भरतस्ये एणपोषणं ॥ नैयमिकं नित्यं नैमित्तिकं विधिप्राप्तं ॥ आवश्यकं अर्थप्राप्त
मूत्रोत्सर्गादि कृतं तामभिषेकादिकं येनाव्रह्माक्षरं प्रणवं जपन् ॥ उदकांते नद्यास्तीरे ॥ जलाशय्याभ्यासं नद्याः समी
पे पेपीयमाने ॥ अत्याशत्त्या पीयमाने सति ॥ तावदेव तत्तत्क्षणमेव अविदूरेण सान्निधौ मृगपतेः ॥ सिंहस्य उन्नादो

श्रीशुक उवाच ॥ एकदा तु महानद्यां कृताभिषेकनैयमिकावश्यको ब्रह्माक्षरमभिगृणानो मुहूर्त्तत्रयमुद
कान्त उपविवेश ॥ तत्र तदा राजन् हरिणी पिपासया जलाशयाभ्यासमेकैवोपजगाम ॥ तया पेपीयमान
उदके तावदेवाविदूरेण नदतो मृगपतेरुन्नादो लोकभयंकर उदपतत् ॥ १ ॥ तमुपश्रुत्य सा मृगवधूः
प्रकृतिविक्लवा चकितनिरीक्षणा सुतरामपि हरिभयाभिनिवेशव्यग्रहृदया पारिप्लवदृष्टिरगततृ
षा भयात्सहसैवोच्चक्राम ॥ २ ॥ तस्या उत्पतन्त्या अन्तर्वत्न्या उरुभयावगलितो योनिनिर्गतो गर्भः स्रोतसि निप
पात ॥ तत्प्रसवोत्सर्पणभयखेदातुरा स्वगणेन वियुज्यमाना कस्यांचिद् दर्य्यां कृष्णसारसती निपपाताथ
च ममार ॥ ३ ॥

भि १ महान्नाद उद्भूतः ॥ १ ॥ प्रकृत्या स्वभावत एव विक्लवा व्याकुला सुतरां तु हरिभयाभिनिवेशेन व्यग्रं
व्याकुलं हृदयं यस्याः ॥ परिप्लवदृष्टिः परिभ्रान्तनेत्रा ॥ अगततृषा न गता तृट् यस्याः उच्चक्राम नदीमुल्लंघितवती ॥ २ ॥ अन्तर्वत्न्या
गर्भिण्या उरुभयेन स्थानाद्विचालितो योनिनिर्गतो स्रोतसि प्रवाहे निपतितः ॥ तत्प्रसवो गर्भपातः ॥ उत्सर्पणमुत्प्लव

एभयं च एतैः खेदेनातुरा पीडिता दर्य्यां गिरिगुहायां हरि
णवधूः पपात अथानंतरं मृता च ॥ ३ ॥

२७

धृतानि भगवद्व्रतानि येन सः ॥ भगवंतं सूर्यमंडले भ्युपतिष्ठन्नेतदु होवाचेत्यन्वयः ॥ कीदृशः ॥ ऐणेया हरिणास्त्व
जिनमैणेयं तदेव वासस्तेन अनुवासं नाभिषेकेणार्द्राः कपिशाश्च याः कुटिला जटास्तासां कलापेन विरोचमा
नः सूर्यप्रकाशिकया ऋचा हिरण्मयं ॥ ध्येयः सदा सवितृमंडलमध्यवर्तीत्यादिनोक्तं ॥ उज्जिहाने उद्गच्छति सति
सकारांतपाठे सनंतान्यर्थश्च ॥ अर्थस्तु स एव ॥१३॥ परो रजः रजसः प्रकृतेः परं शुद्धसत्वात्मकं सवितुर्देव

इत्थं धृतभगवद्व्रत ऐणेयाजिनवाससानुसवनाभिषेकार्द्रकपिशकुटिलजटाकलापेन च विरो
चमानः सूर्यर्चा भगवंतं हिरण्मयं पुरुषमुज्जिहाने सूर्यमंडले भ्युपतिष्ठन्नेतदु होवाच ॥१३॥
परो रजः सवितुर्जातवेदो देवस्य भर्गो मनसेदं जजान ॥ सुरेतसादः पुनराविश्य चष्टे हंसं
गृध्राणं नृषद्रिंगिरामिमः ॥१४॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे भगवत्परिचर्या
यां सप्तमोध्यायः ॥७॥

स्य सूर्यस्य भर्गः स्वरूपभूतं तेजः ॥ जातवेदो धनं ॥
कर्मफलं यस्मात् ॥ तत्कर्मफलमित्यर्थः ॥ अत्र हेतुः ॥ यत् मनसैवेदं विश्वं जजान ससर्ज ॥ पुनश्च अदः सृष्टं
विश्वमंतर्यामिरूपेण प्रविश्य गृध्राणं कांक्षंतं हंसं जीवं सुरेतसा चिच्छक्त्या विचष्टे पश्यति ॥ पालय
तीत्यर्थः ॥ नृषु सीदति ॥ उपाधितया तिष्ठतीति ॥ नृषत् बुद्धिः ॥ तस्या रिंगिं रिंगणं गतिं राती ति नृषद्रिंगिरा
वा छंदसी त्वमि पूर्वरूपत्वाभावः ॥ तद्भर्गः ॥ इमः ॥ शरणं व्रजामः ॥१४॥ इति पंचमे सप्तमः ॥७॥ ॥ ८८

भा० पं० तदेवाहन्नसंहीति ॥ ७ ॥ इति एवंकृतोनुषंगः ॥ आसक्तिर्येन मृगनयनद्रुनाम गापत्येन सहस्नेहेनानुवद्धं हृदयं ये
२८ न ॥ च ॥ स्नेहानुवंधनमेव प्रपंचयति कुसुमेत्यादिना स्वधयतीति इत्यनेन ॥ शालारकाः श्वानाः यदाभयेशंक
नूनंह्यार्योः साधवउपशमशीलाः कृपणसुहृद एवंविधायैस्वार्थानपि गुरुतरानुपेक्षंते ॥ ७ ॥ इ
तिकृतोनुषंगः त्रासनशयनाटनस्थानाशनादिषु सहमृगजद्रुना स्नेहानुवद्धहृदय आसीत्
च ॥ कुशकुसुमसमित्पलाशफलत्वणोदकान्याहरिष्यमाणेनद्रकमण्लाचेकादिभ्योभयमाशं
कमानोयदासहहरिणकुणकेनवनंसमाविशति ॥ ९ ॥ पथिपथिचमुग्धभावेनतत्रतत्रविषक्त
मतिप्रणयभरहृदयः कार्पण्यात्स्कंधेनोद्वहतिएवमुत्संगउरसिचाधायोपलालयन्मुदंपरमा
मुवाप ॥ १० ॥ क्रियायांनिर्वर्त्यमानायामंतरालेप्युत्थायोत्थाययदैनमभिचक्षीतनहिवावसव म २
र्षपतिः प्रकृतिस्थेनमनसातस्मा आशिष आशास्ते स्वस्तिस्ताद्वत्सतेसर्वतइति ॥ ११ ॥

मानोभवति ॥ तदाभेनसहवनंसमाविशति ॥ ९ ॥ अतिशायितः प्रणयभरोयस्यातन्हृदयंयस्यसः
॥ १० ॥ वर्षपतिर्भरतः ॥ प्रकृतिस्थेनस्वस्थेनस्यात्भूयात् ॥ ११ ॥ रामेरामरामरामरा ॥ ॥ ५५ ॥

एणकुणकं बालकं ॥ अपविद्धं बंधुभिस्त्यक्तं इतितैः कृपणत्वादि हेतुभिर्यो अनुकंपातया अनयत ॥ ध॥ कृतोनिजत्वीय
इत्यभिमानो येन ॥ पोषणं तृणादिना पालनं वृकादिभ्यो रक्षणं लालनं चुंबनादिना प्रीणनं कंडूयनादिना एतैर्यदनु
ध्यानमासक्तिस्तेन ॥ आत्मनो नियमाः स्नानादयः यमाः अहिंसादयः तैः सहिताः ईश्वरपरिचर्यादयः येऽस्य प्रत्यहमेकैकशो

भि

ऽन्त्वेणकुणकं कृपणं स्रोतसानुह्यमानमभिवीक्ष्यापविद्धं बंधुरिवानुकंपया राजर्षिर्भरत आदाय मृत
मातरं इत्याश्रमपदमनयत ॥ ध॥ तस्य ह वा एणकुणके उच्चैरेतस्मिन् कृतनिजाभिमानस्याहरहस्तत्पोष
णपालनलालनप्रीणनानुध्यानेनात्मनियमाः सह यमाः पुरुषपरिचर्यादय एकैकशः कतिपये
नाहर्गणेन वियुज्यमानाः किल सर्व एवोदवसन् ॥ श॥ अहो बताय हरिणकुणकः कृपण ईश्वररथचरण
परिभ्रमणरयेण स्वगणसुहृद्बंधुभ्यः परिवर्जितः शरणं च मोपसादितो मामेव मातापितरौ भ्रातृज्ञा
तीन् यौथिकांश्चैवोपेयाय नान्यं कंचन वेद मय्यतिविस्रब्धश्च अत एव मया मत्परायणस्य पोषणपा
लनप्रीणनलालनमनुसूयुनानुष्ठेयं शरण्योपेक्षादोषविदुषा ॥ ६॥

वियुज्यमानाः संतः कतिपयेनाहर्गणेन सर्वे उत्सन्ना बभूवुः ॥ ध॥ आसक्तिं प्रपंचयन्नाह अहो इत्यादिना ॥ इति कृतानुष
गइत्येतत्पर्यंतेन ॥ ईश्वररथचरणः कालचक्रं तस्य परिभ्रमणवेगेन स्वगणादिभ्यो विश्लेषितः ॥ मा इति मां च शरणं प्राप्त
मामेव मातृपित्रादिबुद्ध्या उपेयाय प्राप्तः यौथिकान् यूथसंघातिनः ॥ अनसूयुना एतन्निमित्तं मम स्वार्थो भ्रंश

॥ उ ॥ [illegible]

भा० पं० हरिण एव राजकुमारः आगत्य मां अपि स्वित् सुखयतीत्यन्वयः ॥ किं कुर्वन् विविधै रुचिरैर्दर्शनीयैः निजैर्मृगदार-
२६ विनोदैः स्वीयानां खेदमुपनुदन् ॥ १४ ॥ त्वेलिकायां क्रीडायां मृषा यः समाधिस्तेन आमीलिते दृशौ येन तं मां प्रेमसं-
रंभेण प्रणयकोपेन दृष्टत्तजलविंदुः तत्र परुषेण कोमलेन मृदुना विषाणाग्रेण लुगति स घट्टयति ॥ १५ ॥ आ-
सादितं हविर्यस्मिन् तस्मिन् वर्हिषि दर्भेद्वंता कर्षणादिना चापलेन दूषिते सति ॥ दूषितेत्वेति पाठः ॥ वर्हिषि विषये

अपि स्विदकृतस्वकृतेमागत्य मां सुखयिष्यति हरिणराजकुमारो विविधरुचिरदर्शनीयनिज
मृगदारकविनोदैरसंततोषं स्वानामपनुदन् ॥ १४ ॥ त्वेलिकायां मामृषासमाधिनामीलित
दृशं प्रेमसंरंभेण चकितचकितमागत्य पृषदपरुषविषाणाग्रेण लुगति ॥ १५ ॥ आसादितहविषि
वर्हिषि दूषिते मया पालयमानो भीतभीतः सपद्युपरततरासमृषिकुमारवदवहितकरणकलाप आ-
५२ स्ते ॥ १६ ॥ किं वा अरे आचरितं तपस्तपस्विन्यानया यदियमवनिः सविनयकुसुमसारतनयतनुत-
रसुभगशितमाखरखुरपंक्तिभिर्दविणविरहातुरस्य कृपणस्य मम मद्द्रविणपदवीः सूचयंत्यात्मानं ॥

दूषणोत्कंठेत्यर्थः ॥ मयाधिक्षिप्तः सन् तत्क्षणमेवोपरतक्रीडो निश्चल आस्ते ॥ १६ ॥ इति बहुधा प्रलप्योत्थाय ब-
हिर्निर्गत्य तत्खुरखातभूभागोपश्लेषसंभ्रांतहृदय आह ॥ किं वेति ॥ अरे अहो अहो अनयात्रत्या किं वा तप आच-
॥ ऽऽ ॥ ॥ ऽऽ रितं तपस्विन्यास भाग्यया यत् यस्मादियं सविनयस्य कुसुमसारतनयस्य तनुतराः सुभगा

आपिवतमाआखरा आखुरा येषु तेषां पदानां तत्र तत्रांकितानां पंक्तिभिः ॥ द्रविणं मृगस्तेन रहितस्य ॥

१९

अन्यदा अदर्शने सकरुणं यथा भवति तथा ॥ अनुशोचन्निति तिं होवाचेत्यन्वयः । अतितर्षेण अन्यौत्सुक्येन हरि
णकुणकविरहेण विह्वले हृदये संतापो यस्य । कश्मलं मोहं प्रापितः सन् ॥ ११ ॥ अपीति संभावनायां । अहो इति
खेदे । शठकिरातयोरिव वंचने पराक्रूरा मतिर्यस्य ॥ अकृतसुकृतस्य निर्भाग्यस्य । मम तत् शावकादिकमगणयन्

अन्यदा भृशमुद्विग्नमना नष्टद्रविण इव कृपणः सकरुणमतितर्षेण हरिणकुणकविरहविह्वल
हृदयसंतापस्तमेवानुशोचन्किल कश्मलं महदभिरंभित इति होवाच ॥ १२ ॥ अपि वत स वै कृपण
एणबालको मृतहरिणीसुतः अहो ममानार्यस्य शठकिरातमतेरकृतसुकृतस्य कृतविस्रंभमा
त्मप्रत्ययेन तदविगणयन्सुजन इवागमिष्यति किं ॥ १३ ॥ अपि क्षेमेणास्मिन्नाश्रमोपवने शष्पाणि च
रंतं देवगुप्तं द्रक्ष्यामि ॥ १४ ॥ अपि च न वृकः शालावृकोन्यतमो वा नैकचर एकचरो वा भक्षयति ॥ १५ ॥ निम्लो
चति ह भगवान्सकलजगत्क्षेमोदयस्त्रय्यात्माद्यापि मम न मृगवधून्यास आगच्छति ॥ १६ ॥

चिंतयन्नागमिष्यति किं ॥ अपराधाचिंतने हेतुः ॥ आत्मप्रत्ययेन चित्तमुग्ध्या कृतविश्वासः सन्सुजनो यथागच्छति
तद्वत् ॥ १३ ॥ शष्पाणि कोमलतृणानि ॥ १४ ॥ नैकचरो यूथचरः सूकरादि ॥ यद्वा ॥ एक एव चरति यः क्रूरस्वभावो व्याघ्रादि ॥ न
भक्षतीति किं ॥ १५ ॥ सकललोकस्य क्षेमो यस्मात्स उदयो यस्य वेदत्रयी ॥ आत्मा स्वरूपं यस्य सः ॥ सूर्यो निम्लोचति अस्तं याति

भा० पं० मृगदारकच्छाभासमानेन कर्मणाभगवदाराधनलक्षणाच्च विभ्रंशितः ॥ कथमित्तरथेति ॥ साक्षात्स्वपु
३० त्रवत्कथमासंगः स्यात् ॥ पूर्वंपरित्यक्तादुस्त्यजात्पुत्रादेरसायेन ॥ अंतरायेणविहतंयोगारंभणंयस्य ॥ आत्मानम
विगणयतः ॥ आत्मचिंतामकुर्वतः ॥ तावदेवतीव्रवेगः कालोन्तस्तुसमयमापद्य ॥२३॥ लोकंवेदंमृगेन

श्रीशुक उवाच ॥ एवमघटमानमनोरथाकुलहृदयो मृगदारकाभासेन स्वारब्धकर्मणा योगारं
भणतो विभ्रंशितः स योगतापसो भगवदाराधनलक्षणाच्च कथमितरथा जात्यंतर एणकुणक आ
संग साक्षान्निःश्रेयसप्रतिपक्षतया प्राक्परित्यक्तदुस्त्यजहृदयाभिजातस्य तस्यैवमंतरायवि
हतयोगारंभणस्य राजर्षेर्भरतस्य मृगार्भकपोषणपालनप्रीणनलालनानुषंगेणाविगणयत आ
रि ५ त्मानमहिरिवाखुबिलं दुरतिक्रमः कालः करालरभस आपद्यत ॥२६॥ तदानीमपि पार्श्ववर्तिनमात्मज
मिवानुशोचंतमभिवीक्षमाणो मृग एवाभिनिवेशितमना विसृज्य लोकमिमं सह मृगेण कलेव
रं मृतमनु न मृतजन्मानुस्मृतिरितरवन्मृगशरीरमवाप ॥२७॥ तत्रापि ह वा आत्मनो मृगत्वकार
णं भगवदाराधनसमीहानुभावेनानुस्मृत्य भृशमनुतप्यमान आह ॥२८॥

सहितं विसृज्य प्राक्तनदेहं मृगशरीरमवाप ॥ कथं मृतं कलेवरं ॥ मृतं मृगमनु न मृता न विनष्टा पूर्वजन्मानु
स्मृतिर्यस्य ॥२७॥ आह स्वचित्ते ॥२८॥ ३०

अतएवातुरस्य दुःखितस्य मम द्रविणमार्गं सूचयंतीसती स्वात्मानं च ताभिः कृ तमंडनं द्विजानां यज्ञभूमिं करो
ति॥ यस्मिन्देशे मृगः स्वैरमास्ते तस्मिन्धर्मो निबोधतेति श्रुतेः॥२०॥ तावदुदिते चंद्रे मृगं हृष्ट्वा संभावयन्नाह॥ अपि
स्विदिति॥२१॥ चंद्ररश्मिस्पर्शेन सुखं प्राप्याह॥ किं चेति संभावनायां॥ आत्मजविश्लेषे एज्वरस्तापः स एव दहनस्तस्य

चसर्वतः कृतकौतुकं द्विजानां स्वर्गापवर्गकामानां देवयजनं करोति॥२०॥ अपि स्विदसौ भगवाननुडुपति
रेनं मृगपतिभयान्मृत्तमानं मृगबालकं स्वाश्रमपरिभ्रष्टमनुकंपया कृपया जनवत्सलः परिपाति
॥२१॥ किं वात्मजविश्लेषज्वरदवदहनशिखाभिरुपतप्यमानहृदयस्थलनलिनीकं मामुपसृत्य मृगी
तनयं शिशिरस्रग्धानुरागगुणितनिजवदनसलिलामृतमयगभस्तिभिः स्वधयतीति च॥२२॥

ज्वालाभिरुपतप्यमाना हृदयरूपा स्थलनलिनी यस्य॥ जलस्थं पद्मं तापं सोढुं क्षमम् इति॥ स्थलनलिनस्य उपसृत्य
मृगीतनयो येन तं चंद्रः स्वधयति शांतिं गमयति॥ कैः शिशिरं च तच्छांतं च मय्यनुरागेण गुणितं पुनःपुनः प्रवर्त
यद्वदनसलिलं तदेवामृतमया गभस्तयस्तैः॥ लोके हि तं मंत्रवादिनो वदनसलिलेन तापं शमयंतीति प्रसिद्धं॥ ४९
उपसृत्य मृगीतनय इति पाठे मनोरथांतरमेतत्॥ उपसृत्य मृगीतनयः किं वा मां स्वधयिष्यतीति॥ शेषं समानं

भा०पं० पितुः आत्मविज्ञानो भरतो मृगत्वं गतः ।। प्रारब्धकर्मवेगेन तदंते जडविप्रता ।। आंगिरसगोत्रजानां प्रव
३१ रस्य श्रेष्ठस्य समादियुक्तस्य ।। त्यागो ज्ञातिद्रव्यादिभ्यो नदानादि ।। विद्या कर्मविद्या ।। आत्मज्ञानं देहादिव्यतिरि
क्तभोक्त्रात्मज्ञानं ।। आनंदो धर्मसंपत्तिजः ।। आत्मना सदृशाः श्रुतादयो गुणा येषां ते समानोदराः नव
पुत्रा बभूवुः ।। यवीयस्यां कनिष्ठायां च मिथुनं कन्यापुत्रं ।।१।। अंत्यं चरमं शरीरं येन तं ।। शुचीनां श्रीमतां गेहे यो

श्रीशुक उवाच ।। अथ कस्यचिद्द्विजवरस्यांगिरसप्रवरस्य शमदमतपःस्वाध्यायाध्ययनत्यागसं
तोषतितिक्षाप्रश्रयविद्यानसूयात्मज्ञानानंदयुक्तस्यात्मसदृशश्रुतशीलाचाररूपौदार्यगुणा
नव सोदर्या अंगजा बभूवुः ।। मिथुनं च यवीयस्यां भार्यायां ।।१।। यस्तु तत्र पुमांस्तं परमभागवतं रा
जर्षिप्रवरं भरतमुत्सृष्टमृगशरीरं चरमशरीरेण विप्रत्वं गतमाहुः ।।२।। तत्रापि स्वजनसंगाच्च भृ
शमुद्विजमानो भगवतः कर्मबंधविध्वंसनश्रवणस्मरणगुणविवरणचरणारविंदयुगलं मनसा
विदधदात्मनः प्रतिघातमाशंकमानो भगवदनुग्रहेणानुस्मृतस्वपूर्वजन्मावलिरात्मानमुन्मत्तज
डांधबधिरस्वरूपेण दर्शयामास लोकस्य ।।३।।
गभ्रष्टोऽभिजायते इति स्मरतेः ।।२।। तत्रापि चान्यसंगादात्मनश्च भ्रंशमाशंकमानः आत्मानमुन्मत्तादिरू
पेण दर्शयामास इत्यन्वयः ।। किं कुर्वन् कर्मविध्वंसनं श्रवणं स्मरणं गुणानां विवरणं कथनं च यस्य तद्भगवतश्च
रणारविंदयुगलं मनसा विशेषेण धारयन् ।। प्रतिघातशंकायां हेतुः ।। अनुस्मृता स्वीयपूर्वजन्मनां आवलिः परंप ३१

अहो कष्टं धीराणां मार्गात् भ्रष्टोहं ॥ भ्रंशमेवाह ॥ यद्यतः विमुक्ताः समस्ताः संगा येन ॥ विविक्तं पुण्यमरण्यं यस्य ॥ आत्म
वतो धीरस्य मम मनः सर्वेषां भूतानामात्मनि वासुदेवे समावेशितं समाहितं च निश्चलं सत् आराद्दूरादेव गलितं
निःसृतं केन समावेशितं ॥ अस्यनुश्रवणादिष्वभियोगेन ॥ अभिनिवेशेन ॥ अशून्याः सकला यामा यस्मिन्न तेन का
लेन ॥ २९ ॥ निगूढो नाविःकृतो निर्वेदो येन शालहृतोपलक्षितं ग्रामं कालंजरात् ॥ तत्र हरिणो जातः ॥ तस्मात् पर्वता

अहो कष्टं भ्रष्टोहमात्मवतामनुपथात् ॥ यद्विमुक्तसमस्तसंगस्य विविक्तपुण्यारण्यशरणस्यात्मव
त आत्मनि सर्वेषामात्मनां भगवति वासुदेवे तदनुश्रवणमननसंकीर्त्तनानुस्मरणाभियोगेनाशू
न्यसकलयामेन कालेन समावेशितं समाहितं कार्त्स्न्येन मनस्तत्तु पुनर्ममाबुधस्यारान्मृगसुतम
नुपरिसुस्राव ॥ २९ ॥ इत्येवं निगूढनिर्वेदो विसृज्य मृगीमातरं पुनर्भगवत्क्षेत्रमुपशमशीलमुनि
गणदयितं शालग्रामं पुलस्त्यपुलहाश्रमं कालंजरात्प्रत्याजगाम ॥ ३० ॥ तस्मिन्नपि कालं प्रतीक्षमाणः सं
गाच्च भृशमुद्विग्न आत्मसहचरः शुष्कपर्णतृणवीरुधा वर्तमानो मृगत्वनिमित्तावसानमेव गणयन्मृगश
रीरं तीर्थोदकक्लिन्नमुत्ससर्ज ॥ ३१ ॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे भरतचरित्रे ऽष्टमोध्यायः ॥ ८ ॥

त ॥ ३० ॥ आत्मैव सहचरो यस्य ॥ यद्वा एकाकी प्रतीक्षणस्यैव प्रपंचः ॥ मृगत्वनिमित्तेति तीर्थोदकेन क्लिन्नमार्द्रं अर्धो
दकस्थमित्यर्थः ॥ ३१ ॥ इति पंचमे ऽष्टमः ॥ ८ ॥ नवमे जडविप्रत्वे तस्यरागाद्यभावतः ॥ भद्रकालीपशुत्वेपि निर्विकारि

भा० पं० सावधिब्रह्मचर्यव्रतः। कर्माणि तेनानभियुक्तानि अनादृतान्यपि तं पुत्रं प्रत्यनुशास्यापि अप्राप्तपुत्रपाण्डित्यमनो
३२ रथः स्वयं कालेनोपसंहृतः। म्रियत इत्यर्थः॥ अनुशासननिर्बन्धे पुनस्तमेव हेतुमाह॥ अनुशिष्टेन भाव्यमित्यस
त्ययोग्य आग्रहो यस्य॥ ३॥ सपत्नीभ्यः समर्प्य अनुसंस्थया। अनुसरणेन॥ सहगमनं तत्र पाठेऽप्ययमेवार्थः॥ अन्ये त्वसत
कर्मण्यनभियुक्तान्यपि समनुशिष्टेन भाव्यमित्यसदाग्रहः पुत्रमनुशास्य स्वयं तावदनधिगतम
नोरथः कालेनाप्रमत्तेन स्वयं गृहस्य च प्रमत्त उपसंहृतः॥ ६॥ अथ यवीयसी द्विजपत्नी स्वगर्भजातं
मिथुनं सपत्न्या उपन्यस्य स्वयमनुसंस्थया पतिलोकमगात्॥ पितर्युपरते भ्रातर एनमतत्प्रभा
वविदस्त्रय्यां विद्यायामेव पर्यवसितमतयो न परविद्यायां जडमतिरिति भ्रातुरनुशासननिर्बं
धान्न्यवृत्सन्॥ ७॥ स च प्राकृतैर्द्विपदपशुभिरुन्मत्तजडबधिरेत्यभिभाष्यमाणो यदा तदनुरूपाणि प्रभा
षते कर्माणि च कार्यमाणः परेच्छया करोति। विष्टितो वेतनतो वा याच्ञया यदृच्छया वोपसादितमल्पं ब
हु वा मिष्टं कदन्नं वाभ्यवहरति परं नेन्द्रियप्रीतिनिमित्तं॥ ८॥
निवर्तितुमैच्छन् निवृत्ता इत्यर्थः॥ ७॥ यदाभिभाष्यमाणस्तदनुरूपाणि प्रभाषते॥ मूल्यमन्तरेण बलात् यत्कर्म कार्य स्त्य
ते सा विष्टिः॥ वेतनं मूल्यं विष्ट्यादिभिः उपसादितमन्नमभ्यवहरति परं केवलं भुक्तेन त्विन्द्रियप्रीतये॥ ८॥
३२

पुत्रस्नेहेनानुवद्धं॥मनोयस्यजडस्यगार्हस्थ्यानाधिकारात्समावर्त्तनांतान्संस्कारान्विदधानस्तमुपनीतस्य
पुनःशौचादीनत्तस्यानभिप्रेतानपिशिक्षितवान् तत्रहेतुः॥अनुशिष्टेनहिमायापितुःसकाशात्पुत्रेणेति॥६॥
सोपिचपितुःशिक्षानिर्वंधनिवृत्तयेअसध्रीचीनमसमीचीनमिवकरोतिस्म॥उपाकरणवेदव्रताद्यनंतरंश्रा
वणादिमासेषुवेदानध्यापयिष्यन्॥आदौताव द्व्याहृतिभिःसहप्रणवशिरःसहितांत्रिपदीं॥चैत्रादिषुचतुरोमा

तस्यापिहवाआत्मजस्यविप्रः पुत्रस्नेहानुवद्धमनाआसमवर्त्तनात्संस्कारान्यथोपदेशंविदधान
उपनीतस्यचपुनःशौचाचमनादीन्यमनियमाननभिप्रेतानपिसमशिक्षयत्॥अनुशिष्टेनहिभाव्यं
पितुःपुत्रेणेति॥५॥सचापितदुहपितरसन्निधावेवासध्रीचीनमिवस्मकरोति॥छंदांस्यध्यापयिष्यन्
६४ सव्याहृतिभिःसप्रणवशिरस्त्रिपदींसावित्रींग्रैष्मवासंतिकान्मासानधीयानमप्यसमवेतरूपंग्राह
यामास॥५॥एवंस्वतनुजेआत्मन्यनुरागावेशितचित्तःशौचाध्ययनव्रतनियमगुर्वनलशुश्रूषण

सान्॥अधीयानमप्यसमवेतरूपंयथाभवत्येवंग्राहयामास॥तावतापिकालेनस्वरानुपूर्व्यादियुक्तंव्याहृत्या
दितस्यनागतमित्यर्थः॥५॥आत्मभूतेस्वतनुजेऽनुरागेणावेशितंचित्तंयेन॥शौचादीनियान्योपकुर्वाणस्य॥

भा० पं० यदा तु परेभ्यः कर्मभृत्ये नाहारमपेक्षमाणो भवति तदा केदारकर्मणि शालिक्षेत्रे कर्दमविलोडनादौ स्वा
३२ हारप्रलोभेन नियुक्तः सन् करोति ॥ किंतु अत्र कर्दमस्य प्रक्षेपे क्षेत्रं समं भवेत् ॥ इतउच्चैरन्यो विषमं स्यादिति नवे
दभ्रान्ते भिर्दत्तान्नकणादीन प्रमत्तवदभ्यवहरति भुंक्ते ॥ कणान् चूर्णतंडुलाः ॥ पिण्याकं तैलयंत्रोद्धृततिलकिट्ट

यदा तु परतन्त्र आहारं कर्म वेतनं ईहमानः स्वभ्रातृभिरपि केदारकर्मणि निरूपितस्तदपि करो
ति ॥ किंतु न सम विषमं न्यूनमधिकमिति वेद कणपिण्याकफलीकरणकुल्माषस्थालीपुषाद्यन्न
मप्रमत्तवदभ्यवहरति ॥ ११ ॥ अथ कदाचित्कश्चिद्वृषलपतिर्भद्रकाल्यै पुरुषपशुमालभतापत्य
कामः ॥ १२ ॥ तस्य ह दैवमुक्तस्य पशोः पदवीं तदनुचराः परिधावंतो निशि निशीथसमये तमसावृता
यामनधिगतपशवः ॥ आकस्मिकेन विधिना केदारान् वीरासनेन मृगवराहादिभ्यः संरक्षमाणमंगि

फलीकरणं तुषाः कुल्माषाः ॥ कीटदष्टा माषाः ॥ स्थालीपुरीषं स्थालीलग्नं ॥ रःप्रवरसुतमपश्यन् ॥ १३ ॥
दग्धान्नं ॥ १४ ॥ तस्य रागादिराहित्यमस्तो लय चैव भी रितं ॥ अथान्यच्चरितं प्राह चित्रं मत्यावसंभ्रमे वृषलपतिर्भ
द्रः सामंतश्चोरराजः ॥ आलब्धं आलब्धुं प्रवृत्तः ॥ १ ॥ दैवाद्धनविमुक्तस्य पशोः ॥ तमसाव्याप्तायां निशि ॥ त
त्रापि निशीथसमये अर्धरात्रावसरे आकस्मिको दैवनिमित्तः विधिः प्रकारस्तेन वीरासनेन ऊर्ध्वावस्थानेन १३ ॥

अत्र हेतुद्वयमाह ॥ नित्यं सदा निवृत्तं निमित्तं यस्मात् स उत्पादकमनन्यः ॥ स्वसिद्धः ॥ अभिव्यंजकमनन्यः ॥ विशुद्धः ॥ केव
लोनुभवः स एवानंदरूपः ॥ स्वात्मा तस्य लाभः ॥ एवंभूतोहमिति तस्याभिगमः प्राप्तिरस्ति यस्य द्वंद्वानि समानाव
मानादीनि तद्धेतुकयोः सुखदुःखयोरकृतदेहाभिमानः ॥ तस्मान्नैंद्रियप्रीतिनिमित्तमभ्यवहरतीत्यन्वयः ॥९॥
अत एव शीतोष्णादिष्वनादिष्वनावृतांगः विचचारेत्यन्वयः ॥ कीदृशः पीनः पुष्टः संहननांगः ॥ संहन्यंते निविडीभ

नित्यनिवृत्तस्वसिद्धविशुद्धानुभवानंदस्वात्मलाभाधिगमः सुखदुःखयोर्द्वंद्वनिमित्त
योरसंभावितदेहाभिमानः ॥९॥ शीतोष्णवातवर्षेषु वृष इवानावृतांगः पीनः संहननांगः ॥
स्थंडिलसंवेशनानुन्मर्दनामज्जनरजसा महामणिरिवानभिव्यक्तब्रह्मवर्चसः कुपटावृ
तकटिरुपवीतेनोरुमषिणा द्विजातिरिति ब्रह्मबंधुरिति संज्ञयातज्ज्ञजनावमतो विचचार ॥१०॥

वंतिस्म ॥ अंगानि यस्य ॥ कठिनावयव इत्यर्थः ॥ स्थंडिलसंवेशनं भूमिशयनं ॥ अनुन्मर्दनं मर्दनाभावः ॥ अ
मज्जनं स्नानाभावः ॥ तैर्यद्रजः तेनाप्रकटं ब्रह्मवर्चसं ब्राह्म्यं तेजो यस्य ॥ यथा महामणिरनभिव्यक्ति ते
तेजो भवति ॥ कुत्सितेन पटेनावृता कटिर्यस्य ॥ उरुमषिणा अतिमलिनेन तत्त्वतत्त्वं जानंतीति ये तैर्ज्ञैरेवम

भा० पं० अमर्षोपराधासहनं॥रोषस्त्ववपुषोदाहनंतयोरावेशः॥तस्यरभसेनवेगेनविलसितंउत्तंभितौभ्रुकुटिलक्ष
३८ णोविटपःशाखाकुटिलादंष्ट्राश्च॥अरुणानीक्षणानितेषामाटोपःसंभ्रमस्तेनातिभयानकंवदनंयस्याः॥इदंतुज
गच्छंतुमुद्यतेव॥महांतमट्टहासंसनादहासं॥ततःस्थानादुत्पत्यविवृक्णानिछिन्नानिशीर्षाणियेषां॥गणेनपरि

भृशममर्षरोषावेशरभसविलसितभ्रुकुटिविटपकुटिलदंष्ट्रारुणेक्षणाटोपातिभयानकवदनाहंतु
कामेवेदंमहाट्टहासमतिसंरंभेणविमुंचंतीततउत्पत्यपापीयसांदुष्टानांतेनैवासिनाविवृक्णशीर्ष्णां
गलात्स्रवंतमसृगासवमत्युष्णंसहगणेननिपीयातिपानमदविह्वलोच्चैस्तरांस्वपार्षदैःसहजगौ
ननर्त्तचविजहारशिरःकंदुकलीलया॥१९॥एवमेवखलुमहदभिचारातिक्रमःकार्त्स्न्येनात्मनेफल
ति॥२०॥नवाएतद्विष्णुदत्तमहदद्भुतंयदसंभ्रमःस्वशिरश्छेदनआपतितेपिविमुक्तदेहाद्यात्मभा
वसुदृढहृदयग्रंथीनांसर्वसत्त्वसुहृदात्मनांनिर्वैराणांसाक्षाद्भगवतानिमिषारिवरायुधेनाप्रमत्तेन

चारेणसहसिरांस्येवकंदुकानितेषांलीलयाविक्रीडितेन॥१९॥ननुकथंदेव्याराधकानामेवंविपरीतंफलं
तत्राह॥एवमेवेति॥महत्सुअपराधरूपोतिक्रमःअपराधः॥२०॥नन्वसंभाविमिदमेवयन्मरणप्राप्त्याकुले
तंमारकेषुचक्रोधाभावइत्यादितत्राह॥नवाइतिविमुक्तोदेहाद्यात्मभावलक्षणःसुदृढोहृदयग्रंथिर्यैः
सर्वसत्त्वानांसुहृदः॥आत्मानश्चयेतेषांदेहाद्यभिमानसद्भावेपिमरणादिभयमस्तीत्याह॥साक्षा ३८

अवमृश्य ज्ञात्वा ॥१४॥ पणयश्चौराः ॥ अहतेन नूतनेन उपस्कृतं अलंकृतं ॥ वैशससंस्थया हिंसाविधानेन गीतादि
घोषेण सह ॥१५॥ अथ वृषलराजस्य पणिः ॥ पुरोहितत्वेन वर्तमानश्चौरः ॥ तदभिमंत्राभिमंत्रितं ॥ भद्रकालीमंत्रो

अथ त एनमनवद्यलक्षणमवमृश्य भर्तृकर्मनिष्पत्तिं मन्यमाना बद्धारशनया चंडिकागृहमुप
निन्युर्मुदा विकसितवदनाः ॥१४॥ अथ पणयस्तं स्वविधिनाभिषिच्याहतवाससाछाद्य भूषणाले
पस्रक्तिलकादिभिरुपस्कृतं भुक्तवंतं धूपदीपमाल्यलाजकिशलयांकुरफलोपहारोपेतया वै
शससंस्थया महता गीतस्तुतिमृदंगपणवघोषेण च पुरुषपशुं भद्रकाल्याः पुरत उपवेशया
मासुः ॥१५॥ अथ वृषलराजपणिः पुरुषपशोरसृगासवेन देवीं भद्रकालीं यक्ष्यमाणस्तदभि
मंत्रितमसिमतिकरालंनिशितमुपाददे ॥१६॥ इति तेषां वृषलानां रजस्तमःप्रकृतीनां धनमदरजउ
त्सिक्तमनसां भगवत्कलावीरकुलं कदर्थीकृत्योत्पथेन स्वैरं विहरतां हिंसाविहाराणां कर्मातिदारुणं
यद्ब्रह्मभूतस्य साक्षाद्ब्रह्मर्षिसुतस्य निर्वैरस्य सर्वभूतसुहृदः ॥ सूनायामप्यननुमतमालंभनं तदुप

भिमंत्रितं ॥१६॥ धनमद एव रजः ॥ तेनोत्सिक्तं ॥ त्यक्तमर्यादं मनो येषां ॥ भगवत्कलायुक्तं वीराणां ब्राह्मणानां कु
त्सीकृत्य यथेष्टं वर्तमानानां यत्कर्म तदुपलभ्य देवी उच्चचाट प्रतिमां त्यक्त्वा बहिर्निर्गता ॥ कथंभूतं आलंभ
नं ॥ सूनायामपि आपत्कालेनुज्ञातायामपि हिंसायामननुज्ञातं भद्रकालीत्यंतं गद्य ॥१७॥

भा० पं हिंसापरिहारार्थमिषुमात्रप्रदेशावलोकस्यानुपश्चात्तूयागतिः तस्याः हेतुभूतायाः पुरुषाणां गतिः ॥ न सम्यगादि
३५ तोऽरुकरूपानामभूत ॥२॥ सोपालंभं साक्षेपं सामदामभेददंडेषूपायेषु चतुर्थो दंडस्तं किं न चिंतितः ॥३॥ भवन्नियमानु
पथोः त्वदाज्ञावर्त्तिनः ॥ न पारयामः ॥ न शक्नुमः ॥४॥ कृपणानां वचो निशम्य सांसर्गिकः संसर्गनिमित्तः ॥ एकस्यापि दो

यदा हि द्विजवरस्येषुमात्रावलोकानुगतेर्न समाहिता पुरुषगतिस्तदा विषमगतां स्वशिबिकां रहूगण उ
पधार्य पुरुषानधिवहत आह हे वोढारः साध्वतिक्रमत किमिति विषममुह्यते यानमिति ॥२॥ अथ
त ईश्वरवचः सोपालंभमुपाकर्ण्योपायतुरीयाच्छंकितमनसस्तं विज्ञापयांबभूवुः ॥३॥ न वयं नरदेव
प्रमत्ता भवन्नियमानुपथाः साध्वेव वहामः ॥ अयमधुनैव नियुक्तोपि न द्रुतं व्रजति नानेन सह वोढुमु
ह वयं पारयाम इति ॥४॥ सांसर्गिको दोष एव नूनमेकस्यापि सर्वेषां संसर्गिणां भवितुमर्हतीति नि
श्चित्य निशम्य कृपणवचो राजा रहूगण उपासितवृद्धोपि निसर्गेण बलात्कृत ईषदुत्थितम
न्युरविस्पष्टब्रह्मतेजसं जातवेदसमिव रजसावृतमतिराह ॥५॥

षः सर्वेषामेव भवितुमर्हतीति निश्चित्य रहूगण आहेत्यन्वयः ॥ कथंभूतः ॥ उपासिता वृद्धा येन सोपि स्वभा
वेन बलात्कारवशः कृतः सन् ॥ कथंभूतं प्रत्याह ॥ नष्टं ब्रह्मतेजो यस्मिन् ॥ भस्मच्छन्नमग्निमिव स्थितं ॥५॥

द्भगवताभितोरक्षमाणानां॥केनअनिमिषःकालःसएवअरिचक्रं तेनवरायुधेन तैस्तैर्भावैरिच्छअंतर्यामित्तयाप्र
वर्त्तमानेर्भद्रकाल्यादिरूपैः॥नकुतश्चिदपिभयंयस्मिन्॥भागवतानांभगवदुपासकानांपरमहंसानां॥२०॥
इतिपंचमेनवमः॥९॥दशमेद्विपताराज्ञाशिबिकांस्वांवहन्मुनिः॥खदुर्वादानुवादेनविज्ञायासुप्रसादितः॥एवंभ
ताविकारित्वमत्तसर्वज्ञेयोःसमं॥इतिसर्वज्ञतासिद्धा रहूगणएकदाएवं॥रहूगणोनामसिंधुसौवीरदेशयोराजात
तैस्तैर्भावैःपरिरक्ष्यमाणानांतत्पादमूलमकुतश्चिद्भयमुपसृतानांभागवतपरमहंसानां॥२०॥इतिश्रीम
द्भागवतेमहापुराणेपंचमस्कंधेजडभरतचरितेनवमोध्यायः॥९॥श्रीशुकउवाच॥अथसिंधुसौवीर
पतेरहूगणस्यव्रजतइक्षुमत्यास्तटेतत्कुलपतिनाशिबिकावाहपुरुषान्वेषणसमयेदैवेनोपसादितः
सद्विजवरउपलब्धएषपीवायुवासंहननांगोखरवदूरंवोढुमलमितिपूर्वविष्टिगृहीतैःसहगृहीतःप्रसभ
मतदर्हउवाहशिबिकांसमहानुभावः॥१॥
त्वद्विजिज्ञासुःकपिलाश्रमंयदागच्छतिस्मतदायदृत्तंतदाह
अथेति॥इक्षुमत्याःनद्यास्तीरेतेषांशिबिकावाहानांकुलस्यनाथेन॥एषगौरिवखरइवचभारंवोढुंसमर्थ
इतिपूर्वंयेकेचनविष्ट्यावलात्गृहीतास्तैःसहप्रसभंगृहीतःसन्॥अतदर्होपिसमहामुनिःशिबिकामु
वाहेत्यन्वयः॥१॥ रामरामरामरामरामराम ॥॥ऽऽ॥

भा० पं० अप्रवृद्ध मतन्वितां ॥ नरदेवोहमित्यभिमानो यस्य तं ॥ अनुविद्धेन संगुणेन तेन तिरस्कृत ॥ अशेषः संपूर्णो भगवतः
३६ प्रियो निकेतन यत्रा आश्रयो येन तं ॥ यद्वा शेषाणां निकेतः सर्वेषां भूतानां सुहृच्च आत्मा च ॥ योगेश्वराणां चर्य्यायां जड
दिवत् आचरणं ॥ तस्यां चात्यंतं व्युत्पन्ना परिचिता मतिर्यस्य ॥ तं स्मयमानः सान्निवेश मुखप्रसत्तिर्दीत्य
ति विगतस्मयः शांत गर्वः ॥ ६ ॥ मित्रवक्रोत्तयापादुक्तं चेनश्रांत ॥ न च इदौ ऐमनाप्तानमागमत इति तत्रोत्तरमाह ॥ त्व
या यदुदितं श्रमादिनास्तीति तत् व्यक्तं स्फुटं न तु पैत्रा विप्रलंभो न भवति तदेवाह हे वीर यं भारि दि १

एवं वक्रं वचनमपि भाषमाणं नरदेवाभिमानं रजसा तमसानुविद्धेन मदेन तिरस्कृताशेषभगवत्प्रि
य निकेतं पंडितंमानिनं स भगवान् ब्राह्मणो ब्रह्मभूतः सर्वभूतसुहृदात्मा योगेश्वरचर्यायाम
तिव्युत्पन्नमतिः स्मयमान इव विगतस्मय इदमाह ॥ ब्राह्मण उवाच ॥ त्वयोदितं व्यक्तमविप्रल
ब्धं भर्तुः स मे स्याद्यदि वीर भारः ॥ गंतुर्यदि स्यादधिगम्यमध्वा पीवेति राशौ न विदां प्रवादः ॥ १० ॥

नामकश्चित्स्यात्स भर्तुर्वोढुर्देहस्य यदि स्यात् ॥ स च देहो मे यदि प्रसक्तः स्यात् तर्हि इदानीं भारभावात् विप्रलंभः
स्यान्न त्वेतदस्ति भारस्य वोढव्यानि रूप्यत्वात् मम च तत्संबंधाभावात् ॥ तथा गंतुरधिगम्यं प्राप्यमध्वा
यदि स्यात् ॥ अद्वैति पाठे साध्यान्तरमार्थतः तत्र मेय दिस्यादित्यादि योज्यं ॥ यत्त्वयोक्तं नातिपीवेति तत्राह ॥ चेत्
नस्थूलदेहस्यत्वं पीवेति प्रवादो विदां विदुषां न भवति किं तु मूढानां यतो यं प्रवादो राशौ भूतसंघे देहे नात्मनि ३६

भ्रातरिति॥ संबोधनं आद्विपाभिप्रायं व्यक्तं निश्चितं॥ उरु अधिकं परिश्रांतो ऽसीत्यादीनि विपरीतानि षड्वाक्या
नि ऊढिवान्॥ प्रापितवान्॥ तत्रापि सुचिरं जरसापि वृद्धत्वेन संघट्टिनः सहचराः॥ वक्रं यथा भवत्येवं विप्रलब्धो
पि वक्रोक्त्या उपहसितोपि तु धर्मी उवाहेत्यन्वयः॥ तूष्णीभावे हेतुः॥ अविद्यया रचितात् द्रव्यात् योयस्मिन् स्वं

अहो कष्टं भ्रातर्व्यक्तमुरु परिश्रांतोऽसि घर्ममध्वानमेकएव ऊढिवान्सुचिरं नाति पीवानसंहननं
गोजरसा वोपद्रुतो भवान् सुखेनो एवापूरणते संघट्टिनः॥ इति वक्रं विप्रलब्धोप्यविद्यमायाविहि
तद्रव्ये गुणकर्माश्रयस्त्वचरमकलेवरे वस्तुनि संस्थानविशेषे ऽहं ममेत्यनध्यारोपितमिथ्या
प्रत्ययोऽव्रत्स्तस्थी शिबिकां पूर्ववदुवाह॥ ६॥ अथ पुनः स्वशिबिकां विषमगतायां प्रकुपित
उवाच रहूगणः॥ ७॥ किमिदमरे त्वं जीवन्मृतो मां कदर्थीकृत्य भर्तृशासनमतिचरसि प्रमत्तस्य च
ते करोमि चिकित्सां दंडपाणिरिव जनताया यथा प्रकृतिं स्वां भजिष्यसे इति॥ ८॥

रमकलेवरेनाध्यारोपितो मिथ्याप्रत्ययो येन॥ तत्र द्रव्याणि भूतानि गुणाः इंद्रियाणि कर्माणि पुण्यपापा
नि॥ आशयो अंतःकरणं॥ पतः ब्रह्मभूतः॥ ६॥ ७॥ नामनो इत्यभर्तुः स्वामिनो मम शासनमाज्ञामतिक्रामसि
चिकित्सां शास्तिं दंडपाणिर्यमो यथा जनसमूहस्य शास्ति। करोति यथा स्वां प्रकृतिं अप्रमत्ततां॥ ८॥॥

भा० पं० यत्नं तत्कं प्रमत्तस्य तेच्चिकित्सां करोमि यथास्वां प्रकृतिं भजिष्यसइति तत्राह ॥ उन्मत्तादिवद्वर्तमानस्य वस्तुतःस्व
३१ संस्थां व्रजभावं गतस्य भवताकृतेन चिकित्सितेन दंडेन शिक्षितेन वा क्रियानर्थः ॥ उक्तस्यार्थार्थयोरसंभावात
यदि पुनरहं न मुक्तः ॥ किंतु प्रमत्तःस्तथ्य एव ॥ तथापि मम शिक्षादिकं पिष्टपेषणं व्यर्थमित्यर्थः ॥ न हि जडस्व
भावः शिक्षया पिपूर्ंकर्तुं शक्यतइति ॥ १४ ॥ अनुवादरूपया परिभाषया भाषणेन न तं प्रत्युत्तरं ददुचोत्तरं तं

उन्मत्तमत्तजडवत्स्वसंस्थां गतस्य मे वीर चिकित्सितेन ॥ अर्थः क्रिया भवता शिक्षितेन स्त
ब्ध प्रमत्तस्य च पिष्टपेषः ॥ १५ ॥ श्री शुक उवाच ॥ एतावदनुवादपरिभाषया प्रत्युदीर्य मुनिव
र उपशमशील उपरतानात्म्यनिमित्त उपभोगेन कर्मारब्धं व्यपनयन् राजयानमपि तथोवाह ॥
श्री १६ ॥ स चापि पांडवेय सिंधुसौवीरपतिस्तत्त्वजिज्ञासायां सम्यक्श्रद्धयाधिकृताधिकारस्तद्धृदयग्रं
थिविमोचनं द्विजवच आश्रुत्य बहुयोगग्रंथसमतत्त्वरयावरुह्य शिरसा पादमूलमुपसृतः क्षमा
पयन् विगतनृपदेवस्मय उवाच ॥ १६ ॥

नात्मप्रदेहात्मत्वे निमित्तमविद्यायस्य ॥ आरब्धफलं कर्मेदं पयन् ॥ १ ॥ प ॥ हे पांडवेय सम्यग्या श्रद्धा तत्त्व
जिज्ञासायां प्राप्तोधिकारो येन ॥ यथादर्शपूर्णमासाधिकृतस्यैव गोदोहनेन पशुकामस्याप्यः प्रणयेदिति
गुणफलसंबंधेप्यधिकारः ॥ एवं सात्त्विकश्रद्धायामधिकृतस्यैवास्यामधिकार इत्यर्थः ॥ बहुयोगग्रंथसम

ते हि जनस्य तद्वचः श्रुत्वा विगतोन्नपदेवाधिराज इ
ति गर्वायस्य ॥ १६ ॥

एतत्त्रपंचयतिस्थौल्यमिति ॥ कलिः कलहः ॥ अहंकारेणमदश्च देहेन सह तदभिमानेन जातस्य हि भ
वंति ममतु निरभिमानस्य न संति ॥ यद्वा ॥ देहे जातैर्योजातस्तस्यैवतानि मम कुतः अजातस्य न संति ॥ १० ॥
यद्येवं तर्हि जीवन्मुक्तोऽसीति तत्राप्याह ॥ जीवन्मुक्तत्वं न केवलं मम किंतु विकृतस्य सर्वस्य परिणामिनो दृष्टय
द्यस्माद्धि कृतं प्रतिदृत्तणमाद्यं तवतत् ॥ यदुक्तं भर्तुः शासनमतिचरसीति तत्राह ॥ स्वचस्वाम्यं वृत्तयोर्भावः स तो

स्थौल्यं कार्श्यं व्याधयश्चाधयश्च क्षुत्तृड्भयं कलिरिच्छा जरा च ॥ निद्रा रतिर्मन्युरहंमदः शुचो देहेन
जातस्य हि मे न संति ॥ ११ ॥ जीवन्मुक्तत्वं नियमेन राजत्वाद्यं तव द्याद्धि कृतस्य हृष्टं ॥ स्वस्वाम्यभावो ध्रु
व ईश यत्र तर्ह्युच्यते सौ विधिकृत्ययोगः ॥ १२ ॥ विशेषबुद्धेर्विवरं मनाक् च पश्याम यन्न व्यवहारतोऽन्य
त ॥ क ईश्वरस्तत्र किमीशितव्यं तथापि राजन्करवाम किं ते ॥ १३ ॥

सौधा॰ टी॰ नियमः ॥ हे ईश यत्र पक्षे ध्रुवः यदि व्यवस्थितः स्यादित्यर्थः ॥ तर्हि विधिः ॥ नियोगः ॥ कृत्यं कर्म तयोर्योगो ध्रुव उ
च्यते उचितो भवति ॥ उच समवाये इत्यस्माद्धातोः ॥ यदि तु तव राज्यभ्रंशो मम च राज्यं स्यात्तदा सर्वमेव विप
रीतं स्यादित्यर्थः ॥ १२ ॥ ननु यावद्राजाऽहं तावत्तव स्वामी भवाम्येवेति चेत्तत्राह ॥ विशेषो राज्यभृत्यादिभेदः स तु
बुद्धेः विवरमवकाशं व्यवहारादन्यत्र न पश्यामः मनाक् ईषदपि ॥ अथापि त्वेवायमभिमानश्चेत्तर्हि ब्रूहि

भा० पं० एवं तत्स्वरूपं पृष्ट्वा तदुक्तौ तत्र राज्ञाक्षिपति तत्र यदुक्तं मम श्रमो नास्तीति तत्राह ॥ दृष्ट इति ॥ आत्मनो भवतो
३८ भर्तुर्वोढुर्गन्तुश्च कर्मतः श्रमोऽस्ति इत्यनुमन्यते यद्वा ॥ आत्मनो मेऽनुमन्ये त्वं तु मिमे ॥ अनुमानं चैवं भवान्
भारवाहनादिना श्रान्तः कर्तृत्वात् यः कर्त्ता स श्राम्यति ॥ यथाहं क्षुधादिकर्त्तेति ॥ नन्विदं व्यवहारमात्रं न तु स
त्यं ॥ यदुक्तं व्यवहारतोऽन्यं न पश्यामीति ॥ व्यवहारमार्गः प्रपंचः समूलः सप्रमाणक एवेष्टः ॥ यथा यथा
वत् ॥ असत्ता घटादिना उदकानयनादेरभावात् ॥ एवं प्रयोगः प्रपंचः सत्यः ॥ अर्थक्रियाकारित्वात् ॥ यन्नु

दृष्टः श्रमः कर्मत आत्मनो वै भर्तुर्गन्तुर्भवतश्चानुमन्ये ॥ यथासतो दानयनाद्यभा
वात्समूल इष्टो व्यवहारमार्गः ॥ २२ ॥ स्थाल्यग्नितापात्पयसोऽभितापस्तत्तापतस्त
ण्डुलगर्भरन्धिः ॥ देहेन्द्रियास्वाशयसन्निकर्षात्तत्संसृतिः पुरुषस्यानुरोधात् ॥ २३ ॥

न सत्यः नासौ अर्थक्रियाकारी यथासिद्ध्या घटादिरिति ॥ २२ ॥ तदुक्तमुपाधिधर्माः स्थौल्यादयो मे न वस्तु
तः सन्तीति ॥ तत्र औपाधिकत्वेऽपि सत्यत्वं किं न स्यादित्याह ॥ स्थाल्यां अग्निना तापात् तन्मध्यवर्तिनः क्षीर
स्य तापः ॥ तस्य तापात् तण्डुलानां वहिर्भागस्य ॥ ततः ॥ तद्गर्भस्य च रंधिः पाकः ॥ न चात्र किंचिन्मिथ्या ॥ एवं देहादि
भिः संनिकर्षात् संबंधात् तन्निमित्ता संसृतिः पुरुषस्य ॥ असवः प्राणाः ॥ आशयो मनः ॥ अनुरोधात् उपाधिधर्मानुवर्त्तितः
तथाहि निदाघादिना देहे तप्ते इन्द्रियाणां तापः ॥ ततः प्राणस्य ततो मनस ततस्त्वेवं यथा यथमूह्यं ॥ २३ ॥ ३८

द्विजानां मध्ये कृतमः॥ यतः सूत्रमुपवीतं विभर्षि॥ यद्वा दत्तात्रेयादीनां मध्ये कतमोऽवधूतः॥ इहापि कस्मात्हेतोः
प्राप्तः नोऽस्माकं तेमाय्चेत्प्राप्तः॥ तर्हि भुक्तः कपिलो मुनिर्न भवति किंउ नेति वित्तके॥१७॥ किमनया चिंतयाशि
विकांताव द्दृहामीति चेदत्तत्राह॥ नाहमिति॥ वित्तपः कुबेरः॥१८॥ यस्माद्धशंशंके तस्मात्कस्त्वमित्यादि प्रश्नानामुत्तरं
कस्त्वं निगूढश्चरसि द्विजानां विभर्षि सूत्रं कतमोऽवधूतः॥ कस्यासि कुत्रत्य इहापि कस्मात् क्षेमाय नश्चेद्दसि नोतमुक्तः॥१७॥ नाहं विशंके सुरराजवज्रान्न त्र्यक्षशूलान्न यमस्य दंडात्॥ नाग्न्यर्कसोमा
निलवित्तपास्त्राच्छंके भृशं ब्रह्मकुलावमानात्॥१८॥ तद्ब्रूह्यसंगो जडवन्निगूढविज्ञानवीर्यो विचर
स्यपार॥ वचांसि योगग्रथितानि साधो न नः क्षमंते मनसापि भेत्तुं॥१९॥ अहं च योगेश्वरमात्मतत्त्व
विदां मुनीनां परमं गुरुं वै॥ प्रष्टुं प्रवृत्तः किमिहारणं तत्साक्षाद्धरिं ज्ञानकलावतीर्णम्॥२०॥ स वै भवा
ल्लोकनिरीक्षणार्थमव्यक्तलिंगो विचरत्यपि स्वित्॥ योगेश्वराणां गतिमंधबुद्धिः कथं विचक्षीत गृहानुबंधः॥२१॥
ब्रूहि॥ निगूढं पिहितं विज्ञानरूपं वीर्यप्रभावो येन॥ अपारः अनंतमहिमा तत्र हेतुः॥ नो मनसापि भेत्तुं न क्षमं शक्यं
किं भेत्तुमित्यपेक्षायामाह॥ वचांसीति॥ यद्वा॥ मनसा युक्ताः स्वक्त्वादृष्ट्योपि भेत्तुं न शक्नुवंतीत्यर्थः॥१९॥ स्वस्य
ज्ञार्थतां दर्शयति॥ अहं चेति॥ इह संसारे यत्तत्रारणं शरणं तत्किमिति प्रष्टुं प्रवृत्तोऽस्मि॥ ज्ञानशक्त्यावतीर्णं कपिलं सर

वमवान्॥२०॥ किंस्विद्देवं विचरसि गृहाविष्टः कथंवि
चक्षीत पप्रैयत॥२१॥

एकादशेऽथ संपृष्टो रहूगणमहीभृता ॥ तथा दिशात्परं ज्ञानं स योगीति निगद्यते ॥ अकोविदः अविद्वानपि त्वं कोविदा
नां वादान् उद्गाहानेव वदसि ॥ अथो अनः अत्यंतं विदुषां मध्ये श्रेष्ठो न भवति ॥ कुतः हि यस्मात् यस्वामिभर्त्रेत्यादि लौकि
कव्यवहारं त्वं सत्यमात्थ एवं सूरयस्तत्त्वविचारेण सहन वदंति किंत्वविचारसुंदरं वदंति अतो न सत्यः ॥१॥ वैदिको
पिकमेव व्यवहारो न सत्य इत्याह ॥ यथैवेति उरवो गार्हगृहसंबंधिनो मेधाय ज्ञास्तेषां वितानो विस्तारः ॥ तद्विषया

ब्राह्मण उवाच ॥ अकोविदः कोविदवादवादान्वदस्यथो नातिविदां वरिष्ठः ॥ न सूरयो हि व्यवहारमेतं
तत्त्वावमर्शेन सहामनंति ॥१॥ तथैव राजन्नुरुगार्हमेधवितानविद्योरुविजृंभितेषु ॥ न वेदवादेषु
हि तत्त्ववादः प्रायेण शुद्धो नु चकास्ति साधुः ॥२॥ न तस्य तत्त्वग्रहणाय साक्षाद्वरीयसीरपि वाचः
समासन् ॥ स्वप्ने निरुक्त्या गृहमेधिसौख्यं न यस्य हेयानुमितं स्वयं स्यात् ॥३॥ ॥ ॥ ऽऽ ॥ ॥

सु विद्यासु उरुः अधिकं विजृंभितेषु विलसितेषु वेदवादेषु तत्त्ववादः उ निश्चितं न च कास्ति न प्रकाशते त
था च श्रुतिः ॥ नेह नानास्ति किंचनेत्यादि ॥ शुद्धो हि ॥ सादिरहितः अन्यः साधुः रागादिशून्यश्च प्रायेणेति ईश्वरा
र्पितकर्मणां परमार्थफलत्वाभिप्रायेणोक्तं ॥२॥ ननु श्रुतवेदांतस्यापि पुंसः कर्मसु प्रवृत्तेः कथमसत्यता
तत्राह ॥ नेति ॥ साक्षाद्धयावत्तत्त्वज्ञानाय वरीयस्यो पि वेदांतवाचस्तस्य न सम्यगासन् न बभूवुः ॥ स्वप्ने या निरुक्तिः स

यास्वप्नदृष्टांतेनदृश्यत्वादिहेतुना स्वयमेव हेयं त्वे
नानुमितं यस्य न स्यात् ॥२॥

तदुक्तंस्वस्वाम्यभावोध्रुवइतितत्राह॥शास्तेति अध्रुवत्वेपियदायो नृपतिःसःप्रजानांशास्तागोप्ता च॥यच्चोक्तं॥स्तब्धा
देःशिक्षापिपिष्टपेषइति तत्राह॥योऽच्युतस्यकिंकरःसपिष्टंनपिनष्टि निःफलंनकरोति स्तब्धत्वादनपगमेपिशास्त
रिईश्वराज्ञासंपादनेनैवसफलत्वात्तदाह॥स्वधर्मरूपमच्युताराधनंकुर्वन्यस्मादघौघंजहाति॥२४॥यस्मादेवंम
मत्वदुक्तंविपरीतंप्रतिभाति॥तत्तस्मान्नरदेवाभिमानमदेनतुच्छीकृताःतिरस्कृताःसत्तमाभवादृशायेनतस्यमेमे
शा२
शास्ताभिगोप्तानृपतिःप्रजानांयःकिंकरोनापिपिनष्टिपिष्टं॥स्वधर्ममाराधनमच्युतस्ययदीहमानो
विजहात्यघौघं॥२४॥तन्मेभवान्नरदेवाभिमानमदेनतुच्छीकृतसत्तमस्य॥कृषीष्टमैत्रीदृशमार्तबंधोयथा
तरेसदवध्यानमंहः॥२५॥नविक्रियाविश्वसुहृत्सखस्यसाम्येनवीताभिमतेस्तवापि॥महद्विमानात्स्व
कृताद्धिमादृङ्नंक्ष्यत्यदूरादपिशूलपाणिः॥२६॥इतिश्रीमद्भागवतेमहापुराणेपंचमस्कंधेश्री
जडभरतरहूगणसंवादेदशमोध्यायः॥१०॥
श्रीदृशंस्नेहयुक्तांदृष्टिंकृषीष्टकरोतुसत्तामवज्ञारूपंपापंयथातरिष्यामि॥२५॥ननुममावज्ञाकृतविकाराभावा
त्कुतःपापंतत्राह॥नेति यद्यपितवविक्रियानास्ति॥विश्वस्यसुहृच्चासौसखाचतस्य॥अतःसर्वेषुसाम्येनस्वदेहेवि
गताभिमानस्यतथामहतामवमानात्मादृशोविनंक्ष्यति॥अदूरात्स्वस्तिप्र॥शूलपाणिरिवातिसमर्थोपीत्यर्थः॥२६॥
इतिपंचमेदशमः॥१०॥ः०ः॥

भा० पं०
८०

फलं च तदनुरूपं करोतीत्याह। दुःखं सुखं। व्यतिरिक्तं च मोहं तां तीव्रं दुर्निवारं कालतः प्राप्तं फलं सर्वतोभिव्यनक्ति संजनयति तत्राह। स्वदेहिनमालिंग्य आलिंगनेकारणमाह। मायया रचितं अंतरात्मा जीवोपाधिः। उपाधितामाह संसृतिचक्रे कूटयति छलयति तथा। यथा ग्रामकूटकः इति॥ एवमयं मनोनिबंधनः संसारो जीवे फलतीत्याह। तावानिति। आविःप्रकाशमानः। सदा क्षेत्रज्ञस्य साक्ष्यः दृश्यो भवति। स्थूलसूक्ष्मः जाग्रत्स्वप्नस्वरूपः॥ म

दुःखं सुखं व्यतिरिक्तं च तीव्रं कालोपपन्नं फलमाव्यनक्ति। आलिंग्य मायारचितांतरात्मा स्वदेहिनं संसृतिचक्रकूटः॥ ॥ तावानयं व्यवहारः सदाविः क्षेत्रज्ञसाक्ष्यो भवति स्थूलसूक्ष्मः॥ तस्मान्मनो लिंगमदो वदंति गुणागुणत्वस्य परावरस्य॥ ७॥ गुणानुरक्तं व्यसनाय जंतोः क्षेमाय नैर्गुण्यमथो मनः स्यात्॥ यथा प्रदीपो घृतवर्तिमश्नन् शिखाः सधूमा भजति ह्यन्यदा स्वम्॥ ८॥ ॥ ॥८८॥

नसः संसारहेतुत्वमुपसंहरन्मोक्षस्यापि तदेव कारणमित्याह। तस्मादिति। अदो मनः लिंगं कारणं गुणत्वं गुणाभिमानित्वं तद्‌ज्ञाहित्यं तदेव परमवरं च तस्य॥ कथमेकमेव विलक्षणयोः कारणं अवस्थाभेदादित्याह। गुणेति। नैर्गुण्यं निर्गुणं श्रेयो इति। कास्तेन दृष्टांतेन स्फुटयति। यथेति। अन्यदा तु घृतक्षये स्वं पदं मुख्यम्। स्वरस्वरूपं महाभूतात्तत्त्वं वा॥

एवंप्रपंचस्यसत्यत्वंतदुक्तंनिराकृत्यसंसारस्यापितदुक्तंसत्यत्वंनिराकर्त्तुंतस्यमनोनिमित्तत्वमाह॥यावदित्या
दिनायावत्समाप्तिः मनोयावद्रजआदिभिर्गुणैरनुरुद्धवशीकृतंभवतितावन्मनोनिरंकुशंसत्पुरुषस्यकुशलंधं
र्ममितरमधर्मंवाआतनोतिकैःश्चेतोभिः॥ज्ञानेंद्रियैः॥आकृतिभिःकर्मेंद्रियैश्च॥धं॥तत्रश्चधर्माधर्मवासनायुक्तंतदेवा
नेकदेहादिवैचित्र्यंकरोतीत्याहसइति॥पुंस्त्वमात्मविशेषणंत्वेनतन्मनइत्यर्थः॥वासनायुक्तः॥आत्मोपाधित्वा

यावन्मनोरजसापूरुषस्यसत्त्वेनवातमसावानुरुद्धं॥चेतोभिराकूतिभिरातनोति
निरंकुशंकुशलंचेतरंवा॥धं॥सवासनात्माविषयोपरक्तोगुणप्रवाहोविकृतःषो
डशात्मा॥विभ्रत्पृथग्नामभिरूपभेदमंतर्वहिष्ट्वंचपुरैस्तनोति॥ ५॥ ॥ ॥६६॥

दात्मा॥आत्मोविषयैरुपरक्तोनुविद्धः॥अतोगुणप्रवाहःगुणैरितस्ततश्चाल्यमानः॥अतएवविकृतः॥कामादि
परिणामवान्॥षोडशात्मा॥षोडशकलासुभूतेंद्रियरूपासुमुख्यः॥पृथङ्नामभिःसहपृथग्रूपभेदंदे
वतिर्यगादिरूपंविभ्रत्॥अंतर्वहिष्ट्वंउत्कृष्टत्वंनिकृष्टत्वंचपुरैस्तैर्देवदेहैःहेतुभूतैःतनोति॥नामभिरि
रित्यत्ररेफलोपेदीर्घीभावआर्षः॥ ५॥ राम राम॥

भा० पं०
५१

प्रथमं शतशः ततः सहस्रशः ततः कोटिशः स्युः । न तु मिथः स्युः किं तु तत्र ज्ञतः परमेश्वरात् । तस्य चानंतशक्तित्वाद्
अनंताः स्युरित्यर्थः ॥ यद्वा ॥ तासां मिथ्यात्वमनेनोच्यते कोटिशो भवंति अतस्ताः क्षेत्रज्ञत एव स्युः । तत्सत्तयैव सत्तां भे
रन् न तु मिथो न स्वतः इति ॥ यद्वा क्षेत्रज्ञो जीवस्तस्मान्न स्युः । तस्याविकारित्वात् न मिथः । इतरेतराश्रयापत्तेः अतो
मिथ्याभूता एवेति ॥ ११ ॥ तदेवं श्लोकत्रयेण गुणकर्मानुबद्धं मनोवृत्तीः अयत इति यदुक्तं तत्प्रपंचितं । अन्यं अन्यदा
नत्वमश्नुत इति यदुक्तं ॥ तदेव तत्त्वमाह ॥ क्षेत्रज्ञ इति जीवस्य जीवोपाधेः ॥ अविशुद्धकर्तुर्मनसः नित्याः आह रूपेणाव

सहस्रशः शतशः कोटिशश्च क्षेत्रज्ञतो न मिथो न स्वतः स्युः ॥ ११ ॥ क्षेत्रज्ञ एता मनसो विभूतीर्जीवस्य माया
रचितस्य नित्याः । आविर्हिताः क्वापि तिरोहिताश्च शुद्धो विचष्टे ह्यविशुद्धकर्तुः ॥ १२ ॥ क्षेत्रज्ञ आत्मा पुरुषः
पुराणः साक्षात्स्वयंज्योतिरजः परेशः ॥ नारायणो भगवान्वासुदेवः स्वमाययात्मन्यवधीयमानः ॥ १३ ॥

छिन्नाः जाग्रत्स्वप्नयोराविर्भूताः पश्यति क्वापि सुषुप्तौ तिरोहिताः पश्यति ॥ अस्यायं साक्षी क्षेत्रज्ञ आत्मा तत्त्वमित्यर्थः
॥ १२ ॥ क्षेत्रज्ञो द्विविधः त्वंपदार्थो जीवः । तत्पदार्थ ईश्वरश्च ॥ तत्राद्यो निरूपितः । इदानीं तत्रापि परमीश्वरं निरूपयति । क्षे
त्रज्ञ आत्मा व्यापी पुराणो जगत्कारणभूतः पुरुषः पूर्णः साक्षादपरोक्षः स च स्वयंज्योतिः न तु ज्ञानस्य विषयत्वेन वा
परेशः ॥ अजो जन्मादिशून्यः परेषां ब्रह्मादीनामपीश्वरः ॥ नारं जीवसमूहः स अयनं यस्य भगवान् ऐश्वर्यादिषड्गु
णवान् ॥ वासुदेवः सर्वभूतानामाश्रयः । स्वाधीनया मायया आत्मनि जीवेऽवधीयमानः ॥ आवेश्यमानः कर्म

कर्तरि प्रयोगः । तन्नियंतृत्वेन कर्तृत्वमाह इत्यर्थः ॥ १३ ॥

५१

अन्यत्र अन्यदा वृत्तीर्दर्शयंति ॥ एकादश वृत्तयश्चासन् ॥ आकूतयः क्रियाकाराः पंच धियश्च ज्ञानकाराः पंच अ
भिमानश्चेति ॥ ९ ॥ हे वीर भूमीर्विषयानेवाह ॥ गंधादयः पंच ज्ञानेंद्रियद्वारा धीवृत्तीनां विषयाः ॥ आकृतिः रूपं श्र
वः शब्दः ॥ विसर्गादयः पंच कर्मेंद्रियद्वारा कर्माकारवृत्तीनां विषयाः ॥ रतिः संभोगः ॥ अर्त्तिर्गतिः ॥ अभिजल्पः ॥ वार्त्ता शिल्पाः
वस्तुकरणे प्राविण्यता ॥ १० ॥ पुरुषस्याभिमानप्रकारमाह ॥ एकादशं पुरं ॥ स्वीक्रियत इति स्वीकरणं ॥ अयमर्थः ॥ शरी

पदं तथा गुणकर्मानुबद्धं वृत्तीर्मनः श्रयतेऽन्यत्र तत्त्वं ॥ एकादशासन्मनसो हि वृत्तय आकूतयः पंच धि
योऽभिमानः ॥ ९ ॥ मात्राणि कर्माणि पुरं च तासां वदंति हैकादश वीर भूमीः ॥ गंधाकृतिः स्पर्शरसश्रवांसि
विसर्गरत्यर्त्यभिजल्पशिल्पाः ॥ १० ॥ एकादशं स्वीकरणं ममेति शय्यामहं द्वादशमेक आहुः ॥ द्रव्यस्व
भावाशयकर्मकालैरेकादशामी मनसो विकाराः ॥ ११ ॥

रमभिमानस्य न ज्ञेयतया गंधादिवत् विषयः ॥ नापि
कार्यतया विसर्गादिवत् ॥ किंतु ममेति भोगाय तत्त्वेन स्वीकार्यतया विषय इति ॥ एके तु विवेकिनामेव पुरं
ममत्वाभिमानविषयः ॥ न तु मूढानां ॥ अतो मूढदृष्ट्या अहंकारो द्वादशं वृत्त्यंतरमाहुः ॥ तस्य च पुरमेव शय्या
संज्ञं द्वादशविषयमाहुः ॥ तत्र हि जीवोऽहंकारेण शेते ॥ यतः पुरि शयनात्पुरुष इत्युच्यते ॥ तासां वृत्तीनामवांतरभेदै
रानंत्यमाह ॥ द्रव्याणि विषयाः स्वभावः परिणामहेतुः ॥ आशयः संस्कारः कर्म अदृष्टं ॥ कालः क्षोभकस्ते निमित्तभू

श्रीः ॥ ९९ ॥

द्वादशे पुनरापृष्टः संदेहेन महीभृता ॥ सयोगी सर्वसंदेहान पानुदद् तीर्थ्यते कारणमीश्वरस्तस्यैव लोकसं
रक्षणार्थे विग्रहो यस्य ॥ स्वरूपेण परमानंदप्रकाशेन तुच्छीकृतो विग्रहो येन हे अवधूत योगेश्वर ॥ द्विजवंधो
लिंगेन वेषेण नि ॥ गूढो नित्यानुभवो येन तस्मै नमः ॥ १ ॥ विशेषतः प्रष्टुं तद्वाक्यमभिनंदति ॥ ज्वर एवामयो रोग
स्तेनार्त्तस्य ॥ यथा सत्स्वादु अगदमौषधं ॥ यथा च निदाघेन दग्धस्य संतप्तस्य हिमांभः शीतलमुदकं गंगोदकं

इह्रग तउवा चा ॥ नमो नमः कारणविग्रहाय स्वरूपतुच्छीकृत विग्रहाय ॥ नमो वधूत द्विजवंधु लिंगनि
गूढनित्यानुभवाय तुभ्यं ॥ १ ॥ ज्वरामयार्त्तस्य यथागदं सन्निदाघदग्धस्य यथा हिमांभः ॥ कुदेहमा
नाहिविदष्टदृष्टे ब्रह्मंश्च वचस्तेमृतमौषधं मे ॥ २ ॥ तेसाद्भुवंतं मम संशयार्थ प्रछामि पश्चादधुना
सुवोधं ॥ अध्यात्मयोगग्रथितं तवोक्तमाख्याहि कौतूहलचेतसो मे ॥ ३ ॥

वा ॥ तथा हे ब्रह्मन् कुत्सिते देहे ॥ यो मानः ॥ अहंकारः ॥ स एव अहिः ॥ तेन विशेषेण दष्टात् दृष्टिर्विवेकलक्ष
णा यस्य तस्य मे तव वेदं वचः ॥ अमृततुल्यमौषधं ॥ २ ॥ मम संशयविषयमर्थं पश्चात्प्रछामि ॥ अधुना ता
वत्त्वदुक्तं वचः ॥ अध्यात्मयोगेन ग्रथितं दुर्वोधं सुवोधं यथा भवत्येवं व्याख्याहि ॥ कौतूहलयुक्तं चेतो
यस्य मम ॥ ३ ॥

वि

एतत्सदृष्टांतमाह ॥ यथेति ॥ आत्मस्वरूपेण प्राणरूपेण ईशेत नियममति ॥ इदं च ॥१४॥ तदेवमात्मनः सुदृढं संसार
स्य च मिथ्यात्वं प्रदर्श्य तन्निवृत्तिमाह ॥ तनुभृत देही वयुनोदयेन ज्ञानोत्पत्त्या यावत् मायां विधूय त्यक्त्वा तत्त्वं न वे
द तावदिह भ्रमति ॥१६॥ यावच्च विषयानुरक्तं मन एवानर्थहेतुरिति न वेद ॥ तावन्निर्वेदाभावात् परिभ्रमत्येवेत्याह ॥ नेति
आत्मनो लिंगमुपाधिभूतं मनः संसारतापानामावपनं क्षेत्रं यावन्न वेद तावद्भ्रमतीत्यनुषंगः ॥ तापावपनत्वे हेतुः

यथानिल स्थावरजंगमानामात्मस्वरूपेण निविष्ट ईशेत ॥ एवं परो भगवान् वासुदेवः क्षेत्रज्ञ आत्मेद
मनुप्रविष्टः ॥१५॥ न यावदेतां तनुभृन्नरेंद्र विधूय मायां वयुनोदयेन ॥ विमुक्तसंगो जितषट्सपत्नो
वेदात्मतत्त्वं भ्रमतीह तावत् ॥१६॥ न यावदेतन्मन आत्मलिंगं संसारतापावपनं जनस्य ॥ यच्छोकमो
हामयरागलोभवैरानुबंधं ममतां विधत्ते ॥१७॥ भ्रातृव्यमेनं तददभ्रवीर्यमुपेक्षयाध्येधितमप्रम
त्तः ॥ गुरोर्हरेश्चरणोपासनास्त्रो जहि व्यलीकं स्वयमात्ममोषम् ॥१८॥ इति श्रीमद्भागवते महापुराणे पंचम
स्कंधे ब्राह्मणरहूगणसंवादे एकादशोऽध्यायः ॥ ११ ॥

यन्मनः शोकाद्यनुबंधं ममतां च विधत्ते ॥१७॥ तस्माद्भ्रातृव्यं शत्रुं अध्येधितं संप्रवृद्धं ॥ स्वयं व्यलीकमिथ्याभू
तं ॥ तथाप्यात्मानं मुष्णातीति तथा तं ॥ गुरुरेव हरिस्तस्य चरणोपासनमेवास्त्रं यस्य तथाभूतः सन् जहि घात

शोच्यान्विष्ट्यानिगृह्णन्निरनुग्रहः कृपोवर्त्तसे॥ अन्तोमिधेयोवगोप्त्रास्मीति श्लाघ्यमानो महत्तां सभासु न शोभसे यतो धृष्टः॥७
न चोत्तरोत्तरावयवभारः पूर्वपूर्वावयवानां भवेदिति भावः॥ तेषामपि अनिरूपणादित्याशयेनाह यदेति निष्ठां नाशं
प्रभवमुत्पत्तिं विदाम विद्मः॥ तत्तदाक्षितेरन्यस्य विकारस्याभावात् नाममात्रादन्यत् व्यवहारस्य मूलं कारणं अ
र्थक्रियया सदिति अनुमेयं निरूप्यतां॥ तथाच श्रुतिः॥ वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति॥ य
तर्हि क्षितेः सत्यतास्यात्तत्राह॥ एवं क्षितिशब्दस्यापि ऋतं वर्त्तनं अर्थं विनैव निरुक्तं॥ यद्वा॥ क्षितिशब्दस्य वर्त्तनं य

शोच्यानिमांस्त्वमधिकष्टदीनान्विष्ट्यानिगृह्णन्निरनुग्रहोसि॥ जनस्य गोप्तास्मि विकत्थमानो न शो
भसे वृद्धसभासु धृष्टः॥७॥ यदाक्षितावेव चराचरस्य विदाम निष्ठां प्रभवं च नित्यं॥ तन्नामतोन्यद्व्य
वहारमूलं निरूप्यतां सत्क्रिययानुमेयं॥८॥ एवं निरुक्तं क्षितिशब्दवृत्तमसन्निधानात्परमाणवो ये
अविद्यया मनसा कल्पितास्ते येषां समूहेन कृतो विशेषः॥९॥

स्मिन् तदपि मिथ्यात्वेन निरुक्तमित्यर्थः॥ कुतः॥ अस्य सत्सु सूक्ष्मेषु परमाणुषु स्वकारणभूतेषु निधानात् ल
यात्॥ अतः परमाणुव्यतिरेकेण क्षितिर्नास्तीत्यर्थः॥ परमाणवस्तर्हि सत्याः स्युस्तत्राह ते मनसा कार्यानुपपत्त्या
वादिभिः कल्पिताः कल्पनाबीजमाह॥ येषां समूहेन विशेषः कृतः तेषां समूहः॥ पृथिवी कुम्भोलंवनमित्यर्थः
अवयविनो निरस्तत्वात्समूहग्रहणं॥ तथापि सत्याः स्युः॥ न अविद्यया प्रपंचस्य भगवन्मायाविलसितत्वादज्ञा

त्वयोदितं व्यक्रमविप्रलब्धमित्यादिनादिक्रियाचतत्फलंचश्रमादिप्रत्यक्षादिभिर्दृश्यमानंसत्॥ अबाधितम
पिव्यवहारमात्रमूलं॥ यद्वा॥ सतः॥ अबाधितव्यवहारस्यमूलंकारणमपि॥ नह्यंजसातत्त्वविमर्शनायत्तममिति
भवान्यदाह॥ अमुष्मिन्नर्थेममनोभ्रमति॥ ४॥ अबाधितत्वमसिद्धमित्याह॥ हेपार्थिव॥ यःपार्थिवोविकारःस
एवकस्यहेतोः॥ कस्मात्किंकारणात्पृथिव्यांचलन्नयंभारवाहकादिर्जनोनामप्रसिद्धः॥ पुरस्तुनचलतिसपाषाण

यदाहयोगेश्वरदृश्यमानंक्रियाफलंसद्व्यवहारमूलं॥ नह्यंजसातत्त्वविमर्शनायभवानमुष्मिन्भ्र
मतेमनोमे॥ ४॥ ब्राह्मण उवाच॥ अयंजनोनामचलन्पृथिव्यांयःपार्थिवःपार्थिवकस्यहेतोः॥ तस्यापि
चांघ्र्योरधिगुल्फजंघाजानूरुमध्योरशिरोधरांसाः॥ ५॥ अंसेधिदार्वीशिबिकाचयस्यांसौवीरराजेत्य
पदेशआस्ते॥ यस्मिन्भवान्रूढनिजाभिमानोराजास्मिसिंधुष्वितिदुर्मदांधः॥ ६॥

दिरित्येतावानेवभेदः॥ तस्यचजडत्वान्नभारःश्रमश्च॥ किंच॥ भवेदेवंयदिश्रमस्याश्रयोनिरूप्येत॥ नत्वेतदस्ति अ
वयवव्यतिरेकेणश्रमास्पदस्यावयविनोनिरूपणादित्याशयेनाह॥ तस्यापिपृथिवीविकारस्यापि॥ अंघ्र्योः॥ अधिउ
पर्युपरिगुल्फादयः उरसःसल्लोपआर्षः॥ ५॥ शिबिकायामप्यवयवीनास्तित्वय्यपिनास्तीत्याह॥ सौवीररा
जेइत्यपदेशोनाममात्रंयस्यसपार्थिवोविकारआस्ते॥ राजेतिसंधिरार्षः यस्मिन्भवान्रूढात्माभिमानःसिं

विषयसंगस्तु योगभ्रंस इति वदन् कस्त्वं निगूढश्चरसीति प्रश्नस्योत्तरमाह ॥ अहमिति द्वाभ्यां ॥ संगनिमित्तो बंधो
येन हेतोरर्थप्रयोजनं यस्य ॥१४॥ श्रीकृस्नार्चनेन प्रभवमप्युद्भव इति इत्याह ॥ जनसंगात् विशंकमानः ॥ अविवृतः ॥ अ
प्रकटः ॥१५॥ असंगो महद्भिः यः सुसंगः तेन जातं ज्ञानमेवासिस्तेन छिन्नो मोहः स न ॥ अध्वनः संसारमार्गस्यातिप्र
यितं श्रेष्ठं पारं हरिं याति ॥ यद्वा पारमति अतिक्रम्य हरिं याति ॥ अतिक्रमणमेवेति कर्मप्रवर्तनीयत्वात् द्वितीया तस्य हरे

अहं पुरा भरतो नाम राजा विमुक्तदृष्टश्रुतसंगबंधः ॥ आराधनं भगवत ईहमानो मृगोऽभवं मृगसंगाद्धतार्थः ॥१४॥
सा मां स्मृतिर्मृगदेहेऽपि वीर कृस्नार्चनप्रभवा नो जहाति ॥ अथो अहं जनसंगादसंगो विशंकमानो निवृतश्च
रामि ॥१५॥ तस्मान्नरोऽसंगसुसंगजातज्ञानासिनेहैव विवृक्णमोहः ॥ हरिं तदीहाकथनश्रुतिभ्यां लब्धस्मृ
तिर्यात्यतिपारमध्वनः ॥१६॥ इति श्रीमद्भागवते पंचमस्कंधे रहूगणसंवादे द्वादशोऽध्यायः ॥१२॥ श्रीब्राह्म
ण उवाच ॥ दुरत्ययेऽध्वन्यजयानिवेशितो रजस्तमःसत्वविभक्तकर्मदृक् ॥ स एष सार्थोऽर्थपरः परिभ्रमन् भवा
टवीं याति न शर्म विंदति ॥१॥

ईहानां कथनश्रुतिभ्यां लब्धा स्मृतिर्येन सः ॥१६॥ इति पंचमे द्वादशः ॥१२॥ त्रयोदशे चिरन्तायरघात त्वनिरूपणं ॥ इ
ति वैराग्यपद्यात् ध्रीयं भवाटवी प्रवर्ण्यते ॥ अध्वनः पारमित्युक्तं ॥ तदेवोध्वानं प्रसिद्धमार्गरूपकेणवैराग्याय प्रपंचयति ॥ दुर
त्यये दुस्तरेऽध्वनि प्रवृत्तिमार्गे रजस्तमःसत्वैर्विभक्तानि कर्माणि कार्याणि यया दृष्टि तया ॥ स एषः प्रसिद्धः सा
र्थो जीवसमूहः ॥ अर्थपरः सुखार्थी सन् यथा वणिक्सार्थोऽर्थार्जनाय गच्छन्नटवीं याति तद्वत् ॥१

एवमन्यदपि कृशत्वादिधर्मकं बुद्ध्या प्रतीतं द्वितीयं द्वैतं द्रव्यादिनाम्नाउपलक्षितया अजया मायया कृतमवेहि ॥ तत्र हे
प्रांशु स्थूलं तत्र तिर्योगि ॥ अणुर्वृहत्तोः पृथग्गुपादानात् ॥ असत्कार्यं सत्कारणं जीवं चेतनं अजीवं जडं ॥ १० ॥ त
र्हि किं सत्यं तत्राह ॥ ज्ञानं सत्यं व्यावहारिकसत्यत्वं व्यावर्तयति ॥ परमार्थं वृत्तिज्ञानव्यवच्छेदार्थानि षट् विशेष
णानि विशुद्धं तत्वाविद्यकं एकं तत्तु नानारूपं ॥ अनंतरं त्वबहिः ॥ बाह्याभ्यंतरशून्यं ॥ तत्तु विपरीतं ब्रह्म परिपूर्णं त

एवं कृशं स्थूलमणुर्बृहद्यदसच्च सज्जीवमजीवमन्यत् ॥ द्रव्यस्वभावाशयकालकर्मनाम्नाजयावे
हि कृतं द्वितीयं ॥ १० ॥ ज्ञानं विशुद्धं परमार्थमेकमनंतरं त्वबहिर्ब्रह्म सत्यं ॥ प्रत्यक्प्रशांतं भगवच्छब्दसं
ज्ञं यद्वासुदेवं कवयो वदंति ॥ ११ ॥ रहूगणैतत्तपसा न याति न चेज्यया निर्वपणाद्गृहाद्वा ॥ न छंदसा नैव
जलाग्निसूर्यैर्विना महत्पादरजोभिषेकं ॥ १२ ॥ यत्रोत्तमश्लोकगुणानुवादः प्रस्तूयते ग्राम्यकथाविघातः ॥
निषेव्यमाणोनुदिनं मुमुक्षोर्मतिं सतीं यच्छति वासुदेवे ॥ १३ ॥

तु परिच्छिन्नं ॥ प्रत्यक् ॥ तत्तु विषयाकारं प्रशांतं निर्विकारं तत्तु सविकारं तदेवं स्वरूपज्ञानं सत्यमित्युक्तं ॥ कीदृशं त
त् ऐश्वर्यादिषड्गुणत्वेन भगवच्छब्दः संज्ञा यस्य ॥ यच्च ज्ञानं वासुदेवं वदंति ॥ ११ ॥ एतत्प्राप्तिस्तु महत्सेवां विना न भवतीत्या
ह ॥ हे रहूगण एतज्ज्ञानं तपसा पुरुषो न याति ॥ इज्यया वैदिककर्मणा निर्वपणात् ॥ अन्नादिसंविभागेन गृहाद्वा ॥ त
न्निमित्तपरोपकारेण छंदसा वेदाभ्यासेन जलाग्न्यादिभिरुपासितैः ॥ १२ ॥ महत्सेवा यासात्तत्राप्युपायत्वमाह य
त्र येषु महत्सु ग्राम्यकथानां विघातो यस्मात् ॥ १३ ॥

भा० पं०
६५

अदृश्यानां झिल्लीनां भृंगादिसंज्ञानां कीटविशेषाणां स्वनैः कर्णयोः शूलो व्यथा यस्य ॥ उलूकास्तेषां वाग्भिः व्यथितो
ऽन्तरात्मा मनो यस्य ॥ अत्र च परोक्षमप्रियं वक्तारो झिल्लीतुल्याः प्रत्यक्षमप्रियवक्तारो धूमतुल्याः येषां छाया पिपापहेतु
तेऽपुण्यवृक्षाः तत्तुल्या न धार्मिकान्सेवते ॥ मरीचितोयानीति निःफलत्वेन विज्ञातानपि विषयान् ॥ ५ ॥ वितोयाः स
रितस्तु पतितस्य गात्रभंगात्स्वयोदुःखं भवति न चोदकलाभः ॥ तद्वदिह च परत्र च दुःखदान् पाखंडानभियाति

अदृश्यझिल्लीस्वनकर्णशूल उलूकवाग्भिर्व्यथितान्तरात्मा ॥ अपुण्यवृक्षान्श्रयते क्षुधार्दितो म
रीचितोयान्यभिधावति क्वचित् ॥ ५ ॥ क्वचिद्वितोयाः सरितोभियाति परस्परं चालषते निरंधः ॥ आसाद्य
दावं क्वचिदग्नितप्तो निर्विद्यते क्व च यक्षैर्हृतासुः ॥ ६ ॥ शूरैर्हृतस्वः क्व च निर्विण्णचेताः शोचन्विमुह्यन्नु
पयाति कश्मलं ॥ क्वचिच्च गंधर्वपुरं प्रविष्टः प्रमोदते निर्वृतवन्मुहूर्त्तं ॥ ७ ॥

आलषते छायादादिभ्यः ॥ अन्नादिवांछं ॥ उभयत्रापि स एवार्थः ॥ दावं दावाग्नितुल्यं दुःखदं गृहं प्राप्य शो
काग्निना तप्तो निर्विद्यते विषीदति तत्र च यक्षराजस्तुल्यैः राजभिर्हृतं अस्तु वत्प्रेष्ठधनं यस्य स निर्विद्यते ॥ ६ ॥
अन्यैश्च शूरैर्हृतं स्वं वित्तं यस्य निर्विण्णं विफलं चेतो यस्य ॥ कश्मलं मूर्छां ॥ गंधर्वपुरमिव मनोरथोपगतपित्र
पुत्रादिसमाजं प्रविष्टः सन् ॥ ७ ॥

लर
६५

अस्याध्यायस्य व्याख्यानरूपः उत्तराध्यायेऽस्ति ॥ तथापि सुखप्रतिपत्तये किंचिद्व्याख्यायते ॥ यस्यां भवाटव्यां इमे इंद्रियना
मानः षट् दस्यवः चौराः कुत्सितो नायकः सारथिर्बुद्धिर्यस्य तं सार्थं विलुंपंति ॥ तस्य धर्मं धनमनुपयोगेन मुष्णंतीत्यर्थः ॥
गोमायव ॥ शृगालकुल्याः दारापत्यादयः ॥ चेमे भर्त्रा पितेत्येवं प्रविश्य प्रमत्तं सार्थिकं सार्थीस्थितं हरंति इतस्ततश्चा
कर्षंतीति उरणं मेषं ॥ २ ॥ वीरुधो लताः तृणानि च गुल्मानि च लतादिजालानि प्रच्छन्नैः गह्वरे दुःप्रवेशक्षेत्रे ॥ कठोरैस्तीव्रैर्दंशैर्म
क्षिकाविशेषैः मशकैश्च यथा कश्चित् दुपद्रुतो भवति ॥ एवं कामकर्मादिभिर्गह्वरे गृहाश्रमे वर्त्तमानो दुर्जनैरुपद्रुतो भ

यस्यामिमे षण्नरदेव दस्यवः सार्थं विलुंपंति कुनायकं बलात् ॥ गोमायवो यत्र हरंति सार्थिकं प्रमत्तमावि
श्य यथोरणं वृकाः ॥ २ ॥ प्रभूतवीरुत्तृणगुल्मगह्वरे कठोरदंशैर्मशकैरुपद्रुतः ॥ क्वचित्तु गंधर्वपुरं प्रपश्यति
क्वचित्क्वचिच्चाशुरयोल्मुकग्रहं ॥ ३ ॥ निवासतोयद्रविणात्मबुद्धिस्ततस्ततो धावति भो अटव्यां ॥ क्वचिच्च वात्योत्थि
तपांसुधूम्रा दिशो न जानाति रजःस्वलाक्षः ॥ ४ ॥

वतीत्यर्थः ॥ गंधर्वपुरवद्घटमानमेव देहादिकं प्रकर्षेण सत्यमेवेद
मिति पश्यति ॥ क्वचित्क्वचित्क्वापि आशुरयः ग्रहः पिशाचः तत्तुल्यं सुवर्णमुपादेयत्वेन प्रपश्यतीत्यर्थः ॥ ३ ॥ निवासादिष्वा
त्मास्वभावो यस्याः सा बुद्धिर्यस्य सः ॥ ततस्ततो धावतीत्युभयत्र तावानेवार्थः ॥ वात्या चक्रवातः ॥ तस्यामुत्थितैः पांसु
स्तैन धूम्रा दिशः ॥ रजस्वले रजोव्याप्ते अक्षिणी यस्य स यथा न जानाति ॥ तथा वात्येव भ्रमंती या स्त्री तस्यामुद्भू
तै रागादिभिः ॥ अप्रकाशमाना दिक् देवताः कर्मसाक्षीभूता न जानातीत्यर्थः ॥ ४ ॥

कौः २

भा० पं० शय्यादिहीनः॥ आस्यंतेऽस्मिन् नित्याशनं कं वल्लादि स्थीयतेऽत्रेति स्थानं गृहं॥ विहरंत्यनेनेति विहारो यानादि॥ याचमानो
९६ पि यदा परस्मात् अप्राप्तकामस्तदा परकीये वस्तुनि दृष्टिरभिलाषो यस्य सोऽवमानं प्राप्नोति॥१०॥ एवमन्योन्यं वित्तव्य
तिषंगेण धनविनिमयेन विवृद्धो वैरानुबंधो यस्य॥ तथाविधोपि परस्परं विवहन्॥ विवाहादि संबंधं कुर्वन् उरुभिः
कृच्छ्रैः श्रमैः वित्तबाधैः उपसर्गैश्च दुःखादिभिः विपन्नः म्रतप्रायो भवति॥११॥ दुरत्ययत्वमध्वनो दर्शयति॥ तांस्तानिति

कश्चित्क्वचित्क्षीणधनस्तु तस्मिन् शय्यासनस्थानविहारहीनः॥ याचन्परादप्रतिलब्धकामः पारक्यदृ
ष्टिर्लभतेऽवमानं॥१२॥ अन्योन्यवित्तव्यतिषंगवृद्धवैरानुबंधो विवहन्मिथश्च॥ अध्वन्यमुष्मिन्नुरुकृच्छ्र २२
वित्तबाधोपसर्गैर्विहरन्विपन्नः॥१३॥ तांस्तान्विपन्नान्स हि तत्र तत्र विहाय जातं परिगृह्य सार्थः॥ आव
र्तते ऽद्यापि न कश्चिदत्र वीराध्वनः पारमुपैति योगं॥१४॥ मनस्विनो निर्जितदिग्गजेंद्रा ममेति सर्वे भुवि
बद्धवैराः॥ मृधे शयीरन्न तु तद्व्रजंति यन्न्यस्तदंडो गतवैरोऽभियाति॥१५॥

पन्नान् मृतान् विहाय जातं॥ परिगृह्य विहरन्॥ यतः प्रस्थितः तं प्रति नावर्त्तते॥ हे वीर त्वं अध्वनः पारं यो योगस्तं च नो
पैति॥ अत्र सार्थे कश्चिदपि समर्थोपि॥१४॥ तदेवाह मनस्विनः शूराः निर्जितो दिग्गजेंद्रा यैः॥ ममेयं भूः मेय
मितिभुवि निमित्तभूतायां बद्धवैरं यैः॥ न्यस्तदंडः संन्यासी यद्विष्णोः पदमभियाति तत्तु न व्रजंति॥१५॥ ९६

कंटकादिविद्धांघ्रिरिव विघ्नैरभिभूतः सन्नगतुल्यमहत्कर्मारोढुं कर्तुमिच्छुर्विमनाइवआस्ते ॥ पदे पदे स्खलन्स्खलन्नभ्यंत
रेणवह्निनाजाठरेण ॥ ८ ॥ अजगराहिनानिद्रारूपेण गिलितोनवेत्ति विपिनेत्यक्तः शवइव ॥ दंदशूकैर्हिंस्रैर्दुष्टजनैः ॥ दष्टः
पीडितः ॥ अंधोलुब्धविवेकः ॥ अंधकूपेमोहेपतितः ॥ तमिस्त्रेदुःखेलीयते ॥ ९ ॥ क्षुद्ररसान्परयोषादीन्विचिन्वन् ॥ अन्वेष्य

चलन्क्वचित्कंटप्रायैरंघ्रिर्नगारुरुक्षुर्विमनाइवास्ते ॥ पदेपदेऽभ्यंतरवह्निनार्दितः कौटुंबिकः क्रुध्यति
वैजनाय ॥ ८ ॥ क्वचिन्निगीर्णोऽजगराहिनाजनोनावैति किंचिद्विपिनेप्रविष्टः ॥ दष्टः स्मसेते क्वच दंदश्
कैरंधोंऽधकूपेपतितस्तमिस्त्रे ॥ ९ ॥ कर्हिस्मचित्क्षुद्ररसान्विचिन्वंस्तन्मक्षिकाभिर्व्यथितोविमानः ॥ तत्रा
पिकृच्छ्रंप्रतिलब्धमानोबलाद्विलुंपत्यथतंततोऽन्ये ॥ १० ॥ क्वचिच्चशीतातपवातवर्षप्रतिक्रियांकर्तुम
नीशआस्ते ॥ क्वचिन्मिथोविपणन्यच्चकिंचिद्विद्वेषमृच्छत्युतवित्तशाठ्यात् ॥ ११ ॥

तन्मक्षिकाभिः ॥ योषादिस्वामिभिर्विमानः ॥ अवज्ञातः ॥ ताडितः सन्व्यथितो भवति ॥ यदि कथंचित्तत्रापि क्ले
शेन प्रतिलब्धमानः प्राप्तयोषादिर्भवति ॥ तदा बलादन्येऽपहरंति ॥ तानि ॥ अन्यदाभियुक्तेः ॥ तदा ततोऽप्यन्ये ह
रंति ॥ १० ॥ यत्र किंचिदत्यल्पमपि मिथो व्यवहरन्क्रियादिना गेहृते वित्तशाठ्यात् ॥ धनवंचनात् ॥ ११ ॥ ॥

भा०पं० सार्थे प्रविशन्ति यथापूर्वं प्ररूढिमार्गैरमन्ते ॥१९॥ त्वमपि त्वद्ध्वनिनिवेशितम् इत्यनुषंगः ॥ अतो सा ध्वनिः प्रारम्
६१ न्तितः ॥ असज्ज्ञितात्मा विषयेष्वभिनिवेशितचित्तः सन् ॥ हरिसेवयाश्रितं तीर्थं कृतं ॥२०॥ अखिलजन्मसु शोभ
नेनेन्द्रजन्मेव परं श्रेष्ठं येभ्यो देवादिजन्मभ्यः तैरपि किं मुक्तिस्वर्गैर्पि जन्मभिः किं न किंचित् ॥ यत्र येषु जन्मसु अत्र वस
र्गे वा वः महात्मनां समागमः प्रचुरो न भवति ॥ हृषीकेशस्य यशसा कृतः शोधित आत्मा येस्तेषां ॥२१॥ तेन तेमुपाश्रितेस्व

अतः कथंचित्सविमुक्त[illegible] श्रीपदः पुनस्त्वसार्थं प्रविशन्त्यरिंदम ॥ अध्वन्यमुष्मिन्नजयानिवेशितोऽत्र मन्द
न२ जनोद्यापि न वेद कश्चन ॥१९॥ रहूगणत्वमप्यध्वनेऽस्य संन्यस्तदंडः कृतभूतमैत्रः ॥ असज्जितात्मा हरिसेवया
शितं ज्ञानासिमादाय तरातिपारं ॥२०॥ राजोवाच ॥ अहो नृजन्माखिलजन्मशोभनं किं जन्मभिस्त्वपरैरप्य
मुष्मिन् ॥ न यद्धृषीकेशयशःकृतात्मनां महात्मनां वः प्रचुरः समागमः ॥२१॥ न ह्यद्भुतं त्वच्चरणाब्जरेणु
भिर्हतांहसो भक्तिरधोक्षजेऽमला ॥ मौहूर्तिकाद्यस्य समागमाच्च मे दुस्तर्कमूलोऽपहतोऽविवेकः ॥२२॥ नमो
महद्भ्योऽस्तु नमः शिशुभ्यो नमो युवभ्यो नम आवटुभ्यः ॥ ये ब्राह्मणा गामवधूतलिंगाश्चरंति तेभ्यः शिवमस्तु
राज्ञां ॥२३॥
भाग्याद् राज्ञां शिवमस्त्विति ॥२३॥

त्पादाब्जरेणुभिर्हतं नष्टमंहो यस्य तस्याधोक्षजे निर्मला भक्तिर्भवतीति नैवाद्भुतं ॥ यस्य तव मुहूर्तेमा
त्रेऽभवत्समागमः मात्रादपि दुस्तर्केण बद्धमूलोपि मम अविवेको नष्टः ॥२२॥ ब्रह्मविदः केन रूपेण विचरंतीत्यज्ञानात् सर्वान्
नमस्यति ॥ नम इति ये वटवो क्रीडारताः बाल्यादारभ्य धौरेयस्तान् अप्यभिव्याप्य सर्वेभ्यो नम इत्यर्थः ॥ स्वदर्शनेन राज्ञां सं

सिंहावलोकनेन पुनर्भवाटवीमेवानुवर्णयति॥ प्रसज्जति आसक्तिं करोति॥ कीदृशः॥ खलानां भुजाः॥ शाखास्तद्
त्सुकुमारायेस्त्रीणांभुजाः तदाश्रयाः अव्यक्तपदाः॥ अस्फुटाक्षराः कलभाषिणो ये द्विजाः पक्षिणस्तत्तुल्येषु स्त्रीणां
प्रसक्तेषु अपत्येषु स्पृहा यस्य॥ ताहृशोभूत्वा हस्तिचक्रे सिंहसमूहः॥ तत्तुल्यात्कालचक्रनिमित्तात् जन्ममरणादेः
त्रसन्॥ तत्प्रहाराय कैश्चित्प्रलोभितो वकादिवत् वंचकैः दुष्टैः क्रूरैश्च पाषंडैः सख्यं करोति तेषु प्रविशति॥१६

पद१ प्रसज्जत्तिकाधिलताभुजाश्रयस्तदाश्रयाव्यक्तपदद्विजस्पृहः॥ कचित्कदाचिद्धरिचक्रतस्त्रसन्सख्यं वि
धत्ते वककंककगृध्रैः॥१६॥ तैर्वंचितो हंसकुलं पुनर्विशन्नरोचयंस्तच्छीलमुपैति वानरान्॥ तज्ज्ञातिरासेन
सुनिर्वृतेंद्रियः परस्परोद्वीक्षणविस्मृतावधिः॥१७॥ द्रुमेषु रंस्यन्सुतदारवत्सलो व्यवायदीनो विवशः स्व
बंधने॥ कचित्प्रमादाद्गिरिकंदरे पतन् वल्लीं गृहीत्वा गजभीत आस्थितः॥१८॥

तैर्वंचितः तत्र फलाभावं ज्ञात्वा हंसानां ब्राह्मणानां कुलं पुनः प्रविशन् तेषां शीलं प्रायश्चित्तपूर्वकं पुनरुपनयनादिस्त्रा
चारं अरोचयन्॥ अप्रियं पश्यन् वानरतुल्यान् भ्रष्टाचारान् शूद्रप्रायानुपैति॥ तज्ज्ञातिरासेन वानरवज्जाति क्रीडया
मिथुनीभूय परस्परमुखावेक्षणेनाविस्मृतोजीवितावधिर्येन॥१७॥ द्रुमवत्केवलदृष्टार्थेषु गृहेषु व्यवायदीनः
सुरतेच्छायाकृपणः एवं स्वस्य पट्टबंधनं प्राप्तं तस्मिन् विवशः परिहर्तुमशक्तः॥ पापांतरे तु वने संसारे च रात्रि
स्यर्थः गिरिकंदरवत्॥ अतिभयानके रोगादिदुःखे पतन्॥ कंदरस्थः गजतुल्यान्मृत्योर्भीतः सन्॥ वल्लीतुल्यं

८१

भा० पं०
९८

चतुर्दशेभवारण्यरूपकंव्याहृतिःकृताः ॥ प्रस्तुतेतस्यगोमायुमशकाद्यर्थकल्पनं ॥ यःपरीक्षितापृष्टःसश्री
शुकउवाचसहोवाचेतिस्फुटोक्तिः ॥ दुरत्ययेध्वन्यजयानिवेशितइतियदुक्तंतदेवनिवेशनप्रकारकथनेनप्रपंचय
ति ॥ यएषःप्रसिद्धोजीवलोकोऽयंविष्णोर्माययाऽसुगमेऽध्वनिआपतितोभवाटवींगतःसन्नृहरिरूपस्यगुरोश्च
रणारविंदयोर्येमधुकराःसेवकास्तेषामनुपदवींतैरनुष्ठितंभक्तिमार्गमद्यापिनावरुंधेनसंप्राप्नोतीत्यन्वयः ॥ माय

सहोवाच ॥ यएषदेहात्ममानिनांसत्त्वादिगुणविशेषविकल्पितकुशलाकुशलसमवहारविनिर्मित
विविधदेहावलिभिर्वियोगसंयोगाद्यनादिसंसारानुभवस्यद्वारभूतेनषडिंद्रियवर्गेणतस्मिन्दुर्गाध्व
वदसुगमेऽध्वन्यापतितईश्वरस्यभगवतोविष्णोर्वशवर्तिन्यामाययाजीवलोकोऽयंयथावणिक्सार्थो
र्थपरःस्वदेहनिष्पादितकर्मानुभवःश्मशानवदशिवतमायांसंसाराटव्यांगतोनाद्यापिविफलबहुप्रति
योगेहस्तत्तापोपशमनींहरिगुरुचरणारविंदमधुकरानुपदवीमवरुंधे ॥ १ ॥

यास्वकार्यद्वारेणसंसारमार्गपातहेतुत्वमाह ॥ देहात्ममानिनांसत्त्वादिगुणविशेषैर्विकल्पितानिविभक्तानियानिकु
शलाकुशलमिश्रकर्माणितैर्विनिर्मिताभिर्विविधदेहावलीभिर्वियोगसंयोगादिर्योऽनादिःसंसारःतदनुभवस्य
द्वारभूतेनतस्मिन्संसाररूपेदुर्गमार्गवदसुगमेऽध्वन्यापतितः ॥ यथावणिजांसार्थःसमूहः ॥ अर्थार्जनपरःस्वदेह
निष्पादितानांकर्मणांफलद्वारेणानुभवोयस्यविफलाश्चबहवःप्रयोगाःबहुविघ्नाश्चईहाः ॥ चेष्टायस्यसःतस्यांसंसाराट

उत्तरामात्तायस्यहेउत्तरामातः॥नगएयत॥अवमंतर्यपिपरमकरुणाकरत्वेनसिंधुपतयेआत्मतत्त्वमुपदिश्यनि
र्मतोःकरणानामूर्मयोयस्मिन्तआसयोयस्य॥२१॥रहूगणसमात्समग्रभगवतंपरमात्मसतत्त्वंयेनतयाभूतःसन्॥
तदामेवदेहेआत्ममतिंचविससर्ज॥हेनृपभगवदाश्रितोभरतस्तदाश्रितोरहूगणोयः।तस्यानुभावःसद्योदेहा

श्रीशुकउवाच॥इत्येवमुत्तरामातःसवैब्रह्मर्षिसुतःसिंधुपतयआत्मसतत्त्वंविगणयतःपरानुभा
वःपरमकारुणिकतयोपदिश्यरहूगणेनसकरुणमभिवंदितचरणआपूर्णार्णवइवनिभृतकरणो
र्म्याशयोधरणिमिमांविचचार॥२१॥सौवीरपतिरपिसुजनसमवगतपरमात्मसतत्त्वआत्मनिअविद्या
धारोपितांदेहात्ममतिंविससर्जएवंहिनृपभगवदाश्रिताश्रितानुभावः॥२२॥राजोवाच॥योहवाइ
हवहुविदामहाभागवतत्वयाभिहितःपरोक्षेणवचसाजीवलोकभवाध्वासह्याय्यमनीषिकयाक
ल्पितविषयोनांजसाव्युत्पन्नलोकसमधिगमः।अथतदेवैतद्दुरवगमंसमवेतानुकल्पेननिर्दिश्य
तामिति॥२३॥इतिश्रीमद्भागवतेमहापुराणेपंचमस्कंधेसंसाराटवीवर्णनंत्रयोदशोध्यायः॥१३॥

हंकारत्यागः॥२१॥पारोक्ष्येणवणिक्सार्थरूपकेणआर्याणांविवेकिनांमनीषयैवदस्युस्थानीयानींद्रिया
णिगोमायुस्थानीयान्यपत्यादीनि॥इत्येवंकल्पितविषयः॥अव्युत्पन्नस्यतुलोकस्यजनस्यसम्यगधिगम्योन
भवति॥अथअतः॥तदेतदेवभवाध्वरूपंसमवेतानुकल्पेनप्रस्तुतेनतदनुरूपार्थोपकल्पनेन॥२३॥इति

॥१४३॥

प्ररूढतावीरुत्तृणगुल्मगह्वरं इत्येतद्व्याचष्टे॥न दग्धानिवीजानियस्मिन॥यद्यस्मात्योयमावसथआश्रयः एषःका
मानोकरंडः यथाकर्पूरभाजनेकर्पूरक्षयेपिपरिमलोनक्षीयते॥एवमत्रवासनानामक्षीणत्वान्नकर्माण्युत्सीदंती॥
त्यर्थः॥४॥दंशमशकतुल्यैरपसदैर्नीचैःशलभादिभिश्चात्रपरुध्यमानःपीड्यमानोवहिःप्राणांवित्तंयस्यतथाविधो
पस्मिन्नध्वनिपरिभ्रमन्नविद्यादिभिरुपरक्तेन॥मनसागंधर्वपुरतुल्यमघटमानंनरलोकंसत्यतयामिथ्यादृष्टि
यथाह्यनुवत्सरंकृष्यमाणमप्यदग्धवीजंक्षेत्रंपुनरेवावपनकालेगुल्मस्तंववीरुद्भिर्गह्वरमिवभ
वतिएवमेवगृहाश्रमःकर्मक्षेत्रंयस्मिन्नहिकर्माण्युत्सीदंतियदयंकामकरंडएषआवसथः॥५॥तत्र
गतोदंशकसमापसदैर्मनुजैःसलभसकुंततस्करमुषकादिभिरुपरुध्यमानवहिःप्राणःकचित्परिव
र्तमानोऽस्मिन्नध्वन्यविद्याकामकर्मभिरुपरक्तमनसानुपपन्नार्थंनरलोकंगंधर्वनगरमुपपन्नमि
तिमिथ्यादृष्टिरनुपश्यति॥६॥कचिदातपोदकनिभान्विषयानुपधावतिपानभोजनव्यवाया
दिव्यसनलोलुपः॥७॥
रनुपश्यति॥६॥प्रपश्यतीति॥प्रशब्दसूचितमर्थांतरंदर्शयति॥अत्र च गंधर्वपुरेकचिदातपो
दकंमृगतृष्णाजलम्॥तत्तुल्यान्विषयानुपधावतीत्यर्थः॥७॥रामरामरामरामरामरामरामराम ६९

यस्यामित्यादि व्याचष्टे यस्यां भवाटव्यां॥१॥ दस्युतुल्यं तेषां कर्म दर्शयति॥ तद्यथेति॥ धर्मोपयिकं धर्मकारणं तु
मेव स्वाभिप्रेतधर्ममाह साक्षादिति॥ तं तु सांपरायं परलोकार्थमुदाहरंति॥ तद्धर्मधर्मोर्द्धं धनं॥ दर्शनादीपंच ज्ञाने
द्रियाणां वृत्तयः संकल्पव्यवसायावंतः करणस्य एतैर्गृहे योग्राम्य उपभोगः तेन कुनाथस्य कुबुद्धेरजि

यस्यामुह वा एते षडिंद्रियनामानः कर्मणा दस्यव एव ते॥२॥ तद्यथा पुरुषस्य धनं यत्किंचित्साक्षा
द्धर्मौपयिकं च बहुकृच्छ्राधिगतं साक्षात्परमपुरुषाराधनलक्षणं योसौ धर्मस्तं तु सांपरायिकमुदाह
रंति तद्धर्मं धनं दर्शनस्पर्शनश्रवणास्वादनावघ्राणसंकल्पव्यवसायगृहग्राम्योपभोगेन कुनाथ
स्याजितात्मनो यथा सार्थस्य तथाजितात्मनो विलुंपंति॥३॥ अथ च यत्र कौटुंबिका दारापत्यादयो नाम्ना
कर्मणा वृकसृगाला एवात्र निछतोपि कदर्यस्य कुटुंबिन उरणवत्संरक्ष्यमाणं मिषतोपि हरंति॥४

तात्मनो विलुंपंति॥ यथा चौराः कुपालकस्यानवहितात्मनः॥ सार्थस्य धनं हरंति तद्वत्॥३॥ गोमाय
वो यत्रेत्येतद्व्याचष्टे॥ यथेति॥ अथ चेत्यर्थांतरोपन्यासे॥ कर्मणा तु वृकाः शृगालाश्च॥ कदर्यस्याति
लुब्धस्य॥४॥ रामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामराम ॥ ॥ ॥

अनुपादेयमेवोपादेयतया गृह्णातीति प्रक्रमसाजात्यादुत्तरश्लोकचतुर्थपादं प्रथमं व्याचष्टे ॥ क्वा
चित्सकृदिति ॥ क्वचिदातपोदकनिभान् इत्यत्राभिध्याविषयेषु लब्धपरत्वमुक्तं निवासतोयेऽप्यत्र तद्दर्शनप्र
यासत्वोक्तः ॥ अत्र तु बाधितेष्वपि पुनः प्रवृत्तिरुच्यत इत्यपौनरुक्त्यं ॥ स्वयमेव सकृदवगतं विषयाणां वैतथ्य
वैफल्यं येन परात्मभिध्यानेन देहाभिनिवेशेन विभ्रंशिता स्मृतिर्यस्य ॥ तयैव विभ्रंशितया स्मृत्या ॥

क्वचित्सकृदवगतविषयवैतथ्यः स्वयं पराभिध्यानेन विभ्रंशितस्मृतिस्तयैव मरीचि-
तोयप्रायांस्तानेवाभिधावति ॥ ११ ॥ क्वचिदुलूकझिल्लीस्वनवदतिपरुषरभसाटोपं प्रत्यक्षं
वा रिपुराजकुलेन निर्भर्त्सितेनातिव्यथितकर्णमूलहृदयः ॥ १२ ॥ स यदा दुग्धपूर्वसुकृत-
स्तदाकारस्करकाकतुंडाद्यपुण्यद्रुमलताविषोदपानवदुभयार्थशून्यद्रविणान्जीवन्मृता
स्वयंजीवन्म्रियमाण उपधावति ॥ १३ ॥

स्मृतिभ्रंशादेवेत्यर्थः ॥ ११ ॥ अदृश्यझिल्लीस्वनेत्येतद्व्याचष्टे ॥ क्वचिदुलूकेति अतिपुरुषो रभसः औत्सुक्यं हस्ते
नाटोपः संभ्रमो यस्य ताभिर्वत्येवं रिपूणां राजकुलस्य च निर्भर्त्सितेनात्रातिव्यथितं कर्णमूलं हृदयं च यस्य
१२ ॥ अपुण्यवृक्षान्नित्येतद्व्याचष्टे ॥ स यदेति दुग्धमुपभुक्तं पूर्वसुकृतं येन तदा कारस्करो विषतिंदुः तत्प्र-
मुखा ये पुण्यद्रुमाः तथाविधा लताश्च विषोदपानाश्च विषक्रियाः ॥ तद्वत्तुल्यान् दृष्टप्रयोजनशून्यधनान्

क्वचित्क्वचिच्छ्वाश्रुरयोल्लुकग्रहमित्येतद्व्याचष्टे॥ क्वचिच्छ्वाशेष्मायाणां दोषाणां निषिद्दनं स्थानं पुरीषविशे
षं॥ अग्नेर्विष्टा॥ तस्य पुरीषस्येव लोहितो वर्णो यस्य रजोगुणस्य तेन निर्मिता तद्विषया मतिर्यस्य सः॥ सुवर्ण
मुपदा तु मिंछसि अग्निकामेन कातरः परवशः॥ उल्लुकसदृशं पिशाचमिव॥ प्रोत्ता तु रोह्यरएपग्निवज्ज्वा
ज्वल्यमानं न तस्तती धावं न मुल्लुकपिशाच अग्निकुण्डानुधावति॥ न च तं प्राप्नोति॥ कथं चित्प्राप्नोत्तर्हि

क्वचिच्छाशेषदोषनिषदनं पुरीषविशेषं तद्वर्णगुण निर्मितमतिः सुवर्णमुपादित्सदित्यग्निका
मकातरइवोल्लुक॥ पिशाचं॥ ९॥ अथ कदाचिन्निवासपानीयद्रविणघ्नेकात्मोपजीवनाभिनि
वेश एतस्यां संसाराटव्यामित स्ततः परिधावति॥ ९॥ क्वचिच्चवात्योपम्यया प्रमदयारोहमारोपित
स्तत्काल रजसा रजनीभूता इवासा धुमर्यादो रजस्वला लोदिग्देवता अतिरजस्वलमतिर्न विजानाति

॥१०॥

तेन भक्षितः सन्म्रियते॥ एवं सुवर्णमनुधावन्नपीत्यर्थः॥ च निवासितोय द्रविणत्येतद्व्याचष्टे॥ अथेति
निवासादिघ्नेकेषात्मनउपजीवेषभिनिवेशो यस्य सः॥ ९॥ क्वचिच्चवात्यो थितेत्येतद्व्याचष्टे॥ क्वचिच्चेति॥
आरोहं अंकं तस्मिन्काले यद्रजः रागस्तेन स्वदृष्ट्यावरके ण रजन्यां रात्री भूता इव॥ ङ्स्वपाठे रजनीभूत
तमो मे यद्वा तीव रजसा छन्नमतिः॥ अत एव रजोव्याप्तेच चक्षुरिवदिक्षुस्थिता मर्यातिक्रमसादिभू

नाटेकनाटनाटि ॥१०॥

भा० पं०
५१

चलनस्य कचिदित्येतद्व्याचष्टे ॥ क्वचिद्गृहाश्रमेया ॥ कर्मचोदनाः तासां भूतिभरोऽतिविस्तारः स एव गिरिः ॥ तमारुरुक्ष
न् ॥ तदर्ते गेंहुमिच्छन् ॥ १९ ॥ पदेपदेभ्यंतरवह्निनेति व्याचष्टे ॥ क्वचिच्च दुःसहेति ॥ २० ॥ क्वचिन्निशीथ इत्येत
द्व्याचष्टे स एवेति ॥ २१ ॥ हृष्टंस्मशेते इति व्याचष्टे कदाचिदिति ॥ मानो गर्व एव दंष्ट्रा परपीडाकरत्वात् ॥ भग्ना

क्वचिद्गृहाश्रमकर्मचोदनातिभरगिरिमारुरुक्षमाणो लोकव्यसनकर्षितमनाः कंटकशर्करा
क्षेत्रं प्रविशन्निव सीदति ॥ १९ ॥ क्वचिच्च दुःसहेन कायाभ्यंतरवह्निना गृहीतसारः स्वकुटुंबाय क्रुध्य
ति ॥ २० ॥ स एव पुनर्निद्राजगरगृहीतोऽन्धे तमसि मग्नः शून्यारण्य इव शेते नान्यत्किंचन वेद शा
व इवापविद्धः ॥ २१ ॥ कदाचिद्भग्नमानदंष्ट्रो दुर्जनदंदशूकैरलब्धनिद्राक्षणो व्यथितहृदयेनानु
क्षीयमाणविज्ञानोऽन्धकूपेऽन्धवत्पततीति ॥ २२ ॥ कर्हिस्मचित्काममधुलवान्विचिन्वन्यदा पर
दारपरद्रव्याण्यवरुंधानो राज्ञा स्वामिभिर्वा निहतः पतत्यपारे निरये ॥ २३ ॥

मानदंष्ट्रा यस्य ॥ अत एव न लब्धो निद्रायाः क्षणो येन ॥ २२ ॥ कर्हिस्मचित् ॥ क्षुद्ररसानित्येतद्व्या
चष्टे ॥ कर्हिस्मचित् ॥ काममधुलवान्यदा निहितो भवति तदा स एव निरये पतति ॥ २३ ॥ राम राम रा
ति १

५१

क्वचिद्द्वितीयाः सरित इत्येतद्व्याचष्टे॥ एकदा कचित्॥ असतां प्रसंगात् तेन कृतावंचितामतिर्यस्य सः॥ निरूढकन
द्रीगर्त्तीपाते यथा सद्यः शिरः स्फुटति॥ पश्चादपि तद्देवानुवर्त्तते॥ एकमिह परत्र च दुःखदं॥१४॥ परस्परं चाल्पत
तेनिरंधइत्येतद्व्याचष्टे यदात्विति अंधः अन्नं नोपनमति नोपतिष्ठति॥ पितृपुत्राणां वा हिःकुशाः तद्द तुः पितुः
पुत्राणां वा कुशादित्वएमात्रमपि येषु॥ पश्यति तान् भेदयति वाधतइत्यर्थः॥ पितृपुत्रवर्हिष्ठानिति पाठः

एकदासत्प्रसंगान्निकृत्तामतिर्युदकश्रोतस्खलितवदुभयतोपिदुःखदंपाषंडमभियाति
॥१५॥ यदा तु परवाधया धनं आत्मने नोपनमति॥ तदाहि पितृपुत्रवर्हिष्मतः पितृपुत्रान्वासखलु
भेदयति॥१६॥ क्वचिदासाद्य गृहं दावचत्प्रियार्थविधुरं असुखोदर्कं शोकाग्निना दह्यमानो भृशं
निर्वेदमुपगच्छति॥१७॥ क्वचित्कालविषमितराजकुलरक्षसापहृतप्रियतमधनासुः प्रमृतक इ
व विगतजीवलक्षणमास्ते॥१८॥ कदाचिन्मनोरथोपगतपितृपितामहाद्यसत्सदिति स्वप्ननिर्वृ
तिलक्षणमनुभवति॥१९॥

सुगमः॥१५॥ अप्रीसाद्य गृहं दावमित्येतद्व्याचष्टे॥ क्वचिदासाद्येति॥१६॥
क्वचप्रस्ते हृतासु रित्येतद्व्याचष्टे॥ क्वचित्कालेन विषमितं प्रतिकूलतां नीतं यद्राजकुलं तदेव रक्षः॥ तेनापहृताः प्रि
यतमधनरूपा असवो यस्य॥ विगतानि जीवलक्षणानि हर्षादीनि यस्य॥ अरे हृतेति स्वः इत्यनेनैव व्याख्यातं॥१७॥ क्वचिद्गं
धर्वपुरं प्रविष्टइत्येतद्व्याचष्टे॥ कदाचिन्मनोरथप्राप्तं पित्राद्यसदे वसदिति मत्वा पूर्वं गंधर्वपुरवद्घटमानदर्श

नमनुकम॥ इत्युत्तमतनिमित्तमनुखलसमक्रिकार्यन्तरेदृरीति ॥२५॥ ८:

भा० पं० वक्त्रैः पुनरुक्तैश्च नापापैरत: परं दुर्गमो पि भवाध्वायं संप्रदायेन नीयते ॥ तत्र प्रसज्जेते क्वापीत्यादिना सिं
५२ हावलोकस्य न्यायेनोक्तमर्थमपकृष्य क्रमेणव्याचष्टे ॥ क्वापि देवमायेति ॥ प्रस्कन्नेत्र्यपगतं विवेकविज्ञानं य
स्य ॥ यस्या: स्त्रिया विहार गृहं क्रीडागृहं तदारंभे आकुलं हृदयं यस्य ॥ अनेन प्रसज्जतीति व्याख्यातं तदाश्रयेत्या
दि व्याचष्टे ॥ तस्याश्राश्रये चसक्ताः संलग्नाः सुतादुहितरश्च कलत्रं च सैव स्त्री तेषां भाषितादिभिरपहृतं हृदयं यस्य

क्वापि देवमायया स्त्रिया भुजलतोपगूढ: प्रस्कन्नविवेकविज्ञानो यद्विहारगृहारंभाकुलहृदयस्तदाश्र
यादसक्तसुतदुहितृकलत्रभाषितावलोकविचेष्टितापहृतहृदय आत्मानमजितात्मापारे ऽन्धे तमसि प्रहिणोति ॥२८॥
कदाचिदीश्वरस्य भगवतो विष्णोश्चक्रात्परमाण्वादिद्विपरार्धापवर्गोपलक्षणात्परिवर्तितेन वयसा रंह
सा हरत आब्रह्मणस्तृणस्तम्बादीनां भूतानामनिमिषतो मिषतां वित्रस्तहृदयस्तमेवेश्वरं कालचक्रनिजायु
धं साक्षाद्भगवन्तं यज्ञपुरुषमनादृत्य पाषंडदेवता: कंकगृध्रवकवटप्राया आर्यसमयपरिहृता: सांकेत्येनाभि

प्रहिणोतीति प्रतिपत्ति ॥२८॥ कश्चित्कदाचिद्धरिचक्रात्त्रस्यन्नित्येतद्व्याचष्टे ॥ कदाचिदीश्वरस्येति परमाण्वादिः द्विपरा
५२ र्द्धोऽपवर्गोंऽतः स एव लक्षणं यस्य तस्मात् ॥ कालोपलक्षणादिति दृष्टकूपदत्वेन पाठे कालस्वरूपादित्यर्थः ॥ रंहसा शी
घ्रेण परिवर्तितेन पर्यभ्रमणेन वयसा वात्यादिक्रमेण अभिव्याप्य तेणस्तम्ब आदौ निभूतानि च क्रत: सकाशात् वि
त्रस्तहृदय: सन् ॥ पाषंडदेवता आभिमुख्येन धत्ते इत्यन्वय: ॥ अनिमिषत: निमेषमकुर्वत: ॥ अप्रमत्तादित्यर्थ:
धत्ते ॥३०॥

निषत्तां प्रतिकृ हेमसक्तानामित्यर्थः ॥ कर्मेलिषष्ठी
कालचक्रं निडं नित्यमायुधं यस्य ॥ सांकेत्येनम्ले
प्रमाणं स्त्येन पाषंडागमेन ॥३०॥ ५२

प्रसंगात्प्रवृत्तस्य कर्मणः संसारहेतुत्वं स्फुटयति ॥ अथ चेति ॥ यस्मादेवं स्यात् ॥ अथ अनंतरमेव उभयथा
इह च परत्र च अस्मिन् प्रवृत्तिमार्गे संसारस्यावपनं जन्महेतुकमुदाहरंति ॥ २४ ॥ तत्रातिक्लेशेन प्रतिलब्धमा
नरत्येतद्व्याचष्टे मुक्त इति ॥ यदि बंधान्मुक्तो भवति तर्हि ततः शंकाशादन्यो हरति ॥ तस्मादप्यन्यः ॥ तत्त्वसौभेर्तु

अथ च तस्मादुभयथापि हि कर्मास्मिन्नात्मनः संसारावपनमुदाहरंति ॥ २४ ॥ मुक्तस्ततो यदि बंधा
द्देवदत्त उपाच्छिनत्ति तस्मादुभयथापि विस्णुमित्र इत्यनवस्थितिः ॥ २५ ॥ क्वचिच्च शीतवाताद्यने
काधिदैविकभौतिकात्मीयानां दशानां प्रतिनिवारणे ऽकल्पो दुरंतचिंतया विषण्ण आस्ते ॥ २६ ॥ क
चिन्मिथो व्यवहरन् किंचिद्धनमन्येभ्यो वा काकिणिकामात्रमपहरन् यत्किंचिद्वा विद्वेषमेति
वित्तशाठ्यात् ॥ २७ ॥ अध्वन्यमुष्मिन्निम उपसर्गास्तथा सुखदुःखरागद्वेषभयाभिमानप्रमादोन्माद
शोकमोहलोभमात्सर्येर्ष्यावमानक्षुत्पिपासाधिव्याधिजन्मजरामरणादयः ॥ २८ ॥

लभत इत्यर्थः ॥ २५ ॥ क्वचिच्च शीतातप इत्येतद्व्याचष्टे ॥ क्वचिच्चेति ॥ शीतादयो ऽनेकाधिदैविकाद्या याः दुःखावस्था
स्तासां ॥ २६ ॥ क्वचिन्मिथ इत्येतद्व्याचष्टे ॥ क्वचिन्मिथो यत्किंचिद्धनं व्यवहरन् काकिणिकामात्रं विंशतिकपर्दिकामात्रं ततो
न्यूनं वा यत्किंचिदपहरन् विद्वेषमेति ॥ २७ ॥ अध्वन्यमुष्मिन्नुरुकृच्छ्रवित्तबाधोपसर्गैरित्युक्तानुपसर्गान् प्रपंचयति

अध्वन्यमुष्मिन्निमे उरुकृच्छ्रवित्तबाधादयः तथा सुख
दुःखादयश्च ॥ २८ ॥

भा० पं०
५३

तदेवं सिंहावलोकनन्यायेनोक्रमर्थ्यं यथास्थानमुपक्षिप्य दुःखानां व्याख्याय क्रमस्य मनुवर्तयितुं ॥ स्त्रो
त्रमेवानुवदति ॥ क्वचिन्निमिषदर्शित वित्तशाठ्येन कदर्य्योऽल्पं किंचिदहन्नमुपयाति ॥ ३६ ॥ क्वचित्कदाचित्क्षीणधन
स्त्विति व्याचष्टे ॥ क्वचित्क्षीणधन इति अप्राप्तिलब्धं यत्तन्मनोरथोपगतं वा छित्तं ॥ तस्यादाने स्वीकारे निश्चितम

क्वचिन्निमिष्टो व्यवहरन्नूयत्किंचिदहन्नमुपयाति वित्तशाठ्येन ॥ ३६ ॥ क्वचित्क्षीणधनः शय्यासना
सनाद्युपभोगविहीनो यावदप्राप्तिलब्धमनोरथोपगतादानेऽव्यवसितमतिस्ततस्ततोऽवमानादीनि
जनादभिलभते ॥ ३७ ॥ एवं वित्तव्यतिषंगविवृद्धवैरानुबंधोपि पूर्ववासनया मिथउद्वहन्त्यथापव
हति ॥ ३८ ॥ एतस्मिन्संसाराध्वनि नानाक्लेशोपसर्गबाधितः आपन्नविपन्नो यत्र यस्तमु हन्वा वेतरस्तत्र
विसृज्य जातं जातमुपादाय शोचन्मुह्यन्विवदन्क्रंदन्संहृष्यन्गायन्नह्यमानः साधुवर्जि
तो नैवावर्तते यावदपि यत आरब्ध एष नरलोकसार्थस्तमध्वनः पारमुपदिशंति ॥ ३९ ॥ यदिदं योगा
नुशासनं वा एतदवरुंधते ॥ यन्न्यस्तदंडामुनय उपशमशीलाउपरतात्मानः समवगच्छंति ॥ ४० ॥
तिः सेन ॥ ३७ ॥ अन्योन्यवित्तव्यतिषंगेत्येतद्व्याचष्टे ॥ एवं वित्तव्यतिषंगे ति षंगेति ॥ अपवहतीत्यन्तेति ॥ ३८ ॥ अथ धन्यमु
स्मिन्नित्यादि व्याचष्टे ॥ एतस्मिन्निति ॥ आपन्नः आपदं प्राप्तः ॥ विषण्णो विनष्टो वा यत्र यः तमितरस्तत्रैव विसृज्य नष्ट

मानः साधुवर्जितः साधुव्यतिरिक्तः ॥ ३९ ॥ क्रानाहृतो
हेतुमाह ॥ यदिदमिति ॥ ४० ॥

५३

तैर्वंचित इत्येतद्व्याचष्टे॥ यदा त्विति॥ आत्मनावंचितैः ३० अधिकं वंचितः सन् तेषां ब्राह्मणानां यच्छीलमुपनय
नादि तदरोचयन् शूद्रवद्वर्त्तते निगमे आचारे अशुद्धितः स्वस्य शुद्ध्यभावात् यस्य क्षुद्रस्य केवलं मिथुनीभावः कुटुंब
भरणं च व्यापारेणाग्निहोत्रादि॥ ३१॥ तज्जातिरासेनेत्यादि व्याचष्टे तत्रापि निरवरोधः प्रतिबाधारहितः॥ स्वैरेण स्वेच्छया

यदा तु पाषंडिभिरात्मवंचितैस्तैरुरु वंचितो ब्रह्मकुलं समावसंस्तेषां शीलमुपनयनादि श्रौतस्मार्त्तकर्मानु
ष्ठानेन भगवतो यज्ञपुरुषस्याराधनमेव तदरोचयन् शूद्रकुलं भजते॥ निगमाचारेऽशुद्धितो यस्य मिथु
व॰ ३ नीभावः कुटुंबभरणं यथा वानरजातेः॥ ३१॥ तत्रापि निरवरोधः स्वैरेण विहरन्नतिकृपणबुद्धिरन्योन्यमुख
निरीक्षणादिना ग्राम्यकर्मणैव विस्मृतकालावधिः॥ ३२॥ क्वचिद्द्रुमवदैहिकार्थेषु गृहेषु रंस्यन् यथा
वानरः सुतदारवत्सलो व्यवायक्षणः॥ ३३॥ एवमध्वन्यवरुंधानो मृत्युगजभयात्तमसि गिरिकंदर
प्राये॥ ३४॥ क्वचिच्छीतवाताद्यनेकदैविकभौतिकात्मीयानां दुःखानां प्रतिनिवारणेऽकल्पो दुरंतविष
यविषण्ण आस्ते॥ ३५॥

क्रीडया विस्मृतः॥ मृत्युकालः सन्॥ ३२॥ द्रुमेषु रंस्यन्नित्येतद्व्याचष्टे॥ क्वचिद्द्रुमवदिति
व्यवायक्षणः मिथुनीसत्त्वो भवति॥ ३३॥ क्वचित्प्रमादादित्येतद्व्याचष्टे॥ एवमध्वनि सुखदुःखाद्यवरुंधानो
गिरिकंदरप्राये तमसि रोगाद्यापदि पततीति शेषः॥ ३४॥ क्वचिच्छीतवातेत्यादि पूर्वस्मादधिकः क्लेशः॥ रोगा

तस्यैवानुरागमेवाह ॥ यज्ञायेति यज्ञरूपाय धर्मपतये धर्मफलदात्रे विधौ नैपुण्यं यस्य तस्मै धर्मानुष्ठात्रे ॥ यो
गोः शुभागः तस्मै सांख्यज्ञानं तच्छिरः प्रधानं फलं यस्य तस्मै योगाय प्रकृतीश्वराय ॥ मायानियंत्रे ॥ अतएवनारंजी
वसमूहस्य अयनमाश्रयो यस्य ॥ सर्वजीवनियंत्रे ॥ एवं कर्मज्ञानदेवताकांडैः प्रतिपादिताय हरये नम इति उदारं उच्चै
र्यः स्म मृगस्थाशिवान् ॥ मृगत्वं मृगदेहमपि हास्यन् ॥ एवं भूतस्तस्य तद्दुश्चिंतमिति चात्तस्यानुवर्तनं नार्हतीति वास

यज्ञाय धर्मपतये विधिनैपुण्याय योगाय सांख्यशिरसे प्रकृतीश्वराय ॥ नारायणाय हरये नम इत्युदारं
हास्यन्मृगत्वमपि यः समुदाजहार ॥ ६ ॥ य इदं भागवतसभाजितावदातगुणकर्मणो राजर्षेर्भरत
स्यानुचरितं स्वस्त्ययनमायुष्यं धन्यं यशस्यं स्वर्ग्यापवर्ग्यं वानुशृणोत्याख्यास्यत्यभिनंदति च स
र्वा एवाशिष आत्मन आशास्ते न कांचन परत इति ॥ ७ ॥ इति श्रीमद्भागवते पंचमस्कंधे भरतोपाख्याने ब्राह्मणरह
गणसंवादे चतुर्दशोध्यायः ॥ १४ ॥ श्रीशुक उवाच ॥ भरतस्यात्मजः सुमतिर्नामाभिहितो यमु ह वाव केचित्पाखंडिन
ऋषभपदवीमनुवर्तमानं चानार्या अवेदसमाम्नातां देवतां स्वमनीषया पापीयस्या कलौ कल्पयिष्यंति ॥ १ ॥

वंधः ॥ ७ ॥ भरतचरित्रश्रवणादिफलमाह य इदमिति ॥ भागवतैः सभाजिता अवदाताः शुद्धाः गुणाः कर्माणि च यस्य भरतस्या
नुशृणोति ॥ सर्वा आत्मनः स्वस्य काशास्त्र वा आशिष आशास्ते ॥ स्व तत एव प्राप्नोति ॥ ननु कांचिदपि परस्मादपेक्षत इत्यर्थः ॥ ७ ॥
इति पंचमे चतुर्दशः ॥ १४ ॥ एवमष्टभिरध्यायैर्भरतस्योक्तमीहितं ॥ ततः पंचदशे तस्य कीर्त्यते वंशजान्वयः ॥ ऋषभपदवीं

जीवन्मुक्तमार्गमनुवर्तमानं येदृष्ट्वेति शेषः ॥ यद्वा ॥ ये सुमतिं
ऋषभदेवं समाम्नातां देवतां कल्पयिष्यन्ति ॥ बुद्धोपंसादवतीर्णः ॥
इति मत्स्यतत्त्वार्थः ॥ १ ॥

मनस्विन इत्यादि व्याचष्टे ॥ यदपीति ये वै राजर्षयस्तेपि नावरुंधते किंतु परं केवलं म्रधेशयीरन न प्रसज्जंतीत्यादि
गिरिकंदरं इत्यंतमपहोष्य व्याख्यातं ग्रंथमतिक्रम्य वल्लीं गृहीत्वेत्यादि व्याचष्टे कर्मवल्लीमिति ॥ एवमुपरिस्व
र्गगतोपि नरलोकसार्थमेवोपयाति ॥ ४१ ॥ तदेवं भरतोक्रियाख्यायत चरितसंग्रहश्लोकानाह ॥ तस्येदं कर्मश्लोके
आर्षभस्य ऋषभपुत्रस्यान्यो नृपः ॥ अनुवर्त्मनार्हतीति वर्त्मानुगंतुं न शक्नोतीति ॥ ४२ ॥ तत्र हेतुमाह ॥ य इति सुहृद्राज्यं

यदपि दिग्विभजयिनो यज्विनो वैराजर्षयः परं म्रधेशयीरन् तस्यामेव ममेयमिति कृत्वै राज्यानुवंधायां वि
रक्त्या स्वयमुपसंहृता ॥ कर्मवल्लीमवरत्तं व्यतत्रापदः कथंचिन्नरकाद्विमुक्तः पुनरप्येवं संसाराध्वनि वर्तमानो न
रलोकसार्थमुपयातीति एवमुपरिगतोपि ॥ ४१ ॥ तस्येदमुपगायंति ॥ आर्षभस्येह राजर्षेर्मनसापि महात्मनः ॥ नानुवर्त्मा
र्हति नृपो मक्षिकेव गरुत्मतः ॥ ४२ ॥ यो दुस्त्यजान्दारसुतान्सुहृद्राज्यं हृदिस्पृशः ॥ जहौ युवैव मलवदुत्तमश्लोकलालसः
॥ ४३ ॥ यो दुस्त्यजान्क्षितिसुतस्वजनार्थदारान् प्रार्थ्यां श्रियं सुरवरैः सदयावलोकां ॥ नैच्छन्नृपस्तदुचितं महतां मधुद्विट्सेवानुरक्तम
नसामभवोपि फल्गुः ॥ ४४ ॥

हे हे कं यो दुस्त्यजान्दारादीन् विष्टामिव जहौ तस्यार्षभस्येति संबंधः ॥ दुस्त्यजत्वे हेतुः
उक्तं ॥ हृदिस्पृशः मनोज्ञान् त्यागे हेतुः ॥ उत्तमश्लोके लालसा लंपटत्वं यस्य ॥ ४३ ॥ तस्यैव विषयत्यागो न चित्रमित्याह ॥ य एवं भ
नासौ नृपः सन्नित्यादीन्नैच्छदिति यत्तदुचितं सदयावलोकां भरतस्य दया यथा भवत्येवमवलोको यस्या इति परिज
नावलोकः श्रियामुपचर्यते ॥ यतस्तन्मधुद्विषः सेवायामनुरक्तं मनो येषां तेषां मोक्षोपि फल्गुः तुच्छ एव ॥ ४४ ॥

भा० पं० ण्यस्तेन परिभाविता संस्कृता मतिर्यस्य ॥ अत एवोपरतमनात्म्यं देहाद्यहंभावो यस्मिंस्तात्मनि चित्ते स्वयमेवोप
५५ लभ्यमाने ब्रह्मण्यात्मानुभवो यस्य ॥ तादृशोपि निरभिमान एव अवनिं अजूगुपत् पालयामास ॥ ७ ॥ कर्मभिर्गो
यं कः प्रतियाति अनुकरोति न कोपि ॥ अत्र हेतुः ॥ यज्वादिरूपां भगवत्कलां गयमृते अन्यः क इत्यनुषंगः ॥ अभिमानी

वयादिना भगवद्भक्तियोगेन चाभीक्ष्णशः परिभावितमतिरुपरतानात्म्य आत्मनि स्वयमुप
लभ्यमानब्रह्मण्यात्मानुभवोपि निरभिमान एवावनिमजूगुपत् ॥ तस्येमां गाथां पांडवेय पुराविद
उपगायंति ॥ ७ ॥ गयं नृपः कः प्रतियाति कर्मभिर्यज्वाभिमानी बहुविद्धर्मगोप्ता ॥ समागतश्रीः
सदसस्पतिः सतां सत्सेवकोन्यो भगवत्कलामृते ॥ ९ ॥ यमभ्यषिंचन् परया मुदा सतीः सत्याशिषो
दक्षकन्याः सरिद्भिः ॥ यस्य प्रजानां दुदुहे धराशिषो निराशिषो गुणवत्सस्नुतोधाः ॥ १० ॥

सर्वतोमानास्पदं ॥ मनस्वीति वा ॥ समागता संप्राप्ता श्रीर्येन यमिति वा सतां सदसः सभायाः पतिः सतां से
वकः ॥ यद्वा ॥ यज्वादिरूपोपि भगवत्कलामृते गयं कोन्यः प्रतियातीत्यन्वयः ॥ ९ ॥ सतीः सत्यः सत्याशिषो या
स्ताः दक्षकन्याः श्रद्धामैत्रीदयेत्याद्याः ॥ निराशिषोपि यस्य प्रजानामाशिषः कामान् धरा दुदुहे ॥ तस्य गु
णा एव वत्सः तेन स्नुतं ऊधो यस्याः पृथिव्याः ॥ यच्छब्दानां तं गयं कः प्रतियातीति संबंधः ॥ १० ॥ ॥ ऽऽ ॥ ५५

S-467

२॥ तत्तनयो देवताजितः पुत्रः॥३॥ आत्मविद्यावक्तुंस्पष्टमाख्याय व्याख्याने नैव स्वयं संसिद्धो ऽनुसस्मार॥ अपरे ऽद्यंतयात्र
नुभूतवान् प्रतिहर्त्रा प्रस्तोता उद्गातेति त्रयो यज्ञनिपुणाः सूनवः आसन्॥ अजनिषातां जातौ॥४॥ हृदयजः पुत्रः॥५॥ जगद्र

तस्माद्वृद्धसेनायां देवताजिन्नाम पुत्रो ऽभवत्॥२॥ अथासुर्यां तत्तनयो देवद्युम्नस्ततो धेनुमत्यां सुतः प
रमेष्ठी तस्य सुवर्चलायां प्रतीह उपजातः॥३॥ य आत्मविद्यामाख्याय स्वयं संशुद्धो महापुरुषमनुसस्मार
प्रतीहात्सुवर्चलायां प्रतिहर्त्रादयस्त्रय आसन्निज्याकोविदाः सूनवः प्रतिहर्तुः स्तुत्यामजभूमानाव
जनिषातां॥४॥ भूम्न ऋषिकुल्यायामुद्गीथस्ततः प्रस्तावो देवकुल्यायां प्रस्तावान्नियुत्सायां हृदय
ज आसीद्विभुः॥५॥ विभोरत्यां च पृथुषेणस्तस्मान्नक्त आकूत्यां जज्ञे नक्ताद्द्रुतिपुत्रो गयो राजर्षिप्रव
र उदारश्रवा अजायत॥ साक्षाद्भगवतो विष्णोर्जगद्रिरक्षिषया गृहीतसत्वस्य कलात्मवत्वादिल
क्षणेन महापुरुषतां प्राप्तः॥६॥ स वै स्वधर्मेण प्रजापालनपोषणप्रीणनोपलालनानुशासनलक्ष मा १
णेनेज्यादिना च भगवति महापुरुषे परावरे ब्रह्मणि सर्वात्मनार्पितपरमार्थलक्षणेन ब्रह्मविच्चरणानुसे

द्रिरक्षिषया गृहीतं सत्वं येन तस्य विष्णोः कलांऽशः सन्॥६॥ महापुरुषत्वमाह॥ स वै इति॥ धर्मस्तस्य द्विविधः॥ अभि
षिक्तत्वात्प्रजापालनादिरेकः गृहस्थत्वादिष्टापरः॥ द्विविधो ऽपि भगवति सर्वात्मना ऽर्पितः सन् परमार्थलक्ष

भा० पं०
५६

कीर्त्याऽतिशयेनाऽलमकरोत् अभिषिक्तवान् ॥ १६ ॥ इति पंचमे पंचदशः ॥ १५ ॥ पूर्वोक्तद्वीपसिंध्वादिमानं तत्प्रकारं रूपतः स्पष्टं
प्रवक्तुमारब्धा पंचाध्यायी ततः परं ॥ षोडशेऽधस्तथाचोर्ध्वपरितः सन्निवेशितः ॥ मेरोः स्थितिर्महार्कजकर्णिकेचोपवर्णिते
प्रियव्रतचरित्रोक्तावुक्ताद्वीपादिकल्पना तद्विशेषविजिज्ञासुः कथांतेपरिपृच्छति ॥ उक्त इति ॥ किंपर्यंतमुक्तस्तदाह यावदा
तत्रायं श्लोकः ॥ प्रैयव्रतं वंशमिमं विरजश्चरमोद्भवः ॥ अकरोदत्यलं कीर्त्या विष्णुः सुरगणं यथा ॥ ॥ इति श्री० पं
चमस्कंधे प्रियव्रतवंशानुवर्णनं पंचदशोध्यायः ॥ १५ ॥ राजोवाच ॥ उक्तस्त्वया भूमंडलायामविशेषो यावदादि
त्यस्तपति यत्र चासौ ज्योतिषां गणैश्चंद्रमा वा सह दृश्यते ॥ १ ॥ तत्रापि प्रियव्रतरथचरणपरिखातैः सप्तभिः
सप्तसिंधव उपक्लृप्ताः यत एतस्याः सप्तद्वीपविशेषविकल्पस्त्वया भगवन्खलु सूचितः एतदेवाखि
लमहं मानतो लक्षणतश्च सर्वं विजिज्ञासामि ॥ २ ॥ भगवतो गुणमये स्थूलरूप आवेशितं मनो ह्यगुणेऽपि सूक्ष्म
तम आत्मज्योतिषि परे ब्रह्मणि भगवति वासुदेवाख्ये क्षममावेशितुं तदु हैतद्गुरोऽर्हस्यनुवर्णयितुमिति ॥ ३ ॥ ऋ
षिरुवाच ॥ न वै महाराज भगवतो मायागुणविभूतेः काष्ठां मनसा वचसा वाधिगंतुमलं विबुधायुषापि पुरुषस्त
स्मात्प्राधान्येनैव भूगोलकविशेषं नामरूपमानलक्षणतो व्याख्यास्यामः ॥ ४ ॥

दित्यस्तपति ॥ यत्र चासौ शुक्लकृष्णपक्षयोर्नक्षत्रगणैः सह चंद्रमा वा दृश्यते तावत् ॥ १ ॥ यतः येभ्यः सिंधुभ्यः एत
स्या भुवः सूचितः संक्षेपतो दर्शितः ॥ २ ॥ जिज्ञासायाः फलमाह भगवत इति ॥ ३ ॥ मायायाः गुणविभूतिस्तस्याः

५६

छंदांसि वेदास्त इति तकमो ऽस्य दुर्दूरुः ॥ दददुरुः युधि प्रत्यंचिताः वा गौः प्रतिर्जिता नृपाः यस्य वलिमाजह्रुः ॥ अ
र्पयामासुः धर्मेण पालनेन दक्षिणादिश्च यदा प्रत्यंचिता विप्राः तदा परेत्य लोकांतरे आशिषां धर्मफलानां षष्टमंश
मा जह्रुः ॥ अर्पयामासुः ॥ अथवा विप्रेभ्यः सकाशाद्राजग्राह ॥ पुण्यात्षड्भागमादत्ते न्यायेन परिपालयन्निति स्मृतेः ॥ ४

छंदांस्यकामस्य च यस्य कामान्दुदूहुराजह्रुरथो बलिं नृपाः ॥ प्रत्यंचिता युधि धर्मेण विप्रा यदाशिषां षष्ठमं
शं परेत्य ॥ ४ ॥ यस्याध्वरे भगवानध्वरात्मा मघोनि माद्यत्युरुसोमपीथे ॥ श्रद्धाविशुद्धाचलभक्तियोगस
मर्पितेज्याफलमाजहार ॥ ५ ॥ यत्प्रीणनाद्बर्हिषि देवतिर्यङ्मनुष्यवीरुत्तृणमाविरिंच्यात् ॥ प्रीयेत सद्यः स ह विश्व
जीवः प्रीतः स्वयं प्रीतिमगाद्गयस्य ॥ ६ ॥ गयाद्गयंत्यां चित्ररथः सुगतिरवरोधन इति त्रयः पुत्रा बभूवुः ॥ चित्ररथा
दूर्णायां सम्राडजनिष्ट ॥ ७ ॥ ततउत्कलायां मरीचिर्मरीचेर्बिंदुमत्यां बिंदुमानुदपद्यत ॥ तस्मात्सरघायां
मधुर्नामाभवत् मधोः सुमनसि वीरव्रतस्ततो भोजायां मंथुप्रमंथू जज्ञाते मंथोः सत्यायां भौवनस्ततो दूष
त१ णायां त्वष्टाजनिष्ट ॥ त्वष्टुर्विरोचनायां विरजो विरजस्य शतजित्प्रवरं पुत्रशतं कन्या च विषूच्यां
किल जातं ॥ ८ ॥

उरुसोमपीथे बहुसोमपीथे बहुसोमपाने ऽध्वरे मघोनि इंद्रे माद्यति मदं प्राप्नुवति सति
श्रद्धया विशुद्धो योऽचलो भक्तियोगस्तेन समर्पितमिज्याफलं आजहार ॥ अहं एमिव प्रत्यक्षतः स्वीकृतवानित्यर्थः ॥ ५ ॥ य
स्य भगवतः प्रीणनाद्देवादीनां इदं हि एकं तत्सद्यः प्रीयेत प्रीतिं गच्छेत् स विश्वजीवः सर्वान्तर्यामी स्वयं प्रीतिरूप एव हि प्रियते

गयस्य ह स्फुटं प्रीतिमगात् सोऽस्मीति प्रत्यक्षं प्रीतिमाविःकृ
तवानित्यर्थः ॥ ७ ॥ सुमनसि स्त्रियां ॥ ८ ॥

भा० पं०
५१

उत्तरोत्तरेणेलावृतं ॥ इलावृतस्योत्तरोत्तरतः क्रमेण नीलादयस्त्रयो मर्यादागिरयः प्रागायताः ॥ उभयतो दीर्घाः ॥ क्षारोदये
वावधिर्येषां ॥ द्विसहस्रयोजनविस्तीर्णाः दशांशाद् ईषदधिकोयोंऽशस्तेन दैर्घ्य एव ह्रसंति न तूच्चत्वेन पृथक्
त्वेन वा ॥ यथोक्तं विष्णुपुराणे ॥ लक्षप्रमाणौ द्वौ मध्ये दशहीनास्तथापर इति ॥ एतच्च स्थूलदृष्ट्योक्तं तयोरपि य

उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृंगवानिति त्रयो रम्यकहिरण्मयकुरूणां मर्यादागिरयः प्रागायता उ
भयतः क्षारोदावधयो द्विसहस्रपृथव एकैकशः पूर्वस्मात्पूर्वस्मादुत्तरोत्तरो दशांशाधिकांशेन दै
र्घ्य एव ह्रसंति ॥ ८ ॥ एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलाद
यः अयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यं ॥ ९ ॥ तथैवेलावृतमपरेण पूर्वेण च
माल्यवद्गंधमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः ॥ १० ॥ केतुमालभद्राश्वयोः सीमा
नं विदधाते ॥ ११ ॥

यावन्मध्यमत्वाभावेन लक्षप्रमाणत्वाभावात् ॥ ८ ॥ अयुतयोजनमुत्सेधः उच्छ्रायो येषां ॥ अयं चोत्सेधो नी
लादीनामपि द्रष्टव्यः ॥ नीलादिष्वश्रुतत्वं चैषामपि द्रष्टव्यं ॥ यथासंख्यं मर्यादागिरय इति विशेषः ॥ ९ ॥ आनीलनि
षधायतौ ॥ उत्तरतो नीलपर्यंतं दक्षिणतो निषधपर्यंतं च दीर्घौ ॥ पप्रथतुः विस्तीर्णौ भवतः ॥ १० ॥ तावेव केतुमा

हरिवर्षकिंपुरुषभारतानां ॥ ९ ॥

५१

कुवलयं भूमंडलं तद्देव कमलं तस्य कोशाः सप्त द्वीपाः तेष्वभ्यंतरकोशः प्रथमो जंबूद्वीपः नियुतयोजनविशा
लः लक्षयोजनविस्तीर्णः ॥ ध्रु ॥ नवयोजनसहस्रव्यायामो येषां ॥ आयामोत्र विस्तारः एते च भद्राश्वकेतुमालव्यति
रेकेण द्रष्टव्यं तयोश्चतुस्त्रिंशद्योजनसहस्रायामत्वात् ॥ केचित्तु नीलनिषधयोः संलग्नयोः समुद्रप्रवेशमंगी

यो वायं द्वीपः कुवलयकमलकोशाभ्यंतरकोशेण नियुतयोजनविशालः समवर्तुलो यथा पुष्करपत्रं ॥ य
यस्मिन्नव वर्षाणि नवयोजनसहस्रायामान्यष्टभिर्मर्यादागिरिभिः सुविभक्तानि भवंति ॥ द्वे ॥ एषां म
ध्ये इलावृतनामाभ्यंतरवर्षं यस्य नाभ्यामवस्थितः सर्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमु
न्नाहः कर्णिकाभूतः कुवलयकमलस्य ॥ ७ ॥ मूर्द्धनि द्वात्रिंशत्सहस्रयोजनविततो मूले षोडशसह
त्रि स्रं तावत्तांतर्भूम्यां प्रविष्टः ॥
कृत्य तयोरपि संकुचितत्वेन नवसहस्रायामत्वं संपादयंति ॥ सर्वेषां तु वायुनोक्तः ॥ धनुर्वत्संस्थिते ज्ञेये द्वे व
र्षे दक्षिणोत्तरे ॥ दीर्घाणि तत्र चत्वारि चतुरस्रमिलावृतमिति ॥ ३ ॥ नाभ्यामध्ये द्वीपस्यायामो लक्षयोजनप्र
माणः तावान् समुन्नाहः उच्छ्रायः ॥ ७ ॥ मूले षोडशयोजनसहस्रविततम् ॥ तावत्ता षोडशयोजन सहस्र
योजनमानेन ॥ चतुरशीतियोजनसहस्रमानेन च बहिर्दृश्यते ॥ एवं लक्षयोजनोन्नाहः ॥ ४ ॥ ११ ११

भा० पं० यदुपस्पर्शिनः ॥ यत्सेविनः ॥१४॥१५॥ तल्लामोभूषणं सुरललनानां भूषणभूताः श्रेष्ठायाः स्त्रियस्तासां यूथ
५८ स्यपतयः सहस्रेभ्यः येषु विहरंति ॥१६॥ एकादशशतयोजनोत्तुंगो यो देवचूतस्तस्य शिरसः सकाशात् ॥ फ
लप्रमाणमुक्तं वायुपुराणे ॥ अरत्नीनां शतान्यष्टावेकषष्ट्यधिकानि च ॥ फलप्रमाणमाख्यातमृषिभिस्तत्त्व
कृदाश्चत्वारः पयोमधुविद्रुरसमृष्टजला यदुपस्पर्शिन उपदेवगणा योगैश्वर्याणि स्वाभावि
कानि भरतर्षभ धारयंति ॥१४॥ देवोद्यानानि च भवंति चत्वारि नंदनं चैत्ररथं वैभ्राजकं सर्वतो
भद्रमिति ॥१५॥ येष्वमरपरिवृढाः सह सुरललनाललामयूथपतय उपदेवगणैरुपगीयमान
महिमानः किल विहरंति ॥१६॥ मंदरोत्संग एकादशशतयोजनोत्तुंगदेवचूतशिरसो गिरिशिखर
स्थूलानि फलान्यमृतकल्पानि पतंति ॥१७॥ तेषां विशीर्यमाणानामतिमधुरसुरभिसुगंधिव हु
२ ॐ लारुणरसोदेना ॥ अरुणोदा नाम नदी मंदरगिरिशिखरान्निपतंती ॥ पूर्वेणैलावृतमुपप्लावयति
॥१८॥ यदुपजोषणाद्भवान्या अनुचरीणां पुण्यजनवधूनामवयवस्पर्शसुगंधवातो दशयोजनं समंतादनुवासयति ॥१९॥
दर्शिभिरिति ॥१७॥ अतिमधुरश्चासौ सुरभिश्च सुगंधिश्च न च अन्येषां गंधैरधिवासितः ॥ बहुलश्चारुण
श्च रसः स एव उदकं तेन ॥१८॥ यदुपयोषणात् यस्य रसस्य सेवनात् ॥ अनस्थिप्राणामतिसूक्ष्मबीजानां यत्र नि

पतंति तत्रश्चारभ्यात्मनो दक्षिणस्ताः सर्वमिला
वृतं व्याप्य वहंतीत्यर्थः ॥२०॥

नन्वेवं सति पूर्वापररेखायामिलावृतवेष्टितो मेरुर्मध्ये ततः पूर्वापरतो गिरिद्वयं वर्षद्वयं च नातः परं किंचिदस्ति
दक्षिणोत्तररेखायां तु तत्रैवेलावृतवेष्टितो मध्ये मेरुरुभयतस्त्रीणि ॥ त्रीणि वर्षाणि गिरयश्च तत्कथं सर्वतो लक्षप्रमाण
त्वं जंबूद्वीपस्योच्यते ॥ मेरोः षोडशसहस्राणि सर्वतः स्थितत्वादिलावृतस्य चाष्टादश ॥ अन्येषां वर्षाणां चतुर्णां चाष्टा गिरि
णां षण्णां द्वादशेत्येवं दक्षिणोत्तररेखायां तावल्लक्षं पूर्वापररेखायामपि मेरोरिलावृतस्य चतुस्त्रिंशत् ॥ गिर
योश्चत्वारिंशेषाणि द्विषष्टिसहस्राणि पूर्वापरवर्षयोरासमुद्रं दैर्घ्येण द्रष्टव्यानि अतो न दोषः ॥ अयुतयोजनप्र

मंदरो मेरुमंदरः सुपार्श्वकुमुद इत्ययुतयोजनविस्तारोन्नाहा मेरोश्चतुर्दिक्षु अवष्टंभगिरयः उपक्लृ
प्ताः ॥ १२ ॥ चतुर्ष्वेतेषु चूतजंबूकदंबन्यग्रोधाश्चत्वारः पादपप्रवराः पर्वतकेतव इवाधिकसहस्र
योजनोन्नाहास्तावद्विटपविततयः शतयोजनपरिणाहाः ॥ १३ ॥

माणो प्रस्तारोन्नाहो येषां ॥ विस्तीर्णमूर्द्धा मेरोरवष्टंभत्वात् ॥ पूर्वपश्चिमौ गिरी दक्षिणोत्तरविस्तारौ दक्षि
णोत्तरौ च पूर्वापरविस्तारौ द्रष्टव्यौ सर्वतो दशयोजनसहस्रविस्तारांगीकारे तु इलावृतलोपात् पू० ॥
वैर्णेलावृतमुपञ्चावतीत्यादि विरोधः स्यात् ॥ १२ ॥ अधिसहस्रमेकादशशतानि उन्नाहो येषां ते ॥ वत
प्रमाणं विटपविततिर्येषां शतयोजनं परिणाहो विस्तारो येषां ॥ १३ ॥ रामराम ॥ ॥ ऽऽ ॥ ऽऽ

भा० पं० ५९ तुरीय ३

२६॥२७॥

चतुर्दिक्षु मेरुमूलात् योजनसहस्रं त्यक्त्वाऽग्रेः परितः परिधय इव जठरदेवकूटादयस्तिष्ठंति ॥ अतोऽष्टादशयो
जनप्रमाणमत्रोक्तं ॥ वैष्णवादिपुराणेषु परिणामादि यत्तु नरन्यथा वर्णितं तत्तु कल्पभेदाद्यपेक्षया द्विस
हस्रैः एषूच्चत्वं तु गोस्तनवत् ॥२८॥२९॥ यथादिशं प्राच्यादिदिक्षु यथारूपं इंद्रादिवर्णेन तत्क्रमेण ॥ तुर्यमानेन सार्द्धद्वि

कुरंगकुररकुसुंभवैकंकत्रिकूटशिशिरपतंगरुचकनिषधशिनिवासकपिलशंखवैडूर्यचा
रमा २ रुधिहंसऋषभनागकालंजरनारदादयो विंशति गिरयो मेरोः कर्णिकाया इव केसरभूता मूलदे
शे परित उपक्लृप्ताः ॥२६॥ जठरदेवकूटौ मेरुं पूर्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसाहस्रं पृ
थुतुंगौ भवतः ॥२७॥ एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ एवमुत्तरत
स्त्रिशृंगमकरावष्टभिरेतैः परिसृतोऽग्निरिव परितश्चकास्ति कांचनगिरिः ॥२८॥ मेरोर्मूर्द्धनि भग
वत आत्मयोनेर्मध्यत उपक्लृप्तां पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शातकौंभीं वदंति ॥२९॥ ता
मनु परितो लोकपालानामष्टानां यथादिशं यथारूपं तुरीयमानेन पुरोऽष्टावुपक्लृप्ताः ॥३०॥

सहस्रप्रमाणेन नामानि पुराणांतरात् ज्ञातव्यानि ॥ यथोक्तं ॥ मेरोर्नव पुराणि स्युर्मनोवत्यमरावती ॥ तेजो
वती संयमनी तथा कृष्णांगना परा ॥ श्रद्धावती गंधवती तथा चान्या महोदया ॥ यशोवती च ब्रह्मेंद्रवह्न्यादीनां

५९

तावत्सर्वतो रोधसोस्तटयोः ॥२०॥ आयामोत्र व्यामः स च व्यामो बाह्वोः स करयोस्तिर्यगंतरमित्युक्तलक्षणः

एवं जंबूफलानामत्युच्चनिपातविशीर्णानामनस्थिप्रायाणामिभकायनिभानां रसेन जंबूनाम नदी मेरुमंदरशिखरादयुताधिकयोजनादवनितले निपतंती दक्षिणेनात्मानं यावदिलावृतमुपस्यंदति ॥ तावदुभयोरपि रोधसोर्या मृत्तिका तद्रसेनानुविध्यमाना वाय्वर्कसंयोगविपाकेन सदामरलोकाभरणं जांबूनदं नाम सुवर्णं भवति ॥२०॥ यदु ह वाव विबुधादयः सह युवतिभिर्मुकुटकटककटिसूत्राद्याभरणरूपेण खलु धारयंति ॥२१॥ यस्तु महाकदंबः सुपार्श्वनिरूढस्तस्य कोटरेभ्यो विनिःसृताः पंचायामपरिणाहाः पंच मधुधाराः सुपार्श्वशिखरात्पतंत्योऽपरेणात्मानमिलावृतमनुमोदयंति ॥२२॥ या ह्युपयुंजानानां मुखनिर्वासितो वायुः समंताच्छतयोजनमनुवासयति ॥२३॥ एवं कुमुदनिरूढो यः शतवल्शो नाम वटस्तस्य स्कंधेभ्यो नीचीनाः पयोदधिमधुघृतगुडान्नाद्यंबरशय्यासनाभरणादयः सर्व एव कामदुघा नदाः कुमुदाग्रात्पतंतस्तमुत्तरेणेलावृतमुपयोजयंति ॥२४॥ यानुपयुंजानानां न कदाचिदपि प्रजानां वलीपलितक्लमस्वेददौर्गंध्यजरामयमृत्यु शीतोष्णवैवर्ण्योपसर्गादयस्तापविशेषा भवंति यावज्जीवं सुखं निरतिशयमेव

पंचव्यामपरिणाहमाह ॥ स्थौल्यं यासामित्यर्थः ॥ केचित्तु पंचव्यामपरिणाह इत्येव पठंति ॥२२॥ ॥ रामराम

कोसौदिवोमध्यइत्यतआह॥यदिति॥किंतद्विष्णुपदंतदाह॥यत्रेतिवीरव्रतःध्रुवःस्वकल्पः॥अस्मत्कुलदेवतायाहरेश्चरणा
रविंदोदकमितिहेतोःपरमादरेणविभर्तीत्यन्वयः॥कथंभूतःसन्प्रतिक्षणंवर्द्धमानेनभगवद्भक्तियोगेनदृढमत्यं
तक्लिद्यमानमंतर्हृदयंयस्य॥अतएवऔत्कंठ्येनविवशामामीलितंयल्लोचनयुगलंतद्देवकुड्मलेताभ्यांविगलि
तममलंवाष्पंतस्यकलतयासहअभिव्यज्यमानंरोमपुलकानांकुलंयस्य॥२॥अतःसप्तऋषयः॥तस्यागंगा

तद्विष्णुपदमाहुः॥यत्रहवाववीरव्रतऔत्तानपादिःपरमभागवतोऽस्मत्कुलदेवताचरणारविंदो
दकमितियामनुसवनमुपस्पृश्यमानभगवद्भक्तियोगेनदृढंक्लिद्यमानांतर्हृदयऔत्कंठ्यविवशा
मीलितलोचनयुगलकुड्मलविगलितामलवाष्पकलतयाभिव्यज्यमानरोमपुलककुलकअधु
नापिपरमादरेणशिरसाविभर्त्ति॥ततःसप्तऋषयस्तत्प्रभावाभिज्ञाइयंनतुतपसआत्यंतिकीसिद्धिरे
तावतीभगवतिसर्वात्मनिवासुदेवेनुपरतभक्तिलाभेनैवोपेक्षितान्यात्मगतयोमुक्तिमिवागतांमु
मुक्षवइवसबहुमानमद्यापिजटाजूटैरुद्वहंति॥३॥

याःप्रभावाभिज्ञाःसंतः॥यांजटाजूटैरुद्वहंतीत्यन्वयः
एतावत्येवनातोऽधिकास्तीत्यभिप्रायवंतः॥तत्रहेतुः भगवतिसततंभक्तियोगलाभेनैवोपेक्षिता॥अन्येपुरु
षार्थाआत्मज्ञानंचयैः॥कामिवकइवधारयंति॥प्रत्यक्षांमुक्तिमिवतामागतांमुमुक्षवोजनाइवेति ॥२॥

१ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे ...
...श्री ॥ श्री ॥

स॰ १७ ततः सप्तदशे गंगागमनं तत्र चतुर्दिशं ॥ स्नात्वा वृतेश्चरूद्रेण संकर्षणनिषेवणं ॥ यज्ञलिंगस्य बलेर्य
ज्ञे लिंगत्रिविक्रमस्य त्रिविक्रमतः दक्षिणेन पदा भुवं क्रांत्वा वामपदमुत्क्षिपतः वामपादांगुष्ठनखेन निर्भिन्नमूर्ध्व
सुपरिभागो यस्यां ऽडकटाहस्य तस्य विवरेणांतःप्रविष्टा या बाह्यजलधारा सा दिवो मूर्ध्न्यवततारेत्यन्वय ॥ तस्य यच्च
रणपंकजं तस्यावनेजनेन क्षालनेन अरुणं तत्कुंकुममत्र देवकिंजल्कास्तैरुपरंजिता ॥ अतएवाखिलस्य जगतो

मूलं ॥ श्रीशुक उवाच ॥ तत्र भगवतः साक्षाद्यज्ञलिंगस्य विष्णोर्विक्रमतो वामपादांगुष्ठनखनिर्भिन्नोर्ध्वांडक
टाहविवरेणांतःप्रविष्टा या बाह्यजलधारा तच्चरणपंकजावनेजनारुणकिंजल्कोपरंजिता
ऽखिलजगदघमलापहोपस्पर्शनामला साक्षाद्भगवत्पदीत्यनुपलक्षितवचोभिधीय
माना तिमहता कालेन युगसहस्रोपलक्षणेन दिवो मूर्द्धन्यवततार ॥ १ ॥ रामराम राम ॥

ऽघमलापहमुपस्पर्शनं यस्याः ॥ तथाप्यमला तन्मलसंगशून्या साक्षाद्भगवत्पदीति ॥ यदनुप
लक्षितं जाह्नवी भागीरथीत्याद्युपलक्षणांतररहितम् ॥ वचो नाम तेनाभिधीयमाना ॥ तस्मिन् समये भग
वत्पदीति नाम पश्चात्तु नामांतराणि जातानि ॥ १ ॥ राम राम राम राम राम राम राम राम राम राम राम ॥

भा० पं०
६१

अतिरभसतररंहसा स्रवंति तीव्रतरवेगेन ॥९॥ वकुशः वज्रविधाः मेर्वादिगिरीणां दुहितरः नद्यः सृताः
॥१०॥ दिव्यभौमबिलभेदात् त्रिविधः स्वर्गः ॥ तत्र भौमसर्गस्य पदानि स्थानानि व्यपदिशंति ॥११॥ अयुतं पुरुष

तथैवालकनंदा दक्षिणेन ब्रह्मसदनाद्बहूनि गिरिकूटान्यतिक्रम्य हेमकूटाद्धिमकूटान्यति
रभसतररंहसा लुठयंती भारतमभिवर्षं दक्षिणस्यां दिशि जलधिमभिप्रविशति ॥९॥ यस्यां
स्नानार्थं चागच्छतः पुंसः पदे पदे अश्वमेधराजसूयादीनां फलं न दुर्लभमिति ॥ अन्ये च
नदा नद्यश्च वर्षे वर्षे संति वकुशो मेर्वादिगिरिदुहितरः शतशः ॥१०॥ तत्रापि भारतमेव वर्षं क
र्मक्षेत्रमन्यान्यष्ट वर्षाणि स्वर्गिणां पुण्यशेषोपभोगस्थानानि भौमानि स्वर्गपदानि व्यप
दिशंति ॥११॥ एषु पुरुषाणामयुतपुरुषायुर्वर्षाणां देवकल्पानां नागायुतप्राणानां वज्रसंहन
नबलवयोमोदप्रमुदितमहासौरतमिथुनव्यवायापवर्गवर्षधृतैकगर्भकलत्राणां तत्र तु त्रे

मानेन आयुर्वर्षाणि येषां ॥ वज्रवत् संहननं दृढं शरीरं ॥ ता युगसमः कालो वर्तते ॥१२॥
तस्मिन् बलं वयो मोदाः तैः प्रमुदितानि यानि महासौरतानि मिथुनानि तेषां व्यवायापवर्गे संभोगावसाने ए
कवर्षशेषे आयुषि धृतस्कोगर्भो यैः ॥ तादृशानि कलत्राणि येषां त्रेतायुगसमः विषयसुखोत्कर्षात् ॥ कि

[illegible] वकुशः ॥१८॥
६१

ततोनेकसहस्रकोटीनांविमानानांकै॥संकुलेनदेवयानेनाकाशमार्गेणावतरंतीसप्तस्वपिभ्योऽर्णवप्राय
शःकृमिणांगतिरिति॥ततोवर्णिगेवदेवसंकुलत्वमुक्तं॥आवार्प्यआज्ञाप्यमेरोर्मूर्द्धस्थब्रह्मसदनेनिपततीति॥४॥
अभिस्यंदतीति॥अभितोगच्छति॥५॥किशराचलानांमेरुमानोच्छायत्वात्॥प्रथमंतेषामादिशिखरेषुमुख

ततोनेकसहस्रकोटिविमानानीकसंकुलदेवयानेनावतरंतीदुमण्डलमावार्प्यब्रह्मसदनेनि
पतति॥४॥तत्रचतुर्द्धाभिद्यमानाचतुर्भिर्नामभिश्चतुर्दिशमभिस्यंदतीनदनदीपतिमेवाभिनि
विशति॥५॥सीतालकनंदाचक्षुर्भद्रेति॥सीताब्रह्मसदनात्केशराचलादिगिरिशिखरेभ्योधोधःप्र
स्रवंतीगंधमादनमूर्द्धसुपतित्वांतरेणभद्राश्ववर्षेप्राच्यांदिशिक्षारसमुद्रमभिप्रविशति
॥६॥एवंमाल्यवच्छिखरान्निपतंतीततउपरतवेगाकेतुमालमभिचक्षुःप्रतीच्यांदिशिसरित्पतिं
प्रविशति॥७॥भद्राचोत्तरतोमेरुशिरसोनिपतितागिरिशिखराद्गिरिशिखरमतिहायशृंगवतःशृंगा
दवस्यंदमानाउत्तरांस्तुकुरूनभितउदीच्यांदिशिजलधिमभिप्रविशति॥८॥

शृंगेषुपतति॥ततस्तेभ्योऽधोऽधःस्रवंती॥६॥माल्यवच्छिखरात्केतुमालाभिमुखंनिष्पतंती॥चक्षुःसंज्ञा॥७॥
गिरिशिखराद्गिरिशिखरादिति॥कुमुदशिखरादुच्चलिता॥नीलशिखरंततउच्चलिताश्वेतशिखरंतदप्यतिहायशृंगव

भा० पं०
६२

अपरत्र अर्वाचीनः पश्चात्तन्नवमस्कंधे ॥१५॥ भवानीनाथाः स्वामिनी येषां तैः ॥ स्त्रीगणानामर्बुदसहस्रैरवरुध्यमा
नः सर्वतः सेव्यमानः आत्मनः प्रकृतिकारणं ॥ आत्मसमाधिध्यानं यस्य तेन रूपेण तद्रूप्यमाणं मंत्रादिकं अ
भिगृणन् जपन् ॥१६॥ सर्वेषां गुणानां संख्यानाय प्रकाशाय स्मात्स्वयं तु अव्यक्ताय ॥ अप्रमेयाय ॥१७॥ हे भजन्य भजनी

इलावृते तु भगवान् भव एक एव पुमान्न ह्यन्यस्तत्रापरो निर्विशति भवान्याः शापनिमित्तज्ञः यत्प्रवेक्ष्यतः
स्त्रीभावस्तत्पश्चाद्वक्ष्यामि ॥१५॥ भवानीनाथैः स्त्रीगणार्बुदसहस्रैरवरुध्यमानो भगवतश्चतुर्मूर्तेर्महा
पुरुषस्य तुरीयां तामसीं मूर्तिं प्रकृतिमात्मनः संकर्षणसंज्ञामात्मसमाधिरूपेण सन्निधाप्यैत
दभिगृणन् भव उपधावति ॥१६॥ श्रीभगवानुवाच ॥ ॐ नमो भगवते महापुरुषाय सर्वगुणसंख्यानाया
नंतायाव्यक्ताय नम इति ॥१७॥ भजे भजन्यारणपादपंकजं भगस्य कृत्स्नस्य परं परायणं ॥ भक्तेष्वलं
भावितभूतभावनं भवापहं त्वां भवभावमीश्वरं ॥१८॥

यत्वा त्वां परमीश्वरं भजे इत्यन्वयः ॥ अरणं शरणं पादपं
कजं यस्य कृत्स्नस्य भगस्यैश्वर्यादिषाड्गुण्यस्य परमायनमाश्रयं ॥ भक्तेष्वलमत्यर्थं भावितं ॥ प्रकटितं भू
तभावनं स्वरूपं येन ॥ भवापहं संसारहरं भक्तेष्वित्यनुषंगः भवं भावयतीति तथा तम् ॥ अपीदं भक्तेषु इति द्र
ष्टव्यम् ॥१८॥

६२

यत्र ह येषु वर्षेषु देवपतयः । स्वैः स्वैः सेवकगणेषु मुख्यैः । कृतमहोपचाराः सन्तः स्वैरं विहरन्तीत्यन्वयः । केषु
स्थानेषु सर्वेषु ऋतुषु कुसुमस्तवकादीनां श्रिया समर्द्ध्या आनम्यमाना विटपा ... दाश्रिता लताश्च येषु
तैर्विटपिभिरुपस्तुभ्यमानातिशोभमानानि रुचिराणि काननानि येषु तत्त्वाश्रमायतनेषु वर्षगिरिद्रोणीषु च ॥ तत

यत्र ह देवपतयः स्वैः स्वैर्गणनायकैर्विहितमहार्हणाः । सर्वर्तुकुसुमस्तवकफलकिशलयश्रियानम्यमानवि
टपलताविटपिभिरुपस्तुम्भमानरुचिरकाननाश्रमायतनवर्षगिरिद्रोणीषु तथा चामलजलाशयेषु विक
चविविधनववनरुहामोदमुदितराजहंसजलकुक्कुटकारण्डवसारसचक्रवाकादिभिर्मधुकर
निकराकृतिभिरुपकूजितेषु जलक्रीडादिभिर्विचित्रविनोदैः सुललितसुरसुन्दरीणां कामकलि
लविलासहासलीलावलोकाकृष्टमनोदृष्टयः स्वैरं विहरन्ति ॥ १३ ॥ नवस्वपि वर्षेषु भगवान्नारायणो म
हापुरुषः पुरुषाणां तदनुग्रहायात्मतत्त्वव्यूहेनात्मनाद्यापि सन्निधीयते ॥ १४ ॥

व्या० अमलेषु जलाशयेषु च विकचानि वि
विधानि यानि नवानि वनरुहाणि नीरजानि तेषामामोदेन मुदितै राजहंसादिभिर्मधुकरनिकराणां वा व्याकृतिभिर्जी
तिविशेषैरुपकूजितेषु कामेन केलिलैः । स्तुभितैः विलासादिभिराकृष्टमनोदृष्टिश्च येषां ॥ १३ ॥ नवस्वपि वर्षेषु ये पुरु
षास्तेषां तदनुग्रहाय सर्वासामेव द्युम्नाणामनुग्रहस्तदर्थं आत्मतत्त्वव्यूहेन स्वमूर्तिसमूहेन सन्निधीयते । सन्नि

भा० पं० अस्य विश्वस्य स्थितिजन्मसंयमं हेतुं यमाहुः ॥ अत एव त्रिभिः स्थित्यादिभिर्हीनं अनंतं च यमाहुः ॥ एष
६३ यो मंत्राः छंदोनुरोधेन दीर्घपाठे सकारो देवमातौ लक्ष्मीः सा च [illegible] षयश्चेत्यर्थः ॥ अनंतत्वं दर्शयति मू
र्द्धसहस्रमेव धामानि स्थानानि तेषु क्वचिदेकदेशे कस्मिंश्चित् भूमंडलं यो न वेद सिद्धार्थं सर्षपमिव तत्सैनमद्रति
चतुर्थेनान्वयः ॥२०॥ तत्र जन्महेतुत्वं महदादिद्वारेण प्रपंचयति यस्य गुणनिमित्तो महान्नाम विग्रह आसी

यमाहुरस्यास्थितिजन्मसंयमं त्रिभिर्विहीनं यमनंतमृषयः ॥ न वेद सिद्धार्थमिव क्वचित्स्थितं
भूमंडलं धाम सहस्रमूर्द्धसु ॥२०॥ यस्याद्य आसीद्गुणविग्रहो महान्विज्ञानधिष्ण्यो भगवानजः
किल ॥ यत्संभवोऽहं त्रिवृता स्वतेजसा वैकारिकं तामसमैंद्रियं सृजे ॥२१॥ एते वयं यस्य वशे महा
त्मनः स्थिताः शकुंता इव सूत्रयंत्रिताः ॥ महानहं वैकृततामसेंद्रियाः सृजाम सर्वे यदनुग्रहादिदं ॥२२॥

त ॥ विज्ञानं सत्वं धिष्ण्यमाश्रयो यस्य सः तस्य चित्तरूपत्वेन सत्वप्रधानत्वात् ॥ स एव किलाधिदेवो वासु
देवाभेदविवक्षया ॥ भगवानजो ब्रह्मा यत्संभवः यस्माद्गुणविग्रहात्संभूतः अहं रुद्रः ॥ त्रिवृता त्रिगुणेन स्वतेजसा
स्वविभूतिरूपेणाहंकारेण वैकारिकं देवतावर्गं ऐंद्रियं इंद्रियवर्गं च सृजे सृजामि ॥२१॥ किंच ॥ एते वयं महदा
दयः सर्वे यस्यानुग्रहादिदं ब्रह्मांडं सृजामः कथंभूताः यस्य महात्मनो वशे स्थिताः संतः सूत्रेण क्रियाशक्त्या
यंत्रिताः पक्षिण इव लौकिकेन सूत्रेणाव यमित्युक्तं तानेवाह महानहंकारश्च वैकृतादयः ॥ एवं तत्त्ववर्गाश्च
६३

ईश्वरत्वमुपपादयंस्तामसत्त्वेन प्रसक्तामनादरं वारयति ॥ न यस्येति ॥ निरीक्षमाणस्याप्यिह दृष्टिर्मायागुणैर्विषयैश्चि
त्तवृत्तिभिः करणैश्च अण्वपि ईषदपि नांज्यते न लिप्यते ॥ किमर्थं निरीक्षमाणस्य ईशो ईशानाय नियमनाय ईशनं
ईट् संपदादित्वात् क्विप् ॥ अत्र वैधर्म्ये दृष्टांतः ॥ यथास्माकं जितक्रोधवेगानां नोऽस्माकं दृष्टिरज्यते न तथेति ॥ आत्मन
इंद्रियाणि ॥ जिगीषुर्जेतुमिच्छुः मुमुक्षुस्तं कोऽनु मन्येत नाद्रियेत ॥ १८ ॥ ननु सुरामदाभ्यां मत्तस्य कुतो दृष्टिर्नो

न यस्य मायागुणचित्तवृत्तिभिर्निरीक्षतो ह्यण्वपि दृष्टिरज्यते ॥ ईशे यथा नोऽजितमन्युरंहसां कस्तं न मन्येत जिगीषुरात्मनः ॥ १८ ॥ असद्दृशो यः प्रतिभाति मायया क्षीबेव मध्वासवताम्रलोचनः ॥ न नागवध्वोऽर्हण ईशिरे ह्रिया यत्पादयोः स्पर्शनधर्षितेंद्रियाः ॥ १९ ॥ ॥

ज्यते तत्राह ॥ असती दृष्टिर्यस्य तस्य स्वमायया क्षीबा मत्त इव योऽभयंकरः प्रतिभाति मध्वासवाभ्यां आताम्रलोचन इव च ॥ नागवध्वो विमोहनेन तथा प्रतिभातं युक्तमित्याह ॥ नेति ॥ पदान्वयेन यस्य पादयोः स्पर्शनेन धर्षितं मोहितमिंद्रियं मनो यासां ताः ॥ ह्रिया लज्जया भुजाद्यर्हणेन ईशिरे न शेकुः ॥ कस्तं न मन्येतेति पूर्वेणैवान्वयः ॥ १९ ॥

भा०पं०
६४

अयं जनो मिषन्नपि पश्यन्नपि घ्नंतं हिंसंतं मृत्युं न पश्यंति ॥ नालोचयंतीति भगवद्विचेष्टितमेवात्र हि चित्रं ॥ अ
दर्शने लिंगं ॥ पुत्रं चात्ते पितरं च कृष्णम् तं निर्हृत्य दग्ध्वा स्वयं तद्भयधनैर्जिजीविषति जीवितुमिच्छति ॥ जिजीवि
षन्निति ॥ पाठांतरे तु छंदः सामंजस्याकिं धर्मार्थ्यं न यर्हि यतः ॥ असत्तुच्छं विषयसुखं सेवितुं विकर्म पापमेव ध्या
यन् ॥ २ ॥ नन्वविद्वान्न पश्यति किमत्र चित्रं तत्राह ॥ नश्वरं वदंति स्म शास्त्रतः पश्यंति च समाधौ ॥ हे अज तथापि

अहो विचित्रं भगवद्विचेष्टितं घ्नंतं जनोयं हि मिषन्न पश्यति ॥ ध्यायन्नसद्यर्हि विकर्म सेवितुं नि
र्हृत्य पुत्रं पितरं जिजीविषति ॥ २ ॥ वदंति विश्वं कवयः स्म नश्वरं पश्यंति चाध्यात्मविदो विपश्चितः
तथापि मुह्यंति तवाज मायया सुविस्मितं कृत्यमजं नतोस्मि तं ॥ ३ ॥ विश्वोद्भवस्थाननिरोधकर्म
ते ह्यकर्तुरंगीकृतमप्यपावृतः ॥ युक्तं न चित्रं त्वयि कार्यकारणे सर्वात्मनि व्यतिरिक्ते च वस्तुतः ॥ ४ ॥

मायया मुह्यंति ॥ एतच्च तव कृत्यं चेष्टितं सुविस्मितं अतिचित्रं ॥ अतः शास्त्रादिश्रमं विहाय तं त्वामजं नतोस्मि ॥ ३ ॥
इदमपरं चित्रवत्प्रतीयमानमपि त्वयि न चित्रमित्याह ॥ विश्वोद्भवादिकर्म अकर्तुरपि ॥ अपगतावारणत्तावरणं य
स्मात् तादृशस्यापि ते अंगीकृतं वेदेन त्वयि तन्न चित्रं ॥ यतः मायया सर्वात्मनि कार्यस्य कारणे त्वत्स्रष्टरि कर्म युक्तं वस्तुतः
सर्वव्यतिरिक्ते निरुपाधावनावृतत्वमकर्तृत्वं च युक्तं ॥ ४ ॥ ६४

स्थितिलयहेतुत्वदर्शयन्प्रणमति॥येननिमित्तामेतांमायामेवायंजनोऽजस्रंवेदनतुतन्निस्तारयोगमुपा
यंकर्हिचिदपिचेदित्तिस्थितिहेतुत्वंदर्शितं॥कीदृशीकर्माण्येवपर्वाणिग्रंथयःतानिनयतिप्रापयतीतित
थातां॥प्रलयहेतुत्वमाह॥विलीयतेऽस्मिन्नितिविलयः॥उदेत्यस्मादित्युदयः॥विलयश्चोदयश्चात्मास्वरू

यन्निर्मितांकर्ह्यपिकर्मपर्वणींमायांजनोऽयंगुणसर्गमोहितः॥नवेदनिस्तारणयोगमंजसातस्मै
नमस्तेविलयोदयात्मने॥२१॥ इतिश्रीमद्भागवतेमहापुराणेपंचमस्कंधेभुवनकोशेसंकर्षणस्तो
त्रंसप्तदशोध्यायः॥१७॥श्रीशुकउवाच॥तदाचभद्रश्रवानामधर्मसुतस्तत्कुलपतयःपुरुषा
भद्राश्ववर्षेसाक्षाद्भगवतोवासुदेवस्यप्रियांतनुंधर्ममयींहयशीर्षाभिधानांपरमेण
समाधिनासन्निधाप्येदमभिगृणंतउपधावंति॥१॥भद्रश्रवसऊचुः॥ॐनमोभगवतेध
र्मायात्मविशोधनायनमइति॥२॥

पंचस्य॥तस्मैनमः॥२१॥इतिपंचमेसप्तदशः॥१७॥अष्टादशेततोमेरोःपूर्वादिक्रमतस्त्रिषु॥त्रिषुचोत्त
रवर्षेषुसेव्यसेवकवर्णनं॥१॥भद्रश्रवावर्षपतिस्तस्यकुलपतयः॥सेवकमुख्याश्च॥१॥भद्रश्रवसऊचु
रिति॥प्राणभृतउपदधातीतिवद्बहुलक्षणयाजघोगाद्गुणिषुलिंगसमवायन्यायेनबहुवचनम्॥२॥

भा॰ पं॰ ६५ नः संगः क्वापि मा स्याद्यदि स्यात् तर्हि आगारादिषु मा स्यात् ॥ किंतु भगवत्प्रियेष्वेव ॥ आगारादिसंगदोषमाह ॥ य इति ॥ इंद्रियप्रियो
गृहाद्यासक्तः ॥१०॥ भगवत्प्रियसंगगुणमाह ॥ येषां भगवत्प्रियाणां संगाल्लब्धं मुकुंदविक्रमं ॥ श्रुतिभिः श्रवणादिभिः सं
स्पृशतां सेवमानानां पुंसां अंतर्गतोऽजो मानसं मलं हरति ॥ कथंभूतं विक्रमं निजमसाधारणं वीर्यं वैभवं प्रभावा
तिशयो यस्य ॥ तीर्थं तु गंगादि मुहुः संस्पृशतामंगजं मलं केवलं हरति ॥ तान् को वै न सेवेतेत्यन्वयः ॥११॥ मानसमलापगमफल
माह यस्येति ॥ अकिंचना निःकामा मनःशुद्धो हरेर्भक्तिर्भवति ॥ ततश्च तत्प्रसादे संति सर्वे देवाः सर्वे गुणैर्धर्मज्ञा

मागारदारात्मजवित्तबंधुषु संगो यदि स्याद्भगवत्प्रियेषु नः ॥ यः प्राणवृत्त्या परितुष्ट आत्मवान् सिध्यत्यदूरान्न तथें
द्रियप्रियः ॥१०॥ यत्संगलब्धं निजवीर्यवैभवं तीर्थं मुहुः संस्पृशतां हि मानसं ॥ हरत्यजोऽन्तः श्रुतिभिर्गतोऽङ्गजं
को वै न सेवेत मुकुंदविक्रमं ॥११॥ यस्यास्ति भक्तिर्भगवत्यकिंचना सर्वैर्गुणैस्तत्र समासते सुराः ॥ हरावभक्तस्य
कुतो महद्गुणा मनोरथेनासति धावतो बहिः ॥१२॥ हरिर्हि साक्षाद्भगवान् शरीरिणामात्मा झषाणामिव तोय
मीप्सितं ॥ हित्वा महांस्तं यदि सज्जते गृहे तदा महत्त्वं वयसा दंपतीनां ॥१३॥

नादिभिः सह तत्र सम्यगासते नित्यं वसंति ॥ गृहाद्यासक्तस्य तु हरिभक्त्यसंभवात् कुतो महतां गुणा ज्ञानवैराग्याद
यो भवंति ॥ असति विषयसुखे मनोरथेन बहिर्धावतः ॥१२॥ ननु हरिविमुखस्य गृहाद्यासक्तस्यापि लोके महत्त्वं दृश्य
ते सत्यं ॥ न तु पहासास्पदं सहेतुकमाह हरिर्हीति ॥ यथा झषाणां मीनानां तोयं ईप्सितं तोयमेवात्मा तेन विना जीवनाभा
वात् महानतिप्रसिद्धोपि गृहे यदि सज्जेत तदा दंपतीनां मिथुनानां क्षुद्रादिष्वपि प्रसिद्धं वयसैव केवलं यन्महत्त्वं
तदेव तस्य भगवति न तु ज्ञानादिना मिथुनेषु तेषु रज्यमानेषु स्त्रीभ्यः पुंसां महत्त्वं बालमिथुनेभ्यश्च वृद्धमिथुनानां ६५

परमेश्वरत्वेन स्तुत्वा प्रस्तुतावतारचरितमाह ॥ वेदानिति ॥ तमसा दैत्यरूपेणातिरस्कृतानवस्थापनीतान् नाचतुरंग श्चनृत्तुरंगोत्तद्रूपो विग्रहो यस्य ॥ कवये ब्रह्मणे तदर्थी ॥ अवितथेहिताय सत्यसंकल्पाय ॥ ६ ॥ उत्तरत्व प्रह्लादचरित्रे म हापुरुषस्य गुणानां भाजनं ॥ आश्रयः दैत्यदानवकुलस्य तीर्थीकरणं शीलमाचरितं यस्य ॥ फलसंकल्पेन व्यव धानशून्यस्वासावनन्यस्वाव्यभिचारी यो भक्तियोगस्तेनोपास्ते सेवते ॥ ७ ॥ तेजसामपि तेजसे ॥ आविराविः ॥ आतिग

वेदान्युगांते तमसा तिरस्कृतान्रसातलाद्यो नृतुरंगविग्रहः ॥ प्रत्याददे वै कवयेऽभियाचते तस्मै नमस्ते वितथेहिताय तेइति ॥ ६ ॥ हरिवर्षे चापि भगवान्नरहरिरूपेणास्ते तद्रूपग्रहणनिमित्तमुत्तरत्राभिधास्ये तद्दयितं रूपं महापुरुषगुणभाज नो महाभागवतो दैत्यदानवकुलतीर्थीकरणशीलाचरितः प्रह्लादोऽव्यवधानानन्यभक्तियोगेन सह तद्वर्षपुरुषै रुपास्ते इदं चोदाहरति ॥ ७ ॥ ॐ नमो भगवते नरसिंहाय नमस्तेजस्तेजसे आविराविर्भव वज्रनख वज्रदंष्ट्र कर्माश यान् रंधय रंधय तमो ग्रस ग्रस ॐ स्वाहा ॥ अभयमभयमात्मनि भूयिष्ठाः ॐ क्ष्रौं ॥ ८ ॥ स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां ध्यायंतु भूतानि शिवं मिथो धिया ॥ मनश्च भद्रं भजतामधोक्षजे आविश्यतां नो मतिरप्यहैतुकी ॥ ९ ॥

टो भव वीप्सा वा कर्माशयान् कर्मवासनाः ॥ कर्माश्रयानिति पाठे रागादीन् रंधय निर्दह भूयिष्ठाः भूयाः ॥ ८ ॥ विश्वस्य स्वस्ति प्रा र्थने खलस्यापि भवेत् ॥ तच्च साधुपीडां विना न स्यात् ॥ अन्योन्यममंगलं ध्यायतां च भूतानामन्योन्यघातं विना न भवेदित्या शंक्याह खलः प्रसीदतां क्रौर्यं त्यजतु ॥ भूतानि मिथः शिवमेव ध्यायंतु ॥ तेषां मनश्च भद्रं उपसमादिकं भजतु नोऽस्माकं म पि मतिः अहैतुकी निःकामा सती ॥ ९ ॥

भा० पं०
६६

सर्वैर्गुणैर्विशेषैः। अशेषवस्तुभिर्विलक्षितो लक्षीकृतस्तत्रात्मा यस्य। आकूतीनां क्रियाणां चित्तीनां ज्ञानानां चे
तसां संकल्पाध्यवसायादीनां विशेषाणां तत्तद्विषयाणां षोडशकलात्मेशाय एकादशेन्द्रियपंचविषयलक्ष
णायस्य। छंदोमयो वेदोक्तकर्मप्राप्यायु अन्नमयाय अन्नोपष्टंभ्यत्वात्। अमृतमयाय परमानंदरूपाय विकार
त्वात्। सर्वमयाय सर्वविषयत्वात्। सह सेतोजसे बलाय तद्धेतुत्वात्। १९। त्वेकामेनैवत्त्वत्सेवकत्वादेहकृतार्थी

ॐ ह्रां ह्रीं ह्रूं ॐ नमो भगवते हृषीकेशाय सर्वगुणविशेषैर्विलक्षितात्मने आकूतीनां चेतसां विशेषाणां
चाधिपतये षोडशकलाय छंदोमयायान्नमयायामृतमयाय सर्वमयाय सहसे ओजसे बलाय कांताय
कामाय नमस्ते उभयत्र भूयात्। १८। स्त्रियो व्रतैस्त्वा हृषीकेश्वरं स्वतो ह्याराध्य लोके पतिमाशासतेऽन्यं ता
सां न ते वै परिपांत्यपत्यं प्रियं धनायूंषि यतोऽस्वतंत्राः। १९। स वै पतिः स्यादकुतोभयः स्वयं समंततः पा
ति भयातुरं जनं। स एक एवेतरथा मिथो भयं नैवात्मलाभादधि मन्यते परं। २०।

स्मिन्नन्यकामनया वृत्ताम् चेत्तोन परिपूर्णमनोरथाः स्युरित्याह। स्त्रिय इति। त्वत एव हृषीकाणामीश्वरं प
तिं संतं त्वामाराध्य याः स्त्रियोऽन्यं पतिं प्रार्थयंते। पतिकामानां हि कामाराधनं व्रतेषु प्रसिद्धं। तासां मपत्यादीनि
ते पतयो न पांतुं शक्ताः। १९। अतस्ते पतय एव न भवंतीत्याह। स वा इति। स चैवंभूतः पतिः भवानेक एव नान्या यो
भवानात्मलाभात् परमन्यदधिकं न मन्यते इतरथान्याधीनसुखस्यन स्वतंत्रा स्वतंत्रतानानात्वेच मंडलेश्वराणा
१ अस्वतंत्रता

यस्मादेवंतस्माद्गृहंहित्वाऽकुतोभयंनृसिंहपादंभजतेत्यसुरान्प्रदिशंति कीदृशंगृहं॥रजस्तमस्तस्माद्रागोऽभिनिवेशःर
जआदीनांमूलंकारणं अतएवसंसृतीनांजन्ममरणादीनांचक्रवालंमंडलमविच्छेदोयस्मात॥१६॥केतुमालेपिकामदे
वस्वरूपेणआस्तइतिशेषः॥किमर्थमास्तेअतआह लक्ष्म्याइति प्रजापतिःसंवत्सरः॥संवत्सरोवैप्रजापतिरिति
श्रुतेः॥तस्यदुहितरोरात्र्यभिमानिन्योदेवताः॥पुत्राः॥दिवसाभिमानिन्योदेवाः॥तेषांचप्रियचिकीर्षयापुरुषायुषावर्ष

तस्माद्द्वेषोरागविषादमन्युमानस्पृहाभयदैन्याधिमूलं॥हित्वागृहंसंसृतिचक्रवालंनृसिंहपादंभ
जेतीकुतोभयमिति॥१६॥केतुमालेभगवान्कामदेवस्वरूपेणलक्ष्म्याःप्रियचिकीर्षयाप्रजापतेर्दुहितृणांपुत्रा
णांतद्वर्षपतीनांपुरुषाहोरात्रिसंख्यानांयासांगर्भोमहापुरुषमहास्त्रतेजसोद्विजितमनसांविध्वस्ताव्यसवःसंव
त्सरांतेविनिपतंति॥१८॥अतीवसुललितगतिविलासविलसितरुचिरहासलेशावलोकलीलयाकिंचिदुत्तंभित
सुंदरभ्रूमंडलसुभगवदनारविंदश्रियारमांरमयन्निंद्रियाणिरमयते॥१९॥तद्भगवतोमायामयंपरमसमाधियो
गेनरमादेवीसंवत्सरस्यरात्रिषुप्रजापतेर्दुहितृभिरुपेताहस्सुचतद्भर्तृभिरुपास्तइदंचोदाहरंति॥२०॥

एतेनयान्यहोरात्राणितैःपरिसंख्यानंगणनायेषांषट्त्रिंशत्सहस्राणामित्यर्थः॥यासांदुहितृणांमहापुरुषस्यमहा
स्त्रंचक्रंतस्यतेजसा॥१८॥रमांरमयन्स्त्रीयानींद्रियाणिरमयते॥केनसाधनेनरमयन्तत्राह॥अतीवसुललितयागत्यायो
विलासस्तेनविलसितोरुचिरोहासलेशोमंदस्मितंतत्सहितोवलोकएवलीलातयाकिंचिदुत्तंभितंउन्नमितंसुंदरंभ्रूमंडलं

तेनसुभगंवदनारविंदंतस्यश्रिया॥१६॥तद्दृष्टैर्भिःदिवसा
धिष्ठातृभिरुपेता॥१७॥

भा० पं०
६७

२४॥ सत्वाय सत्वप्रधानाय॥ मुख्यतमाय प्राणाय॥ सत्वात्मने॥ २५॥ उरुस्वनो वेदात्मकनादो यस्य॥ यइदं वि
श्वं ब्राह्मणादिनाम्ना विनिषेधालंवनभूतेन वशेऽनयत् नियमितवान् सत्वमीश्वरः॥ तथा च श्रुतिः॥ तस्य वाक्
तंतिर्नामानि दामानीति॥ २६॥ नन्विंद्रादयो वशं नयंति॥ लोकपालत्वात् कुतो हं तत्राह॥ यमिति॥ मत्सर एव ज्व

रम्यके च भगवतः प्रियतमं मत्स्यावतार रूपं तद्वर्षपुरुषस्य मनोः प्राक् प्रदर्शितं स इदानीम
पि महत्ता भक्तियोगेनाराधयतीदं चोदाहरति॥ २४॥ ॐ भगवते मुख्यतमायनमः सत्वाय प्राणायौ
जसे वेलाय महामत्स्याय नम इति॥ २५॥ अंतर्बहिश्चाखिललोकपालकैरदृष्टरूपो विचरस्युरुस्वनः
स ईश्वरस्त्वं य इदं वशे नयन्नाम्ना यथा दारुमयीं नरस्त्रियं॥ २६॥ यं लोकपाला किल मत्सरज्वरा हित्वा
यतंतोपि पृथक् समेत्य च पातुं न शेकुर्द्विपदश्चतुष्पदः सरीसृपं स्थाणु यदत्र दृश्यते॥ २७॥ भवान्
युगांतार्णव ऊर्मिमालिनि क्षोणीमिमामोषधिवीरुधां निधिं॥ मया सहोरुक्रमतेऽज ओजसा तस्मै जगत्प्राण
गणात्मने नमः॥ २८॥
रेण यं हित्वा द्विपदः चतुष्पदः सरीसृपं जंगमं स्थाणु स्थावरं यदत्र दृश्यं तत्किंचि
दपि पातुं न शक्ताः॥ सत्वमेव प्रमोणरूपेण पालकः ईश्वरश्चेत्यर्थः॥ तथा च श्रुतिः॥ ता अहिंसत्ताहमुकमस्यहमुक
मस्मीत्यादि॥ २७॥ अवतारचरितमाह भवान् इमां क्षोणीमयामनुना सह॥ मत्सहितां धृत्वेत्यध्याहारः॥ ऊर्मिमालीव
ति प्रलयार्णवे ओजसा क्रमते विचरसि॥ यद्वा॥ पातुमित्यस्यानुषंगः॥ क्षोणीं पातुमुरुसहेत इत्यर्थः॥ यतः अजः कीदृशीं ओष

धीनां वीरुधां च निधिं आश्रयभूतं तस्मै नमः जगतो यः
प्राणगणः तस्यात्मने नियंत्रे॥ २८॥
६७

किंवा निःकामभजनेः प्रार्थिता एव सर्वे कामा भवंति ॥ सकामभजनेन कामितमात्रं अनित्यं चेत्याह ॥ या स्त्री तस्य उक्तलक्ष
णस्य ते पादसरोरुहस्यार्हणं पूजामेव कामयेत्तेन फलांतरं सा अखिलेषु कामेषु लंपटा सर्वान् कामान्प्राप्नोतीत्यर्थः ॥ ईप्सि
तमीप्सितः फलांतरमात्रुमपेक्षितः सन् अर्चितश्चेत्तर्हि देवैकं रासि ददासि ॥ किंच ॥ यद्येतः सर्वकामप्राप्ति फलभोगानंतरं
भग्नायाञ्चा याचितोऽर्थो यस्याः सा प्रतप्यते दुःखं प्राप्नोति तद्देव रासि न तु नित्यं ॥२१॥ ननु ममाहर्षे कुतः सर्वकामप्राप्तिः
त्वमेव कामार्थिभिः सेव्यसे अत्राह ॥ मत्प्राप्तये ब्रह्मादयस्तपस्तप्यंते कुर्वंति ॥ कथंभूताः ॥ ऐंद्रिये सुखे धीर्येषां ॥ अन्तु कुस

यातस्य ते पादसरोरुहार्हणं न कामये सा खिलकामलंपटा ॥ तदेव रासीप्सितमीप्सितोऽर्चितो यद्भग्नयाञ्चा भ
गवन्प्रतप्यते ॥२१॥ मत्प्राप्तयेऽजेशसुरासुरादयस्तप्यंत उग्रं तप ऐंद्रियेधियः ॥ ऋते भवत्पादपरायणान्न मां विंदंत्य
हं त्वद्धृदया यतोऽजित ॥२२॥ स त्वं ममाप्यच्युत शीर्ष्णि वंदितं करांबुजं यत्त्वदधायि सात्वतां ॥ विभर्षि मालक्ष्म
वरेण्य मायया क ईश्वरस्येहितमूहितुं विभुरिति ॥२३॥
मोसः तथापि भवत्पादपरायणान् ऋते मां न विंदंति ॥ मत्क
टाक्षविलसिता विभूतीर्न लभंते इत्यर्थः ॥ यतस्त्वय्येव हृदयं यस्याः सा हृच्चेतः परतंत्रत्वात् त्वदनुवर्तिनमेव विलोक
यामि नान्यमित्यर्थः ॥२२॥ इदानीं तत्कृपां प्रार्थयते ॥ सत्वमिति ॥ यज्ज्ञानं विना न कश्चित्पुरुषार्थः ॥ सत्वं त्वदिति त्वयायत्क
रांबुजं सात्वतां भक्तानां शीर्षि अधायि कृपयान्यस्तं ॥ तन्ममापि शीर्ष्णि निधेहि इति शेषः ॥ कथंभूतं ॥ वंदितं सर्वकामवर्षि
त्वेन सद्भिः स्तुतं ॥ न च मयि तवानादरः ॥ यतो हे वरेण्य मां वक्षसि लक्ष्म विभर्षि ॥ अहो चित्रमेतत् ॥ मयि केवलमादरमात्रं
भक्तेषु परमा कृपा ॥ अत ईश्वरस्य तव यन्मायया ईहितं तत्को वितर्कयितुं समर्थः ॥२३॥

एषात्मरूपधावतीत्यन्वयः॥३४॥ मंत्रैस्तत्त्वेन लिंग्यत इति तथा तस्मै॥ यज्ञात्मयूपाः क्रतवः सयूपाः॥ तद्रूपाय अन्तरए
व महांतोऽध्वरा अवयवभूता यस्य. कर्मशुक्लाय मुख्याय यज्ञानुष्ठात्रे॥ त्रियुगाय कृतयुगे यज्ञाभावात् यद्वा क
लियुगे छन्नत्वात्॥३५॥ कथं यो विद्वांसः विपश्चितो निपुणाः गुणेषु देहेंद्रियादिषु मथ्नंति विविच्यंति॥ मथ्ना वि
वेकसाधनेन मनसा क्रियार्थैः कर्मभिः॥ तत्फलेष्वगूढं अप्रकाशमानं दिदृक्षवः॥ एवं मंथनेऽरितः प्रकटितः

उत्तरेषु च कुरुषु भगवान् यज्ञपुरुषः कृतवराहरूपआस्ते तं तु देवी हैषा भूः सह कुरुभिरस्खलित
भक्तियोगेनोपधावति इमां च परमामुपनिषदमुपधावति॥३४॥ ॐ नमो भगवते मंत्रतत्त्वलिंगाय य
ज्ञक्रतवे महाध्वरावयवाय महापुरुषाय नमः कर्मशुक्लाय त्रियुगाय नमस्ते॥३५॥ यस्य स्वरूपं क
वयो विपश्चितो गुणेषु दारुष्विव जातवेदसं॥ मथ्नंति मथ्ना मनसा दिदृक्षवो गूढं क्रियार्थैर्न
म ईरितात्मने॥३६॥ द्रव्यक्रियाहेतुयनेशकर्तृभिर्मायागुणैर्वस्तुनिरीक्षितात्मने॥ अन्वीक्षया
ङ्गातिशयात्मबुद्धिभिर्निरस्तमायाकृतये नमो नमः॥३७॥

आत्मस्वरूपं यस्य तस्मै नमः॥३६॥ मंथनमेव दर्शयन्नाह॥ द्रव्यं विषयः॥ क्रिया इंद्रियव्यापारः॥ हेतुर्देवता
अयनं देहः॥ ईशः कालः॥ कर्ता अहंकारः॥ एतैर्मायागुणैः कार्यैरुपलक्षणैः वस्तुत्वेन निरीक्षितो य आत्मा त
स्मै॥ अन्वीक्षया विचारेण अंगैर्यमनियमादिभिः॥ अतिशयात्मा निश्चयवती बुद्धिर्येषां तैः॥ निरस्ता मायाकृति

तत्प्रियतमां तां प्रियतमां ।।२९।। अकूपाराय कूर्माय ।। सर्वसत्त्वगुणैः सत्त्वगुणो विशेषणं यस्य न उपलक्षितं स्थानं यस्य वा
स्थिरत्वात् ।। वर्ष्मणे वर्षीयसे कालानवच्छिन्नाय ।। भूम्ने सर्वगताय ।। अवस्थानाय आधाराय ।।३०।। निजमायया अर्पितं
प्रकाशितं अर्थस्वरूपं दृश्यं पृथिव्यादि यस्यैव रूपं ।। यतः पृथक् नास्ति ।। कथंभूतं बहुभिः रूपैः रूपितं यस्य च

हिरण्मयेऽपि भगवान्निवसति कूर्मतनुं बिभ्राणस्तस्य तत्प्रियतमां तनुमर्यमा सह वर्षपुरुषैः पितृग
५३ णाधिपतिरुपधावति मंत्रमिमं चानुजपति ।।२९।। ॐ नमो भगवते अकूपाराय सर्वसत्त्वगुणविशेषणा
यानुपलक्षितस्थानाय ।। नमो वर्ष्मणे नमो भूम्ने नमो नमोऽवस्थानाय नमस्ते ।।३०।। यद्रूपमेतन्निजमाय
यार्पितमर्थस्वरूपं बहुरूपरूपितं ।। संख्या न यस्यास्त्ययथोपलंभनात्तस्मै नमस्तेऽव्यपदेशरूपिणे ।।३१।।
जरायुजं स्वेदजमंडजोद्भिदं चराचरं देवर्षिपितृभूतमैंद्रियं ।। द्यौः खं क्षितिः शैलसरित्समुद्रद्वीपग्रहर्क्षे
त्यभिधेय एकः ।।३२।। यस्मिन्नसंख्यविशेषनामरूपाकृतौ कविभिः कल्पितेयं ।। संख्या यया तत्त्वदृशापनी
यते तस्मै नमः सांख्यनिदर्शनाय ते इति ।।३३।।

संख्या नास्ति कुतः ।। अयथा मिथ्यैवोपलंभनात् ।। न हि मरीचिकाजलमेतावदिति संख्यातुं शक्यते ।। अव्यपदेशरूपिणे अ
निरुक्ताय पंचाकाराय ।।३१।। बहुरूपत्वं दर्शयन् तस्यैश्वराद्व्यतिरेकमाह जरायुजेति ।। द्वीपग्रहर्क्षमित्यभिधेयत्वमेवैकः ।।
न व्यतिरिक्तोऽस्ति सर्वं खल्विदं ब्रह्मेत्यादिश्रुतेरित्यर्थः ।।३२।। प्रपंचतामनूद्य तन्निरासेन प्रणमति ।। असंख्याय अनंता
स्त्रिविशेषा येषां तानि नामानि रूपाण्याकृतयो यस्य ताहशाय यस्मिन् तत्त्वोपिकविभिः कपिलादिभिरियं चतुर्विंशत्यादि म

संख्या कल्पिता सती ।। यया तत्त्वदृशा येन तत्त्वज्ञानेन अपनीयते ।। तस्मै ते सांख्यसिद्धांतमूलाय नमः परमार्थरूपायेति
वा ।।३३।।

भा० पं० ६९ भर्त्तोचासौभगवांश्चतस्यकथां ॥ २ ॥ आर्य्याणिलक्षणानि शीलं व्रतं च यस्मिन् ॥ उपशिक्षितात्मने संयतचित्ताय ॥ उपासि-
तोनुरक्तोलोकोयेन ॥ साधुवादः साधुत्वप्रसिद्धिः तस्य निकषणाय निष्ठाश्मवन्निर्द्धारस्थानाय परमसीम्ने इत्यर्थः
॥ ३ ॥ श्रीरामं परमार्थरूपेण प्रणमति ॥ यदेकं वेदान्तेषु प्रसिद्धं तत्त्वं तत्प्रपद्ये ॥ कथंभूतं विशुद्धश्चासावनुभवश्च स एव मा-

आर्ष्टिषेणेन सह गंधर्वैरनुगीयमानां परमकल्याणीं भर्तृभगवत्कथां समुपशृणोति स्वयं चेदं
गायति ॥ २ ॥ ॐ नमो भगवते उत्तमश्लोकाय नम आर्य्यलक्षणशीलव्रताय नम उपशिक्षितात्म-
ने उपासितलोकाय नमः साधुवादनिकषणाय नमो ब्रह्मण्यदेवाय महापुरुषाय महाराजाय
नम इति ॥ ३ ॥ यत्तद्विशुद्धानुभवमात्रमेकं स्वतेजसाध्वस्तगुणव्यवस्थं ॥ प्रत्यक्प्रशांतं सुधियो-
पलंभनं ह्यनामरूपं निरहं प्रपद्ये ॥ ४ ॥

त्रं स्वरूपं यस्य ॥ विशुद्धत्वे हेतुः स्वतेजसा स्वरूपप्रकाशेन ध्व-
स्ताः गुणानां विविधा जाग्रदाद्यवस्था यस्मिन् अनुभवमात्रत्वे हेतुः प्रत्यक् दृश्यादन्यत् ॥ तत्कुतः ॥ अना-
मरूपं ॥ ननु वस्तुन एवंभूतस्याविद्याजीवस्योक्तसर्वविपर्य्ययो दृश्यते तत्राह निरहं कोराभावात्तथावै परी-
त्यमित्यर्थः ॥ ननु श्रीरामस्य स्वरूपं नैवं प्रतीयते तत्राह सुधिया पुंसा उपलभ्यते इत्युपलंभनं शुद्धचित्ते
न ब्रह्मत्वेनैवोपलभ्यत इत्यर्थः ॥ ४ ॥ दुमर

६९

तं देवं निर्गुणरूपेण तत्वा परमेश्वररूपेण प्रणमति॥ करोतीति॥ यस्येन्दितं जीवार्थमीसितं अत्र तं तानि छाया
नी दृशां यो ज्ञातं॥ स्वार्थं॥ ने प्सितं॥ विश्वस्थित्यादि स्व गुणैर्मायया करोति॥ न स्पाजं ईश्वर सेनिधानात् प्रवृ
त्तिर् दृष्टां तेनाह॥ यथा अयो लोहं ग्रावणोऽयस्कांतान्निमित्तात् भ्रमति तदाश्रयं तं दभ्मु खं सत्व गुणानां कर्मणां
जीवादृष्टानां यसाक्षिणे तस्मै नमः॥ ३॥ प॥ अवतारचरितमाह॥ प्रत्ययोत योजगताभादिः कारणभूत शूकरः मांद्य
करोति विश्वस्थितिसंयमोदयं यस्येप्सितं नेप्सित मीक्षितु गुणैः॥ माया यथायो भ्रमते तदाश्रयं ग्रा
वणो नमस्ते गुणकर्मसाक्षिणे॥ ३॥ प॥ प्रमथ्य दैत्यं प्रतिवारणं मृधे यो मां रसाया जगदादिसूकरः॥ कृ
त्वाग्रदंष्ट्रे निरगादुदन्वतः क्रीडन्निवेभः प्रणतास्मि तं विभुं॥ ३८॥ इति श्रीमद्भागवते महापुराणे पंचमस्कं
धे भुवनकोशवर्णने मष्टादशोध्यायः॥ १८॥ श्रीशुक उवाच॥ किंपुरुषवर्षे भगवंतमादिपुरुषं लक्ष्मणा
ग्रजं सीताभिरामं तच्चरणसंनिकर्षाभिरतः परमभागवतो हनूमान्सह किंपुरुषैरविरतभक्तिरुपास्ते॥ १॥
थिवीं अग्रदंष्ट्रे दंष्ट्राग्रे कृत्वा रसातलादारभ्य उदन्वतः प्रलयार्णवात्॥ इभो गजेन्द्र इव निरगात्॥ ततश्च प्रति
गज तुल्यं दैत्यं प्रमथ्य यः क्रीडन्नास्थितः तं विभुं प्रणतास्मीत्यन्वयः॥ ३८॥ इति पंचमेष्टादशः॥ १८॥ ॐ नवविं
शे किंपुरुषे भारते चोपवर्ण्यते॥ सेव्यसेवकभावश्च भारतश्रेष्ठ्यमेव च॥ १॥ रामरामरामरामरामरामरामरा

भा० पं० तस्मात्सुरोवान्योवायःकोपिराममेवसर्वप्रकारेणभजेत सुकृतज्ञं।अल्पीयस्यपिभजनेबहुमानिनं।उत्तरानकु
७० रून्कोशलान्।अयोध्यावासिनः॥८॥उपचितैर्धर्मादिभिरात्मोपलभ्यते येन तत्तपश्चरति।तत्र उपशमः इंद्रि
याणांसंयमः।उपरमोनिरहंकारता।आत्मवतामनुग्रहाय नस्वार्थं ईश्वरत्वात्॥९॥भगवदनुभावउपवर्ण्य

सुरोऽसुरोवाप्यथवानरोनरःसर्वात्मनायःसुकृतज्ञमुत्तमं॥भजेतराममनुजाकृतिंहरिंयउत्त
राननयत्कोशलान्दिवमिति॥८॥भारतेपिवर्षेभगवान्नरनारायणाख्यआकल्पांतमुपचितध
र्मज्ञानवैराग्यैश्वर्योपशमोपरमात्मोपलंभनमनुग्रहायात्मवतामनुकंपयातपोऽव्यक्तगति म४
श्चरति॥९॥तंभगवान्नारदोवर्णाश्रमवतीभिर्भारतीभिःप्रजाभिर्भगवत्प्रोक्ताभ्यांसांख्ययोगाभ्यांभगव
दनुभावोपवर्णनंसावर्णेरुपदेक्ष्यमाणःपरमभक्तिभावेनोपसरति इदंचाभिगृणातीति॥१०॥ॐन
मोभगवतेउपशमशीलायोपरतानात्म्यायनमोकिंचनवित्तायऋषिऋषभायनरनारायणायपरम
हंसपरमगुरवेआत्मारामाधिपतयेनमोनमइति॥११॥

ते येन पंचरात्रेण।तत्सावर्णेः।मनोः उपसरति सेवते॥१०॥उपरतानात्म्याय निरहंकारायेम्॥११॥ ७०

वनौ १

कथं तर्हि दशरथपुत्रत्वं तेनाचरितमित्याह ॥ विभोर्मर्त्यावतारस्तु रक्षसो रावणस्य वधाय तस्य मनुष्यादन्यतोऽवध्यत्वा
त् ॥ न केवलमेतावत् किंतु इह संसारे स्त्रीसंगादिकृतं दुःखं दुर्वारमिति मर्त्यानां शिक्षणं च शिक्षार्थमपीत्यर्थः ॥ अ
न्यथा स्वे स्वरूपे रममाणस्य जगदात्मनः सीताविरहकृतानि व्यसनानीति कुतः स्यात् ॥५॥ विषयासक्त्यभावेन व्यस
नाभावमुपपादयति ॥ न वै स भगवान् त्रिलोक्यां क्वापि शक्तः यतः आत्मवतां धीराणामात्मा सुहृत्तमश्च अतो न स्त्री

१ ता॰

मर्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोः ॥ कुतोन्यथा स्याद्रमतः स्व आत्मनः सी
ता कृतानि व्यसनानीश्वरस्य ॥५॥ न वै स आत्मात्मवतां सुहृत्तमः सक्तस्त्रिलोक्यां भगवान् वासुदेवः ॥ न स्त्री
कृतं कश्मलमश्नुवीत न लक्ष्मणं चापि विहातुमर्हति ॥६॥ न जन्म नूनं महतो न सौभगं न वाङ् न बु
द्धिर्नाकृतिस्तोषहेतुः ॥ यैर्विसृष्टानपि नौकसश्चकार सख्यं [illegible] बत लक्ष्मणाग्रजः ॥७॥

कृतं मोहं प्राप्नुयात् ॥ न लक्ष्मणं चेति देवदूतेन श्रीरामं मंत्रयिता विज्ञापितं ॥ अत्रागतस्त्वयावध्य इति तद्दे
वद्वारस्थितं लक्ष्मणं दुर्वाससमागतं विज्ञापयितुं प्रविष्टं हंतुमुद्यतो वशिष्ठवाक्यात्त्यज ॥ तच्च न युज्यत इत्य
र्थः ॥६॥ अतः श्रीरामएव सर्वैः सेव्य इति वक्तुं न तस्य तोषहेतुः सत्कुलजन्मादि किंतु भक्तिरेवेत्याह ॥ न जन्मे
ति महतः पुरुषाज्जन्म महतः श्रीकृष्णस्येति वा ॥ सौभगं सौन्दर्यं आकृतिर्जातिः ॥ यद्यस्मात्तैर्जन्मादिभिर्विसृ

ष्टानप्यक्षानपि नो वनेचरान् बत अहो लक्ष्मणस्याग्रजोपि सखित्वे कृतवान् ॥७॥

भा० पं० इलावृतवदस्मिन्नपि वर्षे सरितः शैलाश्च संति नितंबप्रभवाः तेभ्यः संभूताः ॥१६॥ आत्मना च देहेनाप्युपस्पृशंति ए
७१ लब्धं जन्म यैस्तैः पुरुषैः । सात्विकादिस्वकृतेन कर्मणा दिव्यादिगतय आत्मनो विधीयंते हि यस्मात्सर्वा एव गतयः क

भारतेप्यस्मिन्वर्षे सरिच्छैलाः संति हि बहवः मलयो मंगलप्रस्थो मैनाकस्त्रिकूट ऋषभः कूटकः कोल्लकः सह्यो
देवगिरिः ऋष्यमूकः श्रीशैलो व्यंकटो महेंद्रो वारिधारो विंध्यः शुक्तिमान् ऋक्षगिरिः पारिपात्रो द्रोणश्चित्रकूटो
ए: ३ गोवर्द्धनो रैवतकः ककुभो नीलो गोकामुख इंद्रकीलः कामगिरिरिति चान्ये च शतसहस्रशः शैलास्तेषां नितं
बप्रभवा नदा नद्यश्च संत्यसंख्याताः ॥१६॥ एतासामपो भारत्यः प्रजा नामभिरेव पुनंतीनामात्मना चो
पस्पृशंति ॥ चंद्रवशा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणा पयस्विनी शर्करावर्त्ता तुंगभद्रा कृ
ष्णवेणी भीमरथी गोदावरी निर्विंध्या पयोष्णी तापी रेवा सुरसा नर्मदा चर्मण्वती सिंधुरंधः शोणश्च नदौ म
हानदी वेदस्मृती ऋषिकुल्या त्रिसामा कौशिकी मंदाकिनी यमुना सरस्वती दृषद्वती गोमती सरयू रोधव
सप्तवती ती सुषोमा शतद्रूश्चंद्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्यः ॥१८॥ अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्म
भिः शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्मणा दिव्यमानुषनारकगतयो बह्व्य आत्मन आनुपूर्व्येण सर्वा ह्येव
सर्वेषां विधीयंते ॥ यथा वर्णविधानमपवर्गश्चापि भवति ॥१९॥

र्मानुसारेण सर्वेषां भवंति यस्य वर्णस्य यद्विधानं मोक्षप्रकारः संन्यासवनस्थत्वादि तदनतिक्रमेण अस्मिन्ने
व वर्षे नृणामपवर्गश्च भवति । एतच्च कर्मादिवत्कुसाधनस्य भवाभिप्रायेण प्रोक्तं ॥ नन्वन्यत्रापवर्गाभावेन तदुपर्य

पिवाद्दायणः संभवादिति देवानामपि मोक्षस्य स्पृह
णीयत्वात् ॥१८॥

७१

ऽश्रशक्तश्चासौ विविक्तश्च साक्षी च तस्मै नमः ॥ अशक्तत्वं दर्शयन्ति ॥ अस्य विश्वस्य सर्गादिषु कर्त्तृयो न बध्यते अ
हं कर्तेति न मन्यते ॥ विविक्तत्वमाह ॥ देहगतोपि दैहिकैः क्षुत्पिपासादिभिर्यो न हन्यते नाभिभूयते ॥ साक्षित्वमाह य
स्य द्रष्टुरपि सतो दृशिर्गुणैर्दृश्यैर्न दूष्यते ॥ न विक्रियते ॥ १२ ॥ योगकौशलं निरूपयन् योगं प्रार्थयते इदमिति त्रिभिः
हे योगेश्वर ॥ हिरण्यगर्भो यद्योगनैपुण्यं जगाद ॥ इदमेव तत् ॥ किंच जन्मप्रभृति भक्त्या अंतकाले पुमान् ॥ त्वयि मनो धा

गायंति चेदं ॥ कर्तास्य सर्गादिषु यो न बध्यते न हन्यते देहगतोपि दैहिकैः ॥ द्रष्टुर्न दृग्यस्य गुणैर्विदूष्यते
तस्मै नमोऽसक्तविविक्तसाक्षिणे ॥ १२ ॥ इदं हि योगेश्वर योगनैपुणं हिरण्यगर्भो भगवान् जगाद यत् ॥ य
दंतकाले त्वयि निर्गुणे मनो भक्त्या दधीतोज्झितदुःकलेवरः ॥ १३ ॥ यथैहिकामुष्मिककामलंपटः सुतेषु दा
रेषु धनेषु चिंतयन् ॥ शंकेत विद्वान् कुकलेवरात्ययाद्यस्तस्य यत्नः श्रम एव केवलं ॥ १४ ॥ तन्नः प्रभो त्वं कु
कलेवरार्पितां त्वन्माययाहंममतामधोक्षज ॥ भिंद्याम येनाशु वयं सुदुर्भिदां विधेहि योगं त्वयि नः स्वभा
वमिति ॥ १५ ॥

रयेदिति यत् कथंभूतः सन् उज्झितं दुःकलेवरं तदभिमानो येन ॥ १३ ॥ अन्यथा तस्य शास्त्राभ्या
सादिश्रमो व्यर्थ इत्याह ॥ ऐहिकामुष्मिककामेषु लंपटो मूर्खः सुतादिषु योगक्षेमं चिंतयन् कुत्सितस्य कलेवरस्या
त्ययान्मृत्योः शंकेत तथा विद्वानपि सन् यः शंकेत तस्य यत्नः श्रम एव ॥ १४ ॥ यस्माद्विदुषोऽपीयमेव दशा तत्तस्मा
द्धे प्रभो अधोक्षज त्वमेव नो योगं विधेहि ॥ कीदृशं त्वयि स्वभावं सहजवासनारूपं येन योगेन वयं त्वन्माययानःकुक

भा०पं० ७२

क्षणमल्पमेवायुर्येषां वरत्वे हेतुः मर्त्येनापि देहेन क्षणेनैव वा कालेन कृतं कर्म संन्यस्य परं सम्यग्यांति ॥२३॥ अतः य
त्र वैकुंठकथामृतनद्यो संति ॥ तदाश्रयाः कथापगाश्रयाः ॥ महांतो नृत्या द्युसवो येषु तादृशा यज्ञेशमखाश्च प्रज्ञाः
सः सुरेशस्य ब्रह्मणोऽपि लोको न सेव्यतां ॥२४॥ अमुमुक्षून्नितरान्निंदंति ॥ ज्ञानं च तत्त्वार्थः ॥ क्रियाश्च तदर्थानि
द्रव्याणि च तेषां कलापेन ॥ संभृतां पूर्णां ॥ अपुनर्भवाय मोक्षाय ॥ वनौकाः इव ॥ वनौकसः पक्षिणो यथा लुब्ध

कल्पायुषां स्थानजयात्पुनर्भवात्क्षणायुषां भारतभूजयो वरं ॥ क्षणेन मर्त्येन कृतं हरे मनः संन्य
स्य संयांत्यभयं पदं हरेः ॥२३॥ न यत्र वैकुंठकथापगा न साधवो भागवतास्तदाश्रयाः ॥ न यत्र यज्ञेशम
खा महोत्सवाः सुरेशलोकोऽपि न वै स सेव्यतां ॥२४॥ प्राप्ता नृजातिं त्विह ये च जंतवो ज्ञानक्रियाद्रव्यकलाप
संभृतां ॥ न वै यतेरन्नपुनर्भवाय ते भूयो वनौका इव यांति बंधनं ॥२५॥ यैः श्रद्धया बर्हिषि भागशो हविर्नि
रुप्तमिष्टं विधिमंत्रवस्तुतः ॥ एकः पृथङ्नामभिराहुतो मुदा गृह्णाति पूर्णः स्वयमाशिषां प्रभुः ॥२६॥

कामं मुक्ता अपि पुनर्यदि तस्मिन्नेव वर्षे प्रमत्ता विहरंति ॥ तर्हि यथावध्यं तेतद्वत् ॥२५॥ अहो भारतवासिनां भाग्यमि
त्याहुः ॥ यैरिति ॥ अग्नये जुष्टं निर्वपामि इंद्राय जुष्टं निर्वपामीत्येवं भागशो निरुप्तं पृथक्कृतं ॥ कथं विना प्रकारेण
वस्तुतश्चरुपुरोडाशादिभेदेन इष्टं देवतामुद्दिश्य त्यक्तं निरुप्तं च ममेदमिति स्वीकृत्य त्यागानंतरमश्नातीत्यर्थः ॥ पृ
थक् इंद्रादिनामभिराहुतः ॥ आहुतः ॥ आशिषां प्रभुः ॥ स्वयं पूर्णोऽपि हरिः ॥२६॥

७२

अपवर्गस्वरूपमाह॥ योसाविति॥ अनात्म्ये आत्मनि भवमात्म्यं रागादि तद्रहिते॥ अनिरुक्ते वाचामगोचरे॥ अनिल
यने अनाधारे अनन्यनिमित्तो ऽहेतुको भक्तियोग एव लक्षणं स्वरूपं यस्य कथं भवति॥ नानागतीनां निमित्तं या
विद्याग्रंथिः॥ तस्य रंधनं छेदनं तद्वारेण महापुरुषरूपाः विष्णुभक्तास्तैः प्रकृष्टः संयोगो यदा भवति तदा॥ १९॥
एतदेव मानुष्यमेव सर्वपुरुषार्थसाधनं गायंति॥ अमीषां एभिः उक्तस्वित्॥ अथवा स्वयमेव साधनं विनैव हरिरेषां

योसौ भगवति सर्वभूतात्मन्यनात्म्येऽनिरुक्तोऽनिलयने परमात्मनि वासुदेवेऽन्यनिमित्तभक्तियोग
लक्षणो नानागतिनिमित्ताविद्याग्रंथिरंधनद्वारेण यदा हि महापुरुषपुरुषप्रसंगः॥ १९॥ एतदेव हि
देवा गायंति॥ अहो अमीषां किमकारि शोभनं प्रसन्न एषां स्विदुत स्वयं हरिः॥ यैर्जन्म लब्धं नृषु भारताजि
रे मुकुंदसेवौपयिकं स्पृहा हि नः॥ २०॥ किं दुष्करैर्नः क्रतुभिस्तपोव्रतैर्दानादिभिर्वा द्युजयेन फल्गुना॥ नय
यत्र नारायणपादपंकजस्मृतिः प्रमुष्टातिशयेंद्रियोत्सवात्॥ २१॥ प्रसन्नो भूत् एवंभूतस्य पुण्यस्य दुष्करत्वात्
भारताजिरे भारतांगणे नः केवलं स्पृहैव यत्र तत्र मुकुंदसेवोपयोगि नृषु जन्म यैर्लब्धं॥ २०॥ स्पृहामेवाह॥ किमित्यादि
सप्तभिः दुष्करैः क्रत्वादिभिः नः फल्गुना तुच्छेन द्युजयेन सर्वस्वर्गप्राप्त्या किं न किंचित्फलं॥ कुतः॥ यत्र नारायणपा
दपंकजस्मृतिर्नास्ति॥ प्रत्युत अतिशयितादिंद्रियाणामुत्सवात् भोगात्प्रमुष्टा भ्रष्टा॥ २१॥

भा० पं०

७३

तावताल्लवणविस्तारेण परिक्षिप्तः परिवेष्टितः॥ उपास्ते तिष्ठति॥ आकलय्य समर्प्य॥ २॥ अभिज्ञाताः प्रसिद्धाः स-
प्तैव॥ अन्येच पर्वता नद्यश्च सहस्रशः संतीत्यर्थः॥ मानसोत्तरस्य मंडलाकारत्वोक्तेरैते प्लक्षादिपंच द्वीपेषु

जंबूद्वीपोयं यावत्प्रमाणविस्तारस्तावता क्षारोदधिना परिवेष्टितो यथा मेरुर्जंब्वाख्येन लवणोदधि
रपि ततो द्विगुणविशालेन प्लक्षाख्येन परिक्षिप्तो यथा परिखा बाह्योपवनेन प्लक्षो जंबूप्रमाणो द्वीपाख्याक
रो हिरण्मय उत्थितो यत्राग्निरुपास्ते सप्तजिह्वः तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वः स्वं द्वीपं
सप्तवर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम॥ २॥ शिवं यवसं सु
भद्रं शांतं क्षेमममृतमभयमिति वर्षाणि तेषु गिरयो नद्यश्च सप्तैवाभिज्ञाताः॥ ३॥ मणिकूटो वज्र
कूट इंद्रसेनो ज्योतिष्मान्सुपर्णो हिरण्यष्ठीवो मेघमाल इति सेतुशैलाः॥ अरुणा नृम्णांगि
रसी सावित्री सुप्रभाता ऋतंभरा सत्यंभरा इति महानद्यः॥ यासां जलोपस्पर्शनविधूतरजस्तमसो हं
सपतंगोर्ध्वायनसत्यांगसंज्ञाश्चत्वारो वर्णाः सहस्रायुषो विबुधोपमसंदर्शनप्रजननाः स्वर्गद्वारं त्रय्या
विद्यया भगवंतं त्रयीमयं सूर्यमात्मानं यजंते॥ ४॥

वर्षाद्रयस्तिर्यग्रेखाकारा उभयतोऽब्धिस्पर्शांता इति गम्यते॥ अन्यथा सप्तभिः सप्तवर्षविभागासंभवात्
वैसमवेवर्षाणां पूर्वादिक्रमो ज्ञेयः॥ ३॥ जलोपस्पर्शनेन विधूतं रजस्तमश्च येषां॥ हंसादयो ब्राह्मणादिस्था

७३

तत्रापि निष्कामाः कृतार्था इत्याह ॥ सत्यमिति प्रार्थितः सन्नर्थितं ददातीति सत्यं ॥ अथापि परमार्थदो न भवत्येव य
स्माद्यतो दत्तादनंतरं पुनरप्यर्थिता भवंति ॥ ननु नार्थितमेव किमपि न दद्यादित्याशंक्याह ॥ अनिच्छतां निष्कामानां
तु इच्छानां पिधानमाच्छादनं ॥ सर्वकामपरिपूरकं निजपादपल्लवं स्वयमेव संपादयति ॥ २६ ॥ स्विष्टस्य सम्यग्यजन
स्य कृतस्य अन्यस्यापि कर्मणः स्वर्गसुखादुपभुक्तादवशेषितं ॥ यदि किंचिदस्ति ॥ तेनाजनाभे वर्षे नोऽस्माकं जन्मस्या

सत्यं दिशत्यर्थितमर्थितो नृणां नैवार्थदो यत्पुनरर्थिता यतः ॥ स्वयं विधत्ते भजतामनिच्छतामिच्छापिधानं नि
जपादपल्लवं ॥ २७ ॥ यद्यत्र नः स्वर्गसुखावशेषितं स्विष्टस्य सूक्तस्य कृतस्य शोभनं ॥ तेनाजनाभे स्मृतिमज्जन्म नः
स्याद्वर्षे हरिर्यद्भजतां शं तनोति ॥ २८ ॥ श्रीशुक उवाच ॥ जंबूद्वीपस्य च राजन्नुपद्वीपानष्टौ हैक उपदिशंति सग
रात्मजैरश्वान्वेषण इमां महीं परितो निखनद्भिरुपकल्पितान् ॥ २९ ॥ तद्यथा ॥ स्वर्णप्रस्थश्चंद्रशुक्ल आवर्तनो र
मणको मंदरहरिणः पांचजन्यः सिंहलो लंकेति ॥ ३० ॥ एवं तव भारतोत्तम जंबूद्वीपवर्षविभागो यथोपदेशमुपव
र्णित इति ॥ ३१ ॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे जंबूद्वीपवर्णनं नामैकोनविंशोऽध्यायः ॥ १९ ॥ ऋषिरुवाच ॥
अतः परं प्लक्षादीनां प्रमाणलक्षणसंस्थानतो वर्षविभाग उपवर्ण्यते ॥ १ ॥

तत्र कीदृशं स्मृतिमत्तत्राह हरिरेव सेव्य इत्यनुसंधानयुक्तं ॥ यतः हरिर्भजतां शं सुखं तनोति ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ इति
पंचमे एकोनविंशः ॥ १९ ॥ विंशे प्लक्षादिषड्द्वीपस्थितिमाह सहार्णवैः ॥ लोकालोकस्थितिं चांतर्बहिर्भागादि

कं

मततः ॥ १९ ॥

भा० पं० स्वगोभिः स्वरश्मिभिः॥ अंधः अन्नं सोमो राजा आस्तु आभिमुख्येन भवतु॥ कृष्णपक्षे शुक्लपक्षे च विविक्तया संध्यभावः
७४ १२॥ एवं सुरोदाद्बहिर्घृतोदेनावृतः कुशद्वीप इत्यन्वयः॥ स्तम्बशष्पाणि स्वकोमलशिखास्तेषां रोचिषा॥१३॥१४॥१५॥१६

स्वगोभिः पितृदेवेभ्यो विभजन् कृष्णशुक्लयोः॥ प्रजानां सर्वासां राजा सोमो न आस्त्विति॥१४॥ एवं सु
रोदाद्बहिस्तद्द्विगुणः समानेनावृतो घृतोदेन यथापूर्वः कुशद्वीपो यस्मिन् कुशस्तंबो देवकृतस्तद्द्वी
पाख्यायनो ज्वलन इवापरः स्वशष्परोचिषा दिशो विराजयति॥१३॥ तद्द्वीपपतिः प्रैयव्रतो राजन् हिरण्य
रेता नाम स्वं द्वीपं सप्तभ्यः स्वपुत्रेभ्यो यथाभागं विभज्य स्वयं च तप आतिष्ठत्॥१४॥ वसुवसुदानदृढ
रुचिनाभिगुप्तः सत्यव्रतविप्रनामदेवनामभ्यस्तेषां वर्षेषु सीमागिरयो नद्यश्चाभिज्ञाः सप्त सप्तैव॥ चक्र ता: ५
श्चतुःशृंगः कपिलश्चित्रकूटो देवानीक ऊर्ध्वरोमा द्रविण इति॥१५॥ रसकुल्या मधुकुल्या मित्रविंदा
श्रुतविंदा देवगर्भा घृतच्युता मंत्रमालेति यासां पयोभिः कुशद्वीपौकसः कुशलाः कोविदा
भियुक्तकुलकसंज्ञा भगवंतं जातवेदः स्वरूपिणं कर्मकौशलेन यजंते॥१६॥ परस्य ब्रह्मणः साक्षा
ज्जातवेदोऽसि हव्यवाट् देवानां पुरुषांगानां यज्ञेन पुरुषं यजेति॥१७॥

हे जातवेदः॥ त्वं साक्षात्परस्य ब्रह्मणो हरेर्हव्यवाडसि॥ अतो देवानां यज्ञेन पुरुषं हरिमेव यज॥ अंगानां नाम्ना
दत्तं मम मिने समर्पयेदित्यर्थः॥१७॥ ७४

विगीता अपि द्वीपमंत्रा व्याख्यायंते ॥ प्रत्नस्य पुराणपुरुषस्य विष्णोर्यद्रूपं तं सत्यर्यं ईमहीति शरणं व्रजेम ॥ कथंभूतं
सत्यादीनामात्मानं अधिष्ठातारं ॥ तत्र सत्यं अनुष्ठीयमानो धर्मः ॥ ऋतं प्रीयमानो धर्मः ॥ ब्रह्मणस्तद्बोधकस्य दे
प्रत्नस्य विष्णो रूपं च सत्यस्य ऋतस्य ब्रह्मणः ॥ अमृतस्य च मृत्योश्च सूर्यमात्मानमीमहीति ॥ ५ ॥ प्लक्षादि
षु पंचसु पुरुषाणामायुरिंद्रियमोजः सहो बलं बुद्धिर्विक्रम इति च सर्वेषामौत्पत्तिकी सिद्धिरविशेषेण वर्तते
६ ॥ प्लक्षः स्वसमानेनेक्षुरसोदेनावृतो यथा तथा द्वीपोपि शाल्मली द्विगुणविशालः समानेन सुरोदेनावृ
तः परिवृंक्ते ॥ ७ ॥ यत्र ह वै शाल्मली प्लक्षायामा यस्यां वाव किल निलयमाहुर्भगवतश्छंदःस्तुतः पत
त्रिराजस्य सा द्वीपहूतय उपलक्ष्यते ॥ ८ ॥ तद्द्वीपाधिपतिः प्रियव्रतात्मजो यज्ञबाहुः स्वसुतेभ्यः सप्त
भ्यस्तन्नामानि सप्त वर्षाणि व्यभजत् सुरोचनं सौमनस्यं रमणकं देववर्षं पारिभद्रमाप्यायनं अवि
ज्ञातमिति ॥ ९ ॥ तेषु वर्षाद्रयो नद्यश्च सप्तैवाभिज्ञाताः स्वरसः शतशृंगो वामदेवः कुंदः कुमुदः पु
ष्पवर्षः सहस्रश्रुतिरिति अनुमतीः सिनीवाली सरस्वती कुहू रजनी नंदा राकेति ॥ १० ॥ तद्वर्षपुरुषाः
श्रुतधरवीर्यधरवसुंधरेषुंधरसंज्ञा भगवंतं वेदमयं सोममात्मानं वेदेन यजंते ॥ ११ ॥
वस्य अमृतस्य शुभफलस्य मृत्योः अशुभफलस्य ॥ ५ ॥ ६ ॥ ७ ॥ सुपर्णोसि गरुत्मान् त्रिवृत्ते शिर इत्यादिश्रुतेः छंदो

भिः स्वावयवैः श्रीविष्णुं स्तौतीति छंदःस्तुत् ॥ तस्य द्वीप
स्य हूतये व्यपदेशाय ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

यस्य पर्णो न्यंतर्व्वहिः खरस्मृदुस्पर्शोति ३

भा० पं० दध्नो मंडं इरसः ॥ सर्व्वोदकं यस्य ॥ यस्य पर्णो निर्व्वंतः खरस्पर्शो निवहिर्म्मृदुस्पर्शो न ति स शाको नाम वृक्षः ॥२४॥
७५ एवं पुरस्तात्क्षीरोदात्परित उपवेशितः शाकद्वीपो द्वात्रिंशल्लक्षयोजनायामः समानेन च दधि
मंडोदेन परिवेष्टितः यस्मिन्ह शाको नाम महीरुहः स्वक्षेत्रव्यपदेशको यस्य ह महासुरभि
गंधस्तं द्वीपमनुवासयति ॥२४॥ तस्यापि प्रैयव्रत एवाधिपतिर्न्नाम्ना मेधातिथिः सोपि विभज्य सप्त
वर्षाणि पुत्रनामानि तेषु स्वात्मजान् पुरोजव मनोजव पवमान धूम्रानीक चित्ररेफ बहुरूप विश्वा
धार संज्ञान्निधाप्याधिपतीन्स्वयं भगवत्यनंत आवेशितमतिस्तपोवनं प्रविवेश ॥२५॥ एतेषां व
र्षमर्यादागिरयो नद्यश्च सप्त सप्तैव ईशान उरुशृंगो बलभद्रः शतकेशरः सहस्रस्रोतो देव
पालो महानस इति ॥२६॥ अनघायुर्द्दा उभयस्पृष्टिरपराजिता पंचपदी सहस्रस्रुतिर्न्निजधृतिरि
ति ॥२७॥ तद्वर्षपुरुषा ऋतव्रत सत्यव्रत दानव्रतानुव्रतनामानो भगवंतं वाय्वात्मकं प्राणायाम विधू
तरजस्तमसः परमसमाधिना यजंते ॥२८॥ अंतः प्रविश्य भूतानि यो बिभर्त्यात्मकेतुभिः ॥ अंतर्यामी
श्वरः साक्षात्पातु नो यद्वशे स्फुटम् ॥२९॥

२५ ॥ राम राम राम राम ॥ २६ ॥ राम राम राम राम ॥ २७ ॥ २८ ॥ आत्मकेतुभिः ॥ प्राणवृत्तिभिः ॥ २९ ॥ राम ७५

उपप्लक्षद्वीपो वेष्टितः ॥ यथा कुशद्वीपो घृतोदेन वेष्टितः ॥१८॥ गुहस्य कार्त्तिकेयस्य प्रहरणेनायुधेन तु उन्मथितानि नितंबाः कुं
ञ्जानि च यस्य ॥१९॥ स्वयं भगवान् ज्ञानी परमकल्याणं यशो यस्य ॥२०॥ ॥२१॥ आपोमयं अम्मयं ॥२२॥ हे आपः पुरुषवीर्या इति

यथा वहिः क्रौंचद्वीपो द्विगुणः समानेन क्षीरोदेन परित उपक्लृप्तो वृतो यथा कुशद्वीपो घृतोदेन ॥ यस्मिन्
क्रौंचो नाम पर्वतराजो द्वीपनामनिवर्त्तक आस्ते ॥१८॥ योसौ गुहप्रहरणोन्मथितनितंबकुंजोपि क्षीरोदेनासिच्यमानो
भगवता वरुणेनाभिगुप्तो विभयो बभूव ॥१९॥ तस्मिन्नपि प्रैयव्रतो घृतपृष्ठो नामाधिपतिः स्वे द्वीपे वर्षाणि
सप्त विभज्य तेषु पुत्रनामसु सप्त रिक्थादान् वर्षपान् निवेश्य स्वयं भगवान् भगवतः परमकल्याणयशस
आत्मभूतस्य हरेश्चरणारविंदमुपजगाम ॥२०॥ आमो मधुरुहो मेघपृष्ठः सुधामा भ्राजिष्ठो लोहितार्णो वन
स्पतिरिति घृतपृष्ठसुतास्तेषां वर्षगिरयः सप्त सप्तैव नद्यश्चाभिख्याताः शुक्लो वर्द्धमानो भोजन उपबर्हिणो नं
दो नंदनः सर्वतोभद्र इति ॥२१॥ अभया अमृतौघा आर्यका तीर्थवती रूपवती पवित्रवती शुक्लेति ॥ यासामंभः पवि
त्रममलमुपयुंजानाः पुरुषऋषभद्रविणदेवकसंज्ञाः ॥ वर्षपुरुषा आपोमयं देवमपां पूर्णेनांजलिना यजंते
॥२२॥ आपः पुरुषवीर्याः स्थ पुनंतीर्भूर्भुवः स्वः ता नः पुनीतामीवघ्नीः स्पृशतामात्मना भुव इति ॥२३॥

पुरुषस्य सामर्थ्योः स्थ भवथ ॥ अत एव भूर्भुवः स्वः त्रैलोक्यं पुनंत्यः ॥ ता भवत्यो नोऽस्माकं स्पृशतां स्पर्शनं कुर्वतां ॥
भुवः शरीराणि पुनंतु यतः आत्मना स्वरूपेणैव अमीवघ्नीः पापहंत्र्यः ॥२३॥

भा०पं०
७६

ततःपरस्तादित्युक्तं॥ तदेतत्कियत्तांतरेणइत्यपेक्षायां तदंतर्वर्त्तिनीभूमिमाह॥ यावन्मानसोत्तरमेर्वोरंतरंसार्द्ध
सप्तलक्षोत्तरसार्द्धकोटिपरिमितंतावतीभूःस्वादूदसागरतोस्ति॥ तत्रचप्राणिनोपिसंति ततःकांचनीभूमिरन्या
स्तीत्यर्थः॥ साचैकोनचत्वारिंशल्लक्षोत्तरकोटाष्टकमितातेया॥ अर्द्धपुष्करद्वीपेन सहस्वादूदःपल्लवद्विलक्षा
एवंहिसतिमेरुलोकालोकयोरंतरंसार्द्धद्वादशकोटिपरिमितंवक्ष्यमाणमुपपन्नंभवति॥ एतदेवाहवृत्तत्रेष्टकेनभ

यावन्मानसोत्तरमेर्वोरंतरंतावतीभूमिः कांचन्यन्यादर्शतलोपमायस्यांप्रहितःपदार्थोनकथं
चित्पुनःप्रत्युपलभ्यते तस्मात्सर्वसत्त्वपरिहृतासीत्॥३५॥ लोकालोकइतिसमाख्यायदनेना
चलेनलोकालोकस्यांतर्वर्त्तिनावस्थाप्यते॥३६॥ सलोकत्रयांतेपरितईश्वरेणविहितः॥ यस्मा
त्सूर्यादीनांध्रुवापवर्गाणांज्योतिर्गणानांगभस्तयोर्वाचीनांस्त्रीन्लोकानवितन्वानाःनकदाचि
त्पराचीनाभवितुमुत्सहंतेतावदुन्नहनायामः॥३७॥

वर्त्तिकोटिद्वयंत्रिपंचाशल्लक्षाणिचततःपरंपंचाशत्सहस्राणिसप्तद्वीपाःससागराः॥ ततोहेममयीभूमिर्दशको
ट्यावरणेनदेवानांक्रीडनार्थायलोकालोकस्ततःपरंइति॥ अत्रचदशकोटित्वएवोक्तंभूम्यासहद्रष्टव्यांसर्वसत्त्वपरिह
तेति॥ देवव्यतिरेकेणेतिशेषः देवानांक्रीडनार्थायेत्युक्तत्वात्॥३५॥ लोकालोकत्रयस्यांतेपरितोमूर्द्ध्वरूपोविहितः॥ यस्मा
त्प्रतिबंधकात्॥ सूर्यआदिर्येषांध्रुवोपवर्गोंतोयेषां॥ आविःतन्वानाःसमंतात्प्रकाशयंतः॥ परतोगंतुंनशक्नुवंति॥ तावदुन्न
हनमुत्सेधःतदनुरूपआयामश्चविस्तारोयस्य॥ ध्रु
वादपुच्छिन्नत्वात्त्रिलोकीमध्यादाभूतइत्यर्थः॥३७॥

७६

ज्वलनशिखावदमलानां कनकपत्राणामयुतानामयुतानि यस्य तत् ॥ देवानामहोरात्राभ्यामुत्तरदक्षिणायनाभ्यां
इत्यर्थः ॥ ३० ॥ ३१ ॥ ब्रह्मरूपिणं कमलासनमूर्त्तिम् । सकर्मकेन ब्रह्मसालोक्यादिसाधनेन ॥ ३२ ॥ कर्ममयं कर्मफलरूपं
एवमेव दधिमंडोदात्परतः पुष्करद्वीपस्ततो द्विगुणायामः समंतत उपकल्पितः समानेन स्वादूदकसमु
द्रेण बहिरावृतो यस्मिन्बृहत्पुष्करं ज्वलनशिखामलकनकपत्रायुतायुतं भगवतः कमलासनस्याध्या
सनं परिकल्पितं । तद्द्वीपमध्ये मानसोत्तरनामैक एवार्वाचीनपराचीनवर्षयोर्मर्यादाचलोऽयु
तयोजनोच्छ्रायायामो यत्र तु चतसृषु दिक्षु चत्वारि पुराणि लोकपालानामिन्द्रादीनां यदुपरिष्टात्सूर्य
रथस्य मेरुं परिभ्रमतः संवत्सरात्मकं चक्रं देवानामहोरात्राभ्यां परिभ्रमति ॥ ३० ॥ तद्द्वीपस्याप्यधिप
तिः प्रैयव्रतो वीतिहोत्रो नामैतस्यात्मजौ रमणकधातकिनामानौ वर्षपती नियुज्य स स्वयं पूर्वजवद्
भगवत्कर्मशील एवास्ते ॥ ३१ ॥ तद्वर्षपुरुषा भगवंतं ब्रह्मरूपिणं सकर्मकेन कर्मणाराधयंतीदं
चोदाहरंति ॥ ३२ ॥ यत्तत्कर्ममयं लिंगं ब्रह्मलिंगं जनोऽर्चयेत् । एकांतमद्वयं शांतं तस्मै भगवते नमः ॥
॥ ३३ ॥ ततः परस्ताल्लोकालोकनामाचलो लोकालोकयोरंतराले परित उपक्षिप्तः ॥ ३४ ॥
ब्रह्म लिंग्यते यस्मात् ॥ एकस्मिन्नेव परमेष्ठ्यैश्वर्ये ऽन्तो निष्ठा यस्य तत् ॥ एवं वस्तुतोऽद्वैतं ॥ ३३ ॥ अतः शुद्धोदात्परतः लोका

लोकः । सूर्याद्यालोकवान्देशः ॥ अलोकस्तद्रहितः तयोरंतराले मध्ये तयोर्विभागार्थमित्यर्थः ॥ ३४ ॥

भा० पं० भगवानेवंभूतं आकल्पं वेषं गतः ॥ लीलया प्राप्त इति समंतादास्त इत्यस्यार्थः ॥४१॥ अलोकपरिमाणं च मेरोरेकतः ॥
७७ सार्द्धद्वादशकोट्यः ॥ ततो लोकालोकात् आलोकाद्बापरस्तात् विशुद्धां द्विजपुत्रानयने अर्जुनस्य श्रीकृष्णेन प्रदर्शितां
४२ ॥ विस्तरेणोक्तं ब्रह्माण्डमानं सर्वतोऽपि निरूपयति ॥ अण्डमध्यगतः किं तन्मध्यं तदाह ॥ द्यावाभूम्योः स्वर्गनरकपालयोः

आकल्पमेवं वेषं गत एव मात्मयोगमायया विरचितविविधलोकयात्रागोपीथायेत्यर्थः ॥४१॥ योऽन्तर्विस्ता
र एतेन ह्यलोकपरिमाणं च व्याख्यातं यद्बहिर्लोकालोकाचलात् ॥ ततः परस्ताद्योगेश्वरगतिं विशुद्धा
मुदाहरन्ति ॥४२॥ अण्डमध्यगतः सूर्यो द्यावाभूम्योर्यदंतरं ॥ सूर्याण्डगोलयोर्मध्ये कोट्यः स्युः पंचवि
शतिः ॥४३॥ मृतेऽण्ड एष एतस्मिन् यदभूत्ततो मार्तण्ड इति व्यपदेशः ॥ हिरण्यगर्भ इति यद्धिरण्याण्ड
समुद्भवः ॥४४॥ सूर्येण हि विभज्यंते दिशः खं द्यौर्मही भिदा ॥ स्वर्गापवर्गौ नरका रसौकांसि च सर्वशः ॥ ॥ श्रीराम
॥४५॥ देवतिर्यङ्मनुष्याणां सरीसृपसवीरुधां ॥ सर्वजीवनिकायानां सूर्य आत्मा दृगीश्वरः ॥४६॥

यदंतरं मध्यस्थानं सर्वतः पंचविंशतिकोट्यः स्युः ॥४३॥ अंडमध्यावस्थानेकारणं ॥ तन्नाम निर्वचनेनाह मृते ऽचेत
ने ॥ एष सूर्यो वैराजरूपेण यस्मात्प्रविष्टः ॥४४॥ किंच ॥ सूर्येणैव विभज्यंते दिशः खमंतरिक्षं भिदा अन्यापि विभागः
स्वर्गापवर्गौ भोगमोक्षदेशौ रसौकांसि अतलादीनि ॥४५॥ उपासनार्थमाह देवादीनां सूर्य आत्मा दृगीश्वरः नेत्रा ७७

र्गोयंलोकालोकचलः तुरीयभागः॥ चतुर्थोंशः सार्द्धद्वादशकोट्यः मेरोरेकतइतिद्रष्टव्यं॥३८॥ स्वंचतत्तुर्दिक्षुपंचा
शत्कोटिमितंभूगोलंविज्ञेयं॥३८॥ आशास्तुदिक्षुयेऽधिनिवेशिताः ते आसते॥३९॥ तेषांदिग्गजानांस्वविभूतीनांचवि
विधवीर्योपबृंहणायसकललोकस्वस्तयेचभगवान्तस्मिन्नास्तइत्यन्वयः॥ किंकुर्वन्॥ आत्मनःस्वस्ययद्विशुद्धंसत्वंतत्त

एतावान्लोकविन्यासोमानलक्षणसंस्थाभिर्निर्विचिंतितःकविभिः॥ सतुपंचाशत्कोटिगणितस्यभूगोलस्य
तुरीयभागोयंलोकालोकाचलः॥३८॥ तदुपरिष्टाच्चतसृष्वाशास्वात्मयोनिनाखिलजगद्गुरुणाधिनिवे
शितायेद्विरदपतयऋषभपुष्करचूडोवामनोपराजितइतिसकललोकस्थितिहेतवः॥३९॥ तेषांस्ववि
भूतीनांलोकपालानांचविविधवीर्योपबृंहणायभगवान्परममहापुरुषोमहाविभूतिपतिरंतर्याम्या
त्मनोविशुद्धसत्वंधर्मज्ञानवैराग्यैश्वर्याद्यष्टमहासिद्ध्युपलक्षणंविष्वक्सेनादिभिःस्वपार्षदप्रव
रैःपरिवारितोनिजवरायुधोपशोभितैर्निजभुजदंडैःसंधारयमाणस्तस्मिन्गिरिवरेसमंतात्सकललो
कस्वस्तयआस्ते॥४०॥

धारयमाणः॥ आविःकुर्वन्कीदृशंधर्मज्ञानादीनष्टमहासिद्धयश्चोपलक्षणंयस्यतत्
न्दोर्दंडैःरूपलक्षितःसन्महाविभूतेःपरमैश्वर्यस्यपतित्वात्॥ एकएवमूर्त्यासमंतादास्तेनन्वंतर्यामिणंतस्यनैवस
र्वकर्तृत्वंशक्यंकिंतस्यबहिःसमंतात्स्थानेनेत्याशंक्याह॥ तस्यार्थंस्वयमेवव्याचष्टे॥ आत्मनोयोगमाययावि
रचितायाविविधालोकयात्रातस्यागोपीथायरक्षणायैव ॥ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ ॥

॥४०॥ २

भा० पं०
७८

एवंमंदाद्रिदिगतिभिः॥नवकोटयइति मेरोरुभयतोमानोसोत्तरस्यांतर्विस्तारेणपंचदशलक्षाधिककोटित्रयप
रिमितेनेदंपरिमंडलमानमुन्नेयं॥एवंपंचदशभिर्घटिकाभिरित्यादिषु पित्रैराशिकगणितेन तत्तन्मान
मुन्नेयं अत्रापेक्षितोविशेषः पुराणांतरादवगंतव्यः॥तत्रारोहणादिस्थानानि॥वायुपुराणोदक्षिणानि॥सर्वे
ग्रहाणांत्रीण्येपस्थानानि हि द्विजसत्तमाः॥स्थानंजरद्गवंमध्यंतथैरावतमुत्तरं॥वैश्वानरंदक्षिणतोनिर्दिष्टमिह
तत्वतः इति॥तदेवमध्यमोत्तरदक्षिणमार्गत्रयं प्रत्येकं वीथित्रयेण त्रिधाभिद्यते॥त्रिभिस्त्रिभिरश्विन्यादि
नक्षत्रैर्नागवीथीगजवीथी॥ऐरावतीचेत्युत्तरमार्गे वीथीत्रयम्॥आर्षभीगोवीथीजरद्गवीचेति वैषुवते मध्य
एवंनवकोटयएकपंचाशल्लक्षाणियोजनानां मानसोत्तरगिरि परिवर्तनस्योपदिशंति॥त
स्मिन्नैंद्रीपुरी पूर्वस्मात मेरोर्देवधानीनाम दक्षिणतो याम्यासंयमनीनाम पश्चाद्वारुणीनिम्लोचंती
ममार्गेवीथीत्रयं॥अजवीथीमृगवीथीवैश्वानरीचेति दक्षिणमार्गेवीथीत्रयं तदप्युक्तं तत्रैव॥अश्विनीकृत्तिका
याम्यानागवीथीतिविश्रुता॥रोहिण्यार्द्रामृगशिरो गजवीथ्यभिधीयते॥पुष्याश्लेषातथादित्यावीथीचैरावतीस्मृ
ता॥एतास्तुवीथयस्तिस्र उत्तरोमार्गउच्यते॥तथाद्वे चापि फाल्गुन्यौ मघाचैवार्षभीमता॥हस्तचित्रातथास्वातिर्गो
वीथीसातुविश्रुता॥ज्येष्ठाविशाखानुराधावीथीजारद्गवीमता॥एतास्तुवीथयस्तिस्रोमध्यमोमार्गउच्यते॥इति
याम्यमैरणी आर्द्रे॥मूलाषाढोत्तराषाढाअजवीथ्यभिशब्दिता॥श्रवणंचधनिष्ठाचमार्गीशतभिषातथा॥॥ ७८

इति पंचमे विंशः॥२०॥ एवमध्यायविंशत्या भूमर्य्यादा निरूपिता॥ अतः परं द्युमर्य्यादापालनं त्रिभिरुच्यते॥१॥ एकविंशे रवेः का
लचक्रेणाभ्रमतोऽन्वहं स्वगत्या राशिसंचारैर्लीला कथ्यात्र निरूप्यते॥२॥ एतावान् विस्तरेणैकोनपंचाशत्॥ उत्सेधेन पंचविंश
तिः॥१॥ द्विदलयोर्मध्ये यथैकस्य मानेनापरस्य मानमुपदिशंति तद्वत्॥ अंतरेण तयोर्मध्ये तदुभयसंधितं॥ ताभ्यामुपयन्तः सं

इति श्रीमद्भागवते महापुराणे पंचमस्कंधे विंशोऽध्यायः॥२०॥ श्रीशुक उवाच॥ एतावानेव भूवलयस्य सन्निवेशः प्रमाणलक्ष
णतो व्याख्यातः॥ एतेन हि दिवो मंडलमानं तद्विद उपदिशंति॥१॥ यथा हि द्विदलयोर्निष्पावादीनां ते अंतरेणांतरिक्षं
तदुभयसंधितं॥२॥ यन्मध्यगतो भगवांस्तपतां पतिस्तपन आतपेन त्रिलोकीं प्रतपत्यवभासयत्यात्मभासा स एष
उदगयनदक्षिणायनवैषुवतसंज्ञाभिर्मांद्यशैघ्र्यसमानाभिर्गतिभिरारोहणावरोहणसमानस्थानेषु यथा
सवनमभिपद्यमानो मकरादिषु राशिष्वहोरात्राणि दीर्घह्रस्वसमानानि विधत्ते॥३॥ यदा मेषतुलयोर्वर्तते तदा
अहोरात्राणि समानानि भवंति यदा वृषभादिषु पंचसु राशिषु चरति तदाहान्येव वर्धंते ह्रसति च मासि मास्ये
कैका घटिका रात्रिषु॥४॥ यदा वृश्चिकादिषु पंचसु वर्तते तदाहोरात्राणि विपर्ययाणि भवंति॥५॥ यावद्दक्षिणा
यनमहानि वर्धंते यावदुदगयनं रात्रयः॥६॥

धितं ताभ्यामुपयन्तः संलग्नं॥२॥ उदगयनादिसंज्ञाभि
मंदक्षिप्रसमगतिर्यथाकालमारोहणादिस्थानेष्वारोहणाद्यभिपद्यमानो मकरादिष्वहोरात्राणि दीर्घह्रस्वसमाना
नि विधत्ते तत्प्रपंचयति यदेति अत्यंतवैषम्याभावात्समानानीत्युक्तं सर्वथासाम्यं त्वेकस्यैवाहोरात्रस्य यद्यपि वृषभमि
थुनयोरेवाह्नां वृद्धिः कर्कटादिषु ह्रासः तत्रापि रात्र्यपेक्षयाधिकत्वाद्वर्धंते इत्युक्तं॥ एवं रात्रिवृद्धावपि दिनापेक्षया ह्रसं
तीत्युक्तं॥ एकैकेति स्थूलदृष्ट्योक्तं वृद्धिह्रासयोः प्रतिमासं वैषम्यात्॥ विपर्ययाणी
ति॥ अहानि न्यूनानि रात्रयोऽधिका इत्यर्थः॥५॥ तद्वृद्धिक्रा
सकाले मासवदिति॥६॥

तत्रत्यानां मेरुसंस्थानां सव्येनेति नक्षत्राभिमुखतया स्वगत्या मेरुं वामतः कुर्वन्नपि प्रदक्षिणावर्त्तप्रवाहाख्यव॰
वायुभ्राम्यमाणज्योतिश्चक्रवशपन्नन्यद्दक्षिणेनं करोति ॥ अत एव चक्रगतिवशादतिदूरतो भूसंलग्नस्येव दर्शनमु
दयः ॥ आकाशमाभूरूढमिव दर्शनं मध्याह्नः ॥ भूमिप्रविष्टस्येव दर्शनमस्तमयः ॥ ततो तावद्दूरगमनेन निशीथ इति
समुद्रतीरस्थदृष्ट्या वा ॥ अद्वैवा एष प्रातरुदेत्ययः सायं प्रविशति ॥ इति श्रुतिव्यवहारो न नेष्टतः ॥ तदुक्तं वैभवे ॥
उदयास्तमयेथैवं सर्वकालं तु सन्मुखे दिशास्वशेषासु तथा मैत्र्यां विदिशासु च ॥ यैर्यत्र दृश्यते भास्वान्स तेषामुदयः

तत्रत्यानां दिवसमध्यगत एव यद्यादित्यस्तपति सव्येन चलनं दक्षिणेन करोति ॥ ८ ॥ यत्रोदेतीति तस्य ह स
मानसूत्रनिपातेन निम्लोचति ॥ ९ ॥ यत्र क्वचनास्यंदेनाभितपति तस्य हैष समानसूत्रनिपाते प्रस्वापयति त
त्र गतं न पश्यंति ये तममनुपश्येरन् ॥ १० ॥ यदा चारं ग्राः पुष्यांः प्रचलेन पंचदशघटिकाभिर्याम्यासपा
दकोटिद्वयं योजनानां सार्द्धद्वादशलक्षाणि साधिकानि चोपयाति ॥ ११ ॥

स्मृतः ॥ तिरोभावं च यत्रैति तत्रैवास्तमनं रवेः ॥ नैवास्तमनमर्कस्य नोदयः सर्वदा स्मृतः ॥ उदयास्तमनाख्यं हि दर्श
नं रवेः ॥ शक्रादीनां पुरेषु तिष्ठन्सप्तत्य एव पुरत्रयं ॥ विकीर्णदीविकर्णस्य स्त्रीन्कोणान्द्वे पुरे तथेति ॥ अत एव तत्रैवोक्तं
सर्वेषां द्वीपवर्षाणां मेरुरुत्तरतः स्थित इति ॥ यतो यत्र यः पश्यति सैव तस्य वामतो मेरुस्तिष्ठतीति ॥ ८ ॥ ९ ॥ यथोक्तमुद
यास्तमनाख्यानियमं दर्शयति यत्रोदेतीत्यादि ॥ नास्यंदेनस्वेदोऽन्येन ॥ प्रस्वापयति निशीथं करोति ये तममनुपश्येरन्

प्रस्वापसमानसूत्रस्थाः ॥ १० ॥ साधिकानि पंचविंशति
सहस्राधिकानि ॥ ११ ॥

वैश्वानरी भाद्रपदे रेवती चेत्युक्तीर्त्तिता ॥ एतास्तु वीथयस्तिस्रो दक्षिणमार्गउच्यत इति ॥ याम्या भरणी आदित्या ॥ अदि
तिर्देवमाता कृ पुनर्वसु ॥ मार्गी मृगवीथी एवंस्थितेउत्तरायणे ध्रुवेण युगान्तकोटिनिवद्धवायुनेयमवस्थितिक्रमे
णगणनातेषां नक्षत्राणामन्यत्रैव दृश्यमानत्वात् ॥ नच भोगक्रमेण ॥ तथाच रेवत्यश्विन्योर व्यवहितवीथ्यो ॥ अश्वि

नामउत्तरतः सौम्यां विभावरीनामुक्ता सूर्य्यमध्याक्रान्तमयनिशी थानीतिभ्रूतानां प्रवृत्तिनिवृत्तिनिमित्ता
निसमयविशेषेण मेरोश्चतुर्दिक्षु ॥ १ ॥ पाशद्वयाकर्षणेरथस्यारोहणं तदाभ्यन्तरमंडलप्रवेशेगते मांद्यं
चेति दिनवृद्धिः रात्रिह्रासश्च ॥ दक्षिणायने च पाशप्रेरणाद्दवरोहणे वहिर्मंडलप्रवेशेगते शैघ्र्यं चेत्या
होरात्रयोर्विपर्य्ययः ॥ वैषुवते तु पाशसाम्यात्समावस्थाने मंडलप्रवेशेगते साम्यं चेत्यहोरात्रयोः साम्यमिति त
थाच पुराणान्तरे ॥ आकृष्यते यदा तौ तु ध्रुवेण समधिष्ठितौ ॥ तदाभ्यन्तरतः सूर्य्यो भ्रमते मंडलानि तु ध्रुवेणमु
च्यमानेन युनारश्मियुगेन तु ॥ तथैव वाह्यतः सूर्य्यो भ्रमते मंडलानि चेति ॥ तदेतदुक्तं ॥ यदा मेषतुलयोरित्यादिना
उदयास्तादिकं वक्तुमाह ॥ तस्मिन्मानसोत्तरे मेरोः पूर्वतः ऐंद्रीपुरी उपदिशंतीत्यनुषंगः ॥ तासु पुरीषूदयादी
न्युपदिशंति ॥ चतुर्दिशमित्युक्तेः ये मेरोर्दक्षिणदेशे तेषामैंद्रीमारभ्य पूर्वोदयः ॥ ये मेरोः पश्चिमे तेषां याम्यामारभ्य
पूर्वोदय ॥ ये मेरोरुत्तरे तेषां वारुणीमारभ्य पूर्वोदयः गतिविचारः संवत्सरस्य ॥ १ ॥
भिन्वोरेकस्यामेव वीथ्यां गणनास्यादिति तेषां नक्षत्राणां तत्र तत्र संबंधः केनचित्प्रकारान्तरेणैव स्यात् ॥ अंतरमंडलस्य
स्वल्पभूमित्वात् ॥ परिवर्त्तस्य वहूंशेपि सूर्य्यो दिनं दृश्ये ॥ मेढिसंनिकृष्टत्वेष भवेत् ॥ गतेश्च मांद्यं भवतीत्यर्थः मंडलं चेदं एतै

द्ध्वोपर्य्यंवागच्छतित्तरायणेमध्याह्ने मस्तकोपरि सूर्य
स्य दृश्यत्वात् ॥ वहिर्मंडलस्य वहुभूमित्वात् ॥ परिवर्त्तस्य स्व
ल्पांशे एव सूर्य्यो दिनं दृश्यते ॥ गतेश्च शैघ्र्यं भवतीत्यर्थः ॥ १ ॥

भा०पं० नीडं तत्प्रवेशस्थानं ॥ गायत्र्यादिछंदो नामानः अरुणेन योजिताः संतो देवं वहंति ॥१६॥ पुरस्तात्स्थितोपि पश्चात्स्थितत्व

८० स्थितः अस्ति यद्वा यत्सूर्यस्य पुरस्तात्तस्येव पश्चिमत्वात् पश्चादित्युक्तं ॥ अश्वस्थानं सप्ताश्वरूपछंदो वहंतेत्य मत्तो

रविंचक्रपक्षे निबद्धानि चक्रे वाहः समादिस्त इति ॥१७॥ सूक्तवाकाय सुभाषिताय ॥१८॥ एकैकश्चात्र देशः हृदयः

रथनीडस्तु षट्त्रिंशल्लक्षयोजनायतस्तत्तुरीयभागविशालस्तावान्रविरथयुगो यत्र हयाश्छंदोनामानः

सप्तारुणयोजिता वहंति देवमादित्यं ॥१६॥ पुरस्तात्सवितुररुणः पश्चान्नियुक्तः सौत्ये कर्मणि किलास्ते ॥१७॥

तथा वालखिल्या ऋषयोंगुष्ठपर्वमात्राः षष्टिसहस्राणि पुरतः सूर्यं सूक्तवाकाय नियुक्ताः संस्तुवंति ॥१८॥

तथान्ये च ऋषयो गंधर्वाप्सरसो नागा ग्रामण्यो यातुधाना देवा इत्येकैकशो गणाः सप्त चतुर्दश मासि

मासि भगवंतं सूर्यमात्मानं पृथङ्नानानामानः पृथक्कर्मभिर्द्वंद्वश उपासते ॥१९॥ लक्षोत्तरं सा

र्धनवकोटियोजनपरिमंडलं भूवलयस्य क्षणेन सगव्यूत्युत्तरं द्विसहस्रयोजनानि स भुंक्ते ॥२०॥

इति श्रीमद्भागवते महापुराणे पंचमस्कंधे रवेर्गोलवर्णनं एकविंशोध्यायः ॥२१॥

सप्तगुणाः संतो मासि मास्युपासत इत्यन्वयः ॥१९॥ गव्यूतिः क्रोशद्वयं ॥ सगव्यूत्युत्तरं यथा भवति तथा

॥२०॥ इति पंचमे एकविंशः ॥२१॥ द्वाविंशे सोमशुक्रादेः स्थानमाहोत्तरोत्तरं ॥ तत्र इत्यनुसारेण दृष्टानिष्टे तथा

न रणम् ॥१॥

८०

सहवासहैवयद्यपिवस्तुतः सूर्य्यस्यापिनक्षत्रैःसहैवोदयास्तमयौतथापितत्साहित्यादर्शनात्सोमादीनामेवतत्साहि
त्यमुक्तं ॥१२॥ त्रयीमयइत्युद्युपासनार्थं ॥१३॥ द्वादशमासात्मकारायस्य ॥ षड्ऋतवोनेमयोयस्य त्रीणिचातुर्मास्यानिना
भयोयस्य ॥ कृतइतरभागोयस्य ॥ मानसोत्तरगिरौलक्षार्द्धंदुपरिवायुबद्धभ्रमावितिद्रष्टव्यं ॥ चक्रेवात्ताबद्धुच्छ्रितमि
तिमतव्यं ॥ अन्यथायुतमात्रोच्छ्रायत्वान्मानसोत्तरस्यमेरौ ॥ चतुरशीतिसहस्रोच्छ्रायत्वात् ॥ अक्षस्यसाम्यानुपपत्तेः ॥१४॥

एवंतत्तोवारुणींसौम्यामैन्द्रींचपुनस्तथान्येचग्रहाःसोमादयोनक्षत्रैःसहज्योतिश्चक्रेसमभ्युद्यंति
सहवानिम्लोचंति ॥१५॥ एवंनुक्षत्रैनचतुस्त्रिंशल्लक्षयोजनान्यष्टशताधिकानिसौरोरथस्त्रयीमयो
सौचतस्त्रुपुरिवर्त्तेतेपुरीषु ॥१६॥ यस्यैकंचक्रंद्वादशारंषडरेवनित्रिनाभिसंवत्सरात्मकंसमामनं
ति ॥ तस्याक्षोमेरुमूर्द्धनिकृत्तोमानसोत्तरेकृतेतरभागोयत्रप्रोतंरविरथचक्रंतैलयंत्रचक्रवद्भ्रमत्
मानसोत्तरगिरौपरिभ्रमति ॥१७॥ तस्मिन्नक्षेकृतमूलोद्वितीयोक्षस्तुर्य्यमानेनसम्मितस्तैलयंत्राक्ष
अरे १ वद्ध्रुवेकृतोपरिभागः ॥१८॥
तस्मिन्नैंचक्रेप्रांतेकृतमूलः निवद्धपूर्वभागः ॥ प्रथमाक्षोमेरुमानसोत्तरायतः ॥ सार्द्धसप्तलक्षाधिकसा
र्द्धकोटिप्रमाणः ॥ तस्यतुर्य्यमानेनसार्द्धसप्तत्रिंशत्सहस्राधिकेकोनचत्वारिंशल्लक्षमानेनध्रुवेकृतः ॥ वा
युपाशेननिवद्धउपरिभागोयस्य ॥१९॥ रामराम राम ॥ ॥ रामराम रामरामराम रामराम ॥ ॥ ३६

भा० पं०
८१

स एव स्वगत्या मासादिव्यवहारकारणमित्याह॥ स एष लोकानामात्मा द्यावापृथिव्योरंतरेण मध्ये यन्नभोवलयं
अंतरिक्षं तस्य मध्ये यत्कालचक्रं तद्गतः राशिभिर्मेषादिभिः संज्ञा येषां॥ चैत्रादिसंज्ञास्तु चांद्रमासानां मासानमाह
पक्षद्वयं मास इति॥ चांद्रेण मानेन सपादं महानक्षत्रद्वयोनुसारेण दिवानक्तं च॥ अहोरात्रमिति॥ पित्र्येण षष्टमं

अथ स एष आत्मा लोकानां द्यावापृथिव्योरंतरेण नभोवलयस्य कालचक्रगतो द्वादश मासान्
भुंक्ते राशिसंज्ञान्संवत्सरावयवान्मासः पक्षद्वयं दिवा नक्तं चेति सपादर्क्षद्वयमुपदिशंति॥ यावता
षष्ठमंशं भुंजीत स वै ऋतुरित्युपदिश्यते संवत्सरावयवः॥ ५॥ अथ च यावतार्द्धेन नभोवीथ्यां प्र
चरति तं कालमयनमाचक्षते॥ ६॥ अथ च यावन्नभोमंडलं सह द्यावापृथिव्योर्मंडलाभ्यां कार्त्स्न्येन स हि
भुंजीत तं कालं संवत्सरं परिवत्सरमिडावत्सरमनुवत्सरमिद्वत्सरमिति भानोर्मांद्यशैघ्र्यसमगति
भिः समामनंति॥ ७॥ एवं चंद्रमा अर्कगभस्तिभ्य उपरिष्टाल्लक्षयोजनत उपलभ्यमानोर्कस्य संवत्सर
भुक्तिं पक्षाभ्यां मासभुक्तिं सपादर्क्षाभ्यां दिनेनैव पक्षभुक्तिमग्रचारी द्रुततरगमनो भुंक्ते॥ ८॥

राशिद्वयं॥ ५॥ ६॥ मंडलाभ्यां सह भुंजीत सह इस हि सूर्यः। यदा शुक्लप्रतिपदि संक्रांतिर्भवति तदा सौरचांद्रयोर्मासयोः युगपदुप
क्रमो भवति स संवत्सरः ततः सौरमानेन वर्षे षट् दिनानि परिवर्द्धंते। चांद्रमानेन षट् क्षीयंतीति द्वादशदिनव्यवधानादुभयत्र प्रथमा
रंभो भवति एवं पंचवर्षाणि गच्छंति। तन्मध्ये द्वौ मलमासौ भवतः। ततः षष्ठः स संवत्सरो भगवानिति तदेवमवांतरभेदेन संवत्सरादि

पंचकं समामनंति॥ ७॥ सोमादीनामपि स्थानं कार्यं चाह॥ एवं चं
द्रमा इति अर्कगभस्तिभ्यः मंडलरूपेभ्यः सपादर्क्षाभ्यां सपा
ददिनद्वयेन॥ ८॥

८१

राशीनामभिमुखं अप्रदक्षिणं च ॥ सव्येन च लनं दक्षिणेन करोतीति वदता अमुष्य वयं कथमनुमीमहि
एतत्कथं ज्ञास्यामो विरुद्धत्वादित्यर्थः ॥१॥ चक्रस्य शास्त्रस्य च गतिद्वयमविरुद्धमिति परिहारार्थः ॥२॥ तत्तत्काल

राजोवाच ॥ यदेतद्भगवत आदित्यस्य मेरुं ध्रुवं चाप्रदक्षिणं प्रदक्षिणेन परिक्रामतो राशीनामभिमुखं च
प्रचलितं भगवतोपवर्णितममुष्य वयं कथमनुमिमीमहि ॥१॥ स होवाच ॥ यथा कुलालचक्रेण भ्रमता
सह भ्रमतां तदाश्रयाणां पिपीलिकादीनां गतिरन्यैव प्रदेशांतरेष्वप्युपलभ्यमानत्वात् ॥ एवं नक्षत्ररा
शिभिरुपलक्षितेन कालचक्रेण ध्रुवं मेरुं च प्रदक्षिणेन परिधावता सह परिधावमानानां तदाश्रयाणां सूर्यादीनां
ग्रहाणां गतिरन्यैव नक्षत्रांतरे राश्यंतरे चोपलभ्यमानत्वात् ॥२॥ स एष भगवानादिपुरुष एव साक्षान्ना
रायणो लोकानां स्वस्तये आत्मानं त्रयीमयं कर्मविशुद्धिनिमित्तं कविभिरपि च वेदेन विजिज्ञास्यमानो
द्वादशधा विभज्य षट्सु वसंतादिषु ऋतुषु यथोपयोषमृतुगुणान्विदधाति ॥३॥ तमेतमिह पुरु
षास्त्रय्या विद्यया वर्णाश्रमाचारानुपथा उच्चावचैः कर्मभिराम्नातैर्योगवितानैश्च श्रद्धया यजंतोंजसा
श्रेयः समधिगच्छंति ॥४॥

नियमेन कर्मणां शुद्धेः षाड्गुण्यस्य निमित्तभूतमात्मानं विभज्य । विजिज्ञास्यमानः वितर्क्यमाणश्च यथोपयोषं
यथाकर्मभोगं ऋतुगुणान् शीतोष्मादीन् ॥३॥ वर्णाश्रमाचारानुवर्तिनः ॥ पुरुषास्त्रय्याम्नातैः कर्मभिरिंद्रादि
रूपं योगवितानैश्च ध्यानादिभिः अंतर्यामिरूपं यजंतः ॥४॥

यदि न वक्रः स्यात्तर्हि परिवत्सरं॥१५॥१६॥१७॥ इति पंचमे द्वाविंशः॥२२॥ त्रयोविंशे ध्रुवस्थानं ज्योतिश्चक्राश्रयं त
तः॥ शिशुमारस्वरूपेण हरेश्च स्थितिरुच्यते॥ यत्तत्प्रसिद्धं विष्णोः पदं यत्र ध्रुव उपास्ते तिष्ठतेत्यन्वयः समका

यदि न वक्रेणाभिवर्त्तते प्रायेण शुभग्रहोऽघशंसः॥ ततउपरिष्टाद्विलक्षयोजनांतरगतो भगवान्बृहस्प
तिरेकैकस्मिन्राशौ परिवत्सरं प्रचरति यदि न वक्रः स्यात्प्रायेणानुकूलो ब्राह्मणकुलस्य॥१५॥ ततउप
रिष्टाद्योजनलक्षद्वयात्प्रतीयमानः शनैश्चर एकैकस्मिन्राशौ त्रिंशत्त्रिंशन्मासान्विलंबमानः स
र्वानेवानुपर्येति तावद्भिरनुवत्सरैः प्रायेण हि सर्वेषामशांतिकरः॥१६॥ ततउत्तरस्मादृषय एकादश
लक्षयोजनांतरउपलभ्यंते य एव लोकानां शमनुभावयंतो विष्णोर्यत्तत्परमं पदं प्रदक्षिणं प्रक्रमंति
॥१७॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे ग्रहस्थानं द्वाविंशोध्यायः॥२२॥ श्रीशुक उवाच॥ अथ त
स्मात्परतस्त्रयोदशयोजनांतरतो यत्तद्विष्णोः परममपदमभिवदंति॥ यत्र ह महाभागवतो ध्रुव औत्ता
नपादिरग्निनेंद्रेण प्रजापतिना कश्यपेन धर्मेण च समकालयुग्भिः सबहुमानं दक्षिणतः क्रिय
माण इदानीमपि कल्पजीविनामाजीव्य उपास्ते तस्येहानुभाव उपवर्णितः॥१॥

लमेव युज्यंत इति नन्वाते न्नैतत्तद्रूपैः॥ तस्य ध्रुवस्यानुभावः अग्रे॥१॥ रामरामरामरामराम

सर्वेषां जीवनिचयानां प्राणः ॥ अन्नमयत्वादमृतमयत्वाच्च ॥ अत एव जीवनहेतुत्वाज्जीवश्च ॥ ९ ॥ तदेवाह य एष इति ॥ १० ॥ दक्षिणे
नैव तत्तेषां पृथग्गत्यागतिरस्तीत्यर्थः ॥ कालायने कालचक्रे ॥ उत्तराषाढाश्रवणसंधावभिजिन्नक्षत्रं फलविशेषेण पृथक्कल्पितं

अथ चापूर्यमाणाभि-क्षीयमाणाभिः पितॄणामहोरात्राणि पूर्वपक्षापरपक्षाभ्यां वितन्वानः सर्वजीवस्य एकमेकं न
क्षत्रं त्रिंशता मुहूर्तैर्भुंक्ते ॥ ९ ॥ य एष षोडशकलः पुरुषो भगवान्मनोऽन्नमयोऽमृतमयो देवपितृमनुष्यभूतपशु
पक्षिसरीसृपवीरुधां प्राणाप्यायनशीलत्वात्सर्वमय इति वर्णयंति ॥ १० ॥ तत उपरिष्टात्त्रिलक्षयोजनतो नक्षत्रा
णि मेरुं दक्षिणेनैव कालायन ईश्वरयोजितानि सहाभिजिताष्टाविंशतिः ॥ ११ ॥ तत उपरि दुशना द्विलक्षयो
जनत उपलभ्यते पुरतः पश्चात्सहैव वार्कस्य शैघ्र्यमांद्यसाम्याभिर्गतिभिरर्कवच्चरति लोकानां नित्यदानुकूल
एव प्रायेण वर्षयंश्चारेणानुमीयते स वृष्टिविष्टंभग्रहोपशमः ॥ १२ ॥ उशनसा बुधो व्याख्यातः ॥ तत उपरि
ष्टाद्द्विलक्षयोजनतो बुधः सोमसुत उपलभ्यमानः प्रायेण शुभकृद्यदार्काद्व्यतिरिच्येत तदातिवाताभ्रप्रा
यानावृष्ट्यादिभयमाशंसते ॥ १३ ॥ अत ऊर्ध्वमंगारकोऽपि योजनलक्षद्वितय उपलभ्यमानस्त्रिभिः पक्षैरेकैकशो
राशीन्द्वादशोपभुंक्ते ॥ १४ ॥

तेन सह ॥ तथा च श्रुतिभिः ॥ अभिजिन्नाम नक्षत्रमुपरिष्टादाषाढानामधस्ताच्छ्रवणाया इत्यादि ॥ ११ ॥ पुरतः सूर्येणाभो
क्तमात्रेण नक्षत्रे पश्चाद्भुंक्ते तेन सहैव भुज्यमाने चारेण क्रमस्य नक्षत्राद्यतिक्रमेण वृष्टेर्विष्टंभः स्तंभनं यस्मात्तमुपशम
यतीति तथा ॥ १२ ॥ बुधो व्याख्यातः पुरतः पश्चात्सहैवाचरतीति ॥ किंचिद्विशेषं चाह तत इत्यादिना ॥ आशंसते सूचयति ॥ १३ ॥

भा० पं०
८३

तदेवस्थानविशेषेणविभज्यदर्शयति॥पुनर्वसुपुष्यावित्यादिना पुनर्वसुरुदगयनस्यान्त्यंनक्षत्रं॥पुष्याद्दक्षि
णायनस्याद्यं॥आर्द्राश्लेषेतयोर्नैरन्तर्ये॥अभिजिदुत्तराषाढेउत्तरदक्षिणायनयोराद्यन्तनक्षत्रे॥श्रवणपू
र्वाषाढेधनिष्ठामूलेचतयोरप्युत्तरपूर्वे॥मघादीनियान्यनुराधान्तानिदक्षिणायनान्यष्टतानिवामपार्श्वास्थिषु

पुनर्वसुपुष्यौदक्षिणवामयोःश्रोण्योरार्द्राश्लेषेचदक्षिणवामयोःपादयोरभिजिदुत्तराषाढेद
क्षिणवामयोर्नासिकयोर्यथासंख्यंश्रवणपूर्वाषाढेदक्षिणवामयोर्लोचनयोःधनिष्ठामूलेचद
क्षिणवामयोःकर्णयोर्मघादीन्यष्टनक्षत्राणिदक्षिणायनानिवामपार्श्ववङ्क्रिषुयुंजीततथैवमृग
शीर्षादीन्युदगयनानिदक्षिणपार्श्ववङ्क्रिषुप्रातिलोम्येनप्रयुतशतभिषाज्येष्ठेस्कंधयोर्दक्षिण
वामयोर्न्यसेत॥६॥उत्तराहनावगस्तिरधराहनौयमःमुखेषुचांगारकःशनैश्चरउपस्थेबृहस्पतिः
ककुदिवक्षस्यादित्योहृदयेनारायणोमनसिचंद्रोनाभ्यामुशनास्तनयोरश्विनौबुधःप्राणापानयोरा
हुर्गलेकेतवःसर्वांगेषुरोमसुसर्वेतारागणाः॥७॥एतदुहैवभगवतोविष्णोःसर्वदेवतामयंरूपमहरहःसं
ध्यायांप्रयतोवाग्यतोनिरीक्षमाणउपतिष्ठेतनमोज्योतिर्लोकायकालायनायानिमिषांपतयेमहापु
रुषायाभिधीमहीति॥८॥

॥ ५ ॥ स्कं ५

मृगशीर्षादीनिप्रातिलोम्येनपूर्वाभाद्रपदान्तानियान्युदगयननक्षत्राण्यष्ट
तानिदक्षिणपार्श्वेषुशतभिषाज्येष्ठेउत्तरदक्षिणायनयोःयेवसिष्ठेतेस्कंधयोः॥६॥यमोनक्षत्ररूपः॥तस्यानारायणे
श्विनौचककुदिगलेएष्टशृंगो॥७॥ज्योतिषांलोकायाश्रयायकालायनायचक्ररूपायनमोभिधीमहीतिमंत्रेणोप

८३

मेढीस्तंभे कृषा धान्याक्रमणपशवो वलीवर्द्दाः ॥ ४ ॥ कर्म्मसारथिः सहायो येषां ॥ ३ ॥ ईश्वराधीनत्वात्फलशं
केवनास्तीति वक्तुं मतांतरमाह ॥ किंचिदिति ज्योतिरनीकं ॥ ज्योतिश्चक्रं ॥ योगधारणं स्थितिमिति शेषः ॥ ५ ॥ लोय
सहिसर्वेषां ज्योतिर्गणानां ग्रहनक्षत्रादीनामनिमेषेणाव्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां
स्थाणुरिवावष्टंभ ईश्वरेण विहितः शश्वदवभासते ॥ यथा मेढीस्तंभ आक्रमणपशवः संयोजितास्त्रि
भिः सवनैर्यथास्थानं मंडलानि चरंति ॥ ५ ॥ एवं भगणा ग्रहादय एतस्मिन्नंतर्बहिर्योगेन कालचक्र
आयोजिता ध्रुवमेवावलंब्य वायुनोदीर्यमाणा आकल्पांतं परिचंक्रमंति ॥ नभसि यथा मेघाः श्येना
दयो वायुवशाः कर्म्मसारथयः परिवर्तंते ॥ एवं ज्योतिर्गणाः प्रकृतिपुरुषसंयोगानुगृहीताः कर्म
सं६ निर्मितगतयो भुवि न पतंति ॥ ३ ॥ केचनैतज्ज्योतिरनीकं शिशुमारसंस्थानेन भगवतो वासुदेवस्य योगधा
रणयामनुवर्णयंति ॥ ४ ॥ यस्य पुच्छाग्रेऽवाक्शिरसः कुंडलीभूतदेहस्य ध्रुव उपकल्पितस्तस्य लां
गूले प्रजापतिरग्निरिंद्रो धर्म इति पुच्छमूले धाता चकट्यां सप्त ऋषयस्तस्य दक्षिणा कुंडलीभूतश
रीरस्य यान्युदगयनानि दक्षिणपार्श्वे तु नक्षत्राण्युपकल्पयंति ॥ दक्षिणायनानि तु सव्ये यथा शिशुमा
रस्य कुंडलाभोगसन्निवेशस्य पार्श्वयोरुभयोरप्यवयवाः समसंख्या भवंति ॥ पृष्ठे त्वजवीथी आकाशगंगा चोदरतः ॥ ६ ॥
लिः ग्राद्यधोभागे उदगयनानि ॥ अभिजिदादीनि पुनर्वस्वंतानि चतुर्दश दक्षिणपार्श्वे दक्षिणायनानि पुष्यादी

न्युत्तरायणानि तानि चतुर्दश वामपार्श्वे ॥ २ ॥

ततोऽधस्ताद्यक्षराक्षसपिशाचप्रेतभूतगणानां विहाराजिरमंतरिक्षं यावद्वायुः प्रवाति यावन्मेघा उपलभ्यंते ॥ ५ ॥ सू० १ ॥ म २

भा० पं० तावन्मात्रे योजनायुते ॥ ६ ॥ अंतरीक्षं ग्रहहीनं तस्याप्यवधिमाह ॥ यावद्वायुः प्रवातीति ॥ तीव्रो वातितस्याप्यवधिमाह ॥ या

२४ वन्मेघाः ॥ ५ ॥ पृथिव्यां तु परिभूर्लोकावधिमाह ॥ यावद्धंसादयः पार्थिवा विकाराः ॥ ६ ॥ योजनानां युतांतरे प्रत्येकमुच्छ्रितः

आयामोयः कलहस्य तावद्विस्तारेण ॥ ७ ॥ सामान्येन विवरणिवरणीयत्ति ॥ एतेन्वित्यादिना ॥ अथ तातलादीत्यंतः प्रोक्तं

ततोऽधस्तात्सिद्धचारणविद्याधराणां सदनानि तावन्मात्रा एव ॥ ६ ॥ ततोऽधस्ताच्छतयोजनांतरे इयं
पृथिवी यावद्धंसभासश्येनसुपर्णादयः पतत्रिप्रवरा उत्पतंतीति ॥ ६ ॥ उपवर्णितं भूमेर्यथासंनिवेशावस्था
नं ॥ अवनेरप्यधस्तात्सप्त भू विवराः ॥ एकैकशो योजनांतरेणायामविस्तारेणोपक्लृप्ताः ॥ अतलं वितलं सुत
लं तलातलं महातलं रसातलं पातालमिति ॥ ७ ॥ एतेषु हि बिलस्वर्गेषु स्वर्गादप्यधिककामभोगैश्वर्यानं
दविभूतिभिः सुसमृद्धभवनोद्यानक्रीडाविहारेषु दैत्यदानवकाद्रवेया नित्यप्रमुदितानुरक्तकलत्राप
त्यबंधुसुहृदनुचरा गृहपतय ईश्वरादप्यप्रतिहतकामा मायाविनोदा निवसंति ॥ च ॥ येषु महाराज मये
न मायाविना विनिर्मिताः पुरो नानामणिप्रवरप्रवेकविरचितविचित्रभवनप्राकारगोपुरसभाचैत्यचत्व

नेन ग्रंथेन ॥ एतेषु दैत्यादयो निवसंतीत्यन्वयः ॥ कथंभूतेषु अधिककामभोगाश्च ऐश्वर्यानंदश्च विभूतिश्च संपत्ति
तैः सुसमृद्धा भवनादयो येषु कथंभूताः नित्यप्रमुदिता अनुरक्ताः कलत्रादयो येषां न प्रतिहतः कामो येषां मायया विनो
दो येषां ॥ च ॥ किंच ॥ हे महाराज ये मयेन निर्मिताः पुरश्च कासंति इत्यन्वयः ॥ कथंभूताः नानामणिप्रवरस्तेषां प्रवेको

[illegible]

मंत्रकृतां पूर्वोक्तमंत्रजपतां ॥८॥ इति पंचमे त्रयोविंशः ॥२३॥ एवं त्रिभिर्भूमर्यादापालनं वर्णितं तथा ॥ अधोभुवनमर्या
दापालनं त्रिभिरुच्यते ॥१॥ चतुर्विंशे खेचरवैकृस्वर्भान्वादिस्थितिः क्रमात् ॥ अतलादिविलस्वर्गमर्यादाः सप्रवर्णिताः
॥२॥ तत्पर्यंमारभ्य ध्रुवांतं संनिवेशं निरूप्येदानीं सूर्याद्धस्तान्निरूपयति ॥ अधस्तादिति स्वर्भानू राहुः ॥ अलभत तेभे स्वं
५१ ग्रहस्तं तामसमाधिदैविकं पापाहं मंत्रकृतां त्रिकालं ॥ नमस्यतः स्मरतो वा त्रिकालं नश्येत तत्कालजमाशु पापं ॥९॥
इति श्रीमद्भागवते महापुराणे पंचमस्कंधे शिशुमारसंस्थानं त्रयोविंशोध्यायः ॥ २३॥ श्रीशुक उवाच ॥ अधस्तात्स
वितुर्योजनायुते स्वर्भानुर्नक्षत्रवच्चरतीत्येके योसावमरत्वं ग्रहत्वं चालभत भगवदनुकंपया स्वयमसुरा
पसदः सैंहिकेयो ह्यतदर्हः तस्य तातजन्मकर्माणि चोपरिष्टाद्वक्ष्यामः ॥१॥ यददस्तरणेर्मंडलं प्रतपतस्तरतो
योजनायुतमाचक्षते द्वादशसहस्रं सोमस्य त्रयोदशसहस्रं राहोर्यः पर्वणि तद्व्यवधानकृद्वैरानुबंधः
सूर्यचंद्रमसावभिधावति ॥२॥ तन्निशम्योभयत्रापि भगवता रक्षणाय प्रयुक्तं सुदर्शनं नाम भागवतं
दयितमस्त्रं तत्तेजसा दुर्विषहेण मुहुः परिवर्तमानमभ्यवस्थितो मुहूर्तमुद्विजमानश्चकितहृदय आ
राद्देव निवर्त्तते तदुपरागमिति वदंति लोकाः ॥३॥
हिकायाः पुत्रः ॥१॥ ग्रहत्वं वक्तुमाह ॥ यददः प्रतपतस्तरणेर्मंडलं ॥ अमृतपानेन मध्यप्रवेशेन तयोर्व्यवधानं
करोतीति तथा ॥ अत एव ताभ्यां सूचितत्वाद्वैरमनुबध्नातीति तथा ॥२॥ भागवतं चक्रं परिवर्त्तमानं परितो भ्रमत्
अभि अभिमुखं मुहूर्तमवस्थितः सन् इति एवमंतराततदवस्थानमुपरागं वदंति ॥ तत्र च स्वर्ज्जुवक्रस्थितिभ्यां

भा० पं०
८५

कल्याणानां मंगलरूपाणां ॥११॥ यस्मिन्भगवत्तेजसि प्रविष्टे ॥ पुंसवनानि गर्भाः ॥ आचतुर्थोऽह्नः स्रावः पातः पंचमष
ष्ठयोरिति ॥ स्रावपातौ ज्ञेयौ ॥१२॥ सवर्णैरताः स्वैरिण्यः ॥ कामिन्यस्त्वसवर्णेऽपि ॥ तत्राप्यतिचंचलाः पुंश्चल्याः ॥ विलायनं विला

न हि तेषां कल्याणानां प्रभवति कुतश्चन मृत्युर्विना भगवत्तेजसश्चक्रापदेशात् ॥११॥ यस्मिन्प्रविष्टेऽसुरव
धूनां प्रायः पुंसवनानि भयादेव स्रवंति पतंति च ॥१२॥ अथातले मयपुत्रोऽसुरो बलो निवसति ॥ येन ह वा इ
ह सृष्टाः षण्णवतिर्मायाः काश्चनाद्यापि मायाविनो धारयंति ॥ यस्य च जृंभमाणस्य मुखतस्त्रयः स्त्री
गणा उदपद्यंत स्वैरिण्यः कामिन्यः पुंश्चल्य इति ॥ या वै विलायनं प्रविष्टं पुरुषं रसेन हाटकाख्येन सा
धयित्वा स्वविलासावलोकनानुरागस्मितसंलापोपगूहनादिभिः स्वैरं किल रमयंति ॥ यस्मिन्नुप
युक्ते पुरुष ईश्वरोऽहं सिद्धोऽहमित्ययुतमहागजबलमात्मानमभिमन्यमानः कत्थते मदांध इव ॥१३॥
ततोऽधस्ताद्वितले हरो भगवान्हाटकेश्वरः स्वपार्षदभूतगणावृतः प्रजापतिसर्गोपबृंहणाय भवान्या सह मिथु
नीभूय आस्ते यतः प्रवृत्ता सरित्प्रवरा हाटकी नाम भवयोर्वीर्येण यत्र चित्रभानुर्मातरिश्वना समिध्यमा
न ओजसा पिबति तन्निष्ठ्यूतं हाटकाख्यं सुवर्णं भूषणेनासुरेंद्रावरोधेषु पुरुषाः सह पुरुषीभिर्धारयंति ॥१४॥

यत्तनं साधयित्वा संभोगसमर्थं कृत्वा ॥ स्वैरसाधारणविलासाः ॥ तत्पूर्वकोऽवलोकस्तेनानुरागयुक्तं स्मितं तेन संलापउ
पगूहनं च तत्तदादिभिः ॥ यस्मिन्रसे उपयुक्ते सेविते ॥१३॥ भवयोर्भवस्य भवान्याश्च चित्रभानुरग्निः तेन निष्ठ्यूतं तत्सूत्क

८५

नथाविवरेश्वराणांग्रहोत्तमैश्चसमलंकृताः॥कीदृशेगृहोत्तमे॥नागाश्चत्रसराश्चमिथुनभूताःपारावत्तादयश्च
तैराकीर्णाःकृत्रिमाभूमयोयेषुत्तैः॥पाठांतरत्वेनानास्वनत्वंमिथुनविशेषणं॥२॥उद्यानानिचत्रतित्तराममरलोक
प्रियमतिशयितानियेषुचकासतीत्यन्वयः॥काभिःश्रीभिः॥केषांकुसुमफलस्तवकाश्चसुभगाकिशलयानिच
रायतनादिभिर्नागासुरमिथुनपारावतशुकसारिकाकीर्णहैर्म्यभूमिभिर्विवरेश्वरगृहोत्तमैःसमलंकृ
ताश्चकासंति॥२॥उद्यानानिचातितरांमनइंद्रियानंदिभिःकुसुमफलस्तवकसुभगकिशलयावनतरुचि
रविटपिनांलतांगालिंगितानांश्रीभिःसमिथुनविविधविहंगजलाशयानाममलजलाशयपूर्णानांझषकुलो
ल्लंघनक्षुभितजलाशयनीरनीरजकुमुदकुवलयकह्लारनीलोत्पललोहितशतपत्रादिवनेषुकृतनिकेतना
नामेकविहारकुलमधुरविविधस्वनादिभिरिंद्रियोत्सवैरमरलोकश्रियमतिशयितानि उवसंतादिव्योषधि
रसरसायनोन्नपानस्नानादिभिराधयोव्याधयोवलीपलितजरादयश्चदेहवैवर्ण्यदौर्गंध्यस्वेदक्लमग्लानि
रितिवेयोवस्याश्चभवंति॥१०॥
नैरवनतारुचिराविटपायेषांतेषांविटपिनांलतानांश्चगैरालिंगितानांश्री
भिःतथासमिथुनांचक्रवाकादिमिथुनसहितायेविविधाविहंगाःतद्युक्तानांचश्रीभिर्वाकृशानां॥श्रमलैर्जलैःपूर्णानां
पुनरपिकेरतिथिनानिझषकुलोल्लंघनेनक्षुभितंयज्जलाशयानांनीरेतस्मिन्यानिनीरजादीनितेषांवनेषुकृतंनिकेतनंयैः
तेषांअर्थात्पक्षिणांएकोभ्रंवडोयोविहारःतेनाकुलाश्चतेमधुराश्चविविधस्वनादयःतेयेइंद्रियोत्सवाःतैश्च॥यद्वासमिथुने
त्यादिरुत्तरेणैवसंबंधः॥मनइंद्रियादिभिरितिस्वनादीनांविशेषणं॥तत्रनीरजंसामान्येन॥कमलंलोहितंशतपत्रंतद्भि

भा०पु०
८६

तत्तस्मिन्भगवतां भक्तानां ज्ञानिनां च यथायथं आत्मज्ञानदेहदो आत्मत्वमेव च समर्पितस्य भूमिदानस्य न तत्फलमिति पृ
थगेव संबंधः ॥१८॥ किंच नेदं भगवद्दत्तं कृपाफलमपि त्वेकांतभक्तस्य न स्यात्तराय मात्रमित्याह नेति भगवान नमुष्य अमुं नैवानुगृही
तवान् तत्र हेतुः यदुनेति आत्मैश्वर्यस्यानुस्मृतिमुष्मात्तीत्यिय थातद्युक्ते वासुदेवे मनोयस्य जपहोमार्चनादिषु तत्स्यात् तरायो मे
त्रैपदे वै दत्तादिकं फलमिति ॥१९॥ तस्यैकांतभक्तिं सप्रपंचमाह यत्तत्त आतिप्रसिद्धं इति वक्ष्यमाणमुवाच हेतुत्वेनान्वयः ॥ कथंभ
तद्भगवत्तमा त्वतो सर्वेषामात्मन्यात्मद आत्मवतामेव च ॥ येन वै भगवान्नूनं समनुष्यानुज्ञं ग्राह ॥ यद्युत पुनरात्मा
नुस्मृतिमोषणं मायामयभोगैश्वर्यमेवातनुतेति ॥१९॥ यत्नेन्द्र गवता नधिगतान्योपायेन याच्ञाछलेनापहृतस्व
शरीरावशेषितलोकत्रयो वरुणपाशैश्च संप्रतिमुक्तो गिरिदर्यां चापविद्ध इति होवाच ॥२०॥ नूनं बत्तायं भग
वानर्थेषु न निष्णातो योसाविंद्रो यस्य सचिवो मंत्राय वृत एकांततो बृहस्पतिस्तमतिहाय स्वयमुपेंद्रेणा
त्मानमयाचतात्मनश्चाशिषो नो एव तद्दास्यं अतिगंभीरवयसः कालस्य मन्वंतरपरिवृत्तं किय
ल्लोकत्रयमिदम् ॥२१॥
तः अनधिगतः अन्यत्र उपायो येन तेन भगवता याच्ञाछलेनापहृतं स्वशरीरमात्रावशेषितं लोकत्रयं यस्य सम्य
क् प्रतिमुक्तो बद्धः अपविद्धः प्रक्षिप्तोपि सन् ॥२०॥ वत्तेति खेदे भगवानविद्वान् योसाविंद्रः यस्यैकांतेन बृहस्प
तिः सचिवः सहायः यतो मंत्रार्थे वृतः सोपि पुरुषार्थेषु नूनं न निष्णातः न निपुणः यतस्तमुपेंद्रेण द्वारभूतेन तं
उपेंद्रं विहायात्मानं मा लोकत्रयमयाचत तत्र मंत्रप्रवरं बृहस्पतिमतिहायेति वा तस्मिन्प्रसन्ने सत्येव वरणीया
नलोकत्रयं यतस्तदतितुच्छमित्याह अतिगंभीरत्र नेतं वयो यस्य तस्य कालस्य यन्मन्वंतरं तेन परिवृत्तं विपर्य

सुतले बलिरधुनाप्यास्ते इत्यन्वयः॥ कथंभूतः॥ महेंद्रस्याप्रियं कर्तुमिच्छता प्रथमं पराद्धित्रमपहृतलोकत्र
यंयस्य सः पुनर्भगवतोऽनुकंपयैव तत्र प्रवेशितः सन्॥ कीदृशेन योऽदितेः सकाशात् भूत्वा वामनरूपेणलब्धका
यःत्तेन॥१४॥ केचित्तस्य सुतलराज्यं भूमिदानफलंमन्यंते तन्निराकरोति॥ नोएवैतदिति यद्विलनिलये विवरस्यानेरे

ततोऽधस्तात्सुतले उदारश्रवाः पुण्यश्लोको विरोचनात्मजो बलिभगवता महेंद्रस्याप्रियं चिकीर्षमाणेनादि
तेर्लब्धकायो भूत्वा वटुवामनरूपेण पराद्धित्रलोकत्रयो भगवदनुकंपयैव पुनः प्रवेशित इंद्रादिष्वविद्य॥
मानया सुसमृद्ध्या श्रियाभिजुष्टः स्वधर्मेणाराधयंस्तमेव भगवंतमाराधनीयमपगतसाध्वस आस्तेऽधुना॥
पि॥१४॥ नोएवैतत्साक्षात्कारो भूमिदानस्य यत्तद्भगवत्यशेषजीवनिकायानां जीवभूतात्मनि वासुदेवे तीर्थत
मे सर्वजीवनियंतर्यात्मारामे पात्र उपपन्ने परया श्रद्धया परमादरसमाहितमनसा संप्रतिपादितस्य साक्षादप
वर्गद्वारस्य यद्विलनिलयैश्वर्यं॥१६॥ यस्य ह वाव क्षुतपतनप्रस्खलनादिषु विवशः सकृन्नामाभिगृणन्पुरुषः
कर्मबंधनमंजसा विधुनोति यस्य हैव प्रतिबाधनं मुमुक्षवोऽन्यथैवोपलभंते ॥१७॥
ऐश्वर्यमेतद्भूमिदानस्य साक्षात्कारः फलं न भ
वत्येव॥ कुत इत्यपेक्षायामेवंभूतस्य साक्षादपवर्गहेतुत्वादित्याह यत्तत्प्रसिद्धं दानं तस्य तद्देवाह॥ भगवत्यशेषजीवनि
कायानां जीवभूतश्चासावात्मभूतश्च॥ सर्वजीवनियंता चोसावात्मारामश्चेत्यर्थस्तस्मिन् संप्रतिपादितस्य॥१६॥ किंच
यस्य नाम क्षुतादिषु विवशोपि सकृदपि गृणन् कर्मबंधं विधुनोति॥ कथंभूतं॥ यस्य प्रतिबाधनं त्विह मुमुक्षवोऽन्यथैवो

भा० पं०
८७

नैकशिरसां अनेकफणानां गणोस्ति एतत्प्रपंचयति कुहकेति महाभोगवंतो महाकायाः पुरुषवाहाद्गरुडात् ॥२९॥ विबुधप्रत्यनीकाः देवशत्रवः सकलेष्वपि लोकेष्वनुभावो यस्य तस्यैव तेजसा सुदर्शनेन प्रतिहतो बलावलेपो वीर्यमदो येषां बिलेशयाः सर्पा इव इंद्रदूत्या प्रयुक्तानि मंत्ररूपाभिर्वाग्भिः एवं हि वेदे किमारव्यानं परिभिरसुरैर्निगू

ततोऽधस्तान्महातले काद्रवेयाणां सर्पाणां नैकशिरसां क्रोधवशो नाम गणः कुहकतक्षककालिकसुखेणादिप्रधाना महाभोगवंतः पतत्त्रिराजाधिपतेः पुरुषवाहादनवरतमुद्विग्नमनसः स्वकलत्रापत्यसुहृत्कुटुंबसंगेन क्वचित्प्रमत्ता विहरंति ॥२९॥ ततोऽधस्ताद्रसातले दैतेया दानवाः पणयो नाम निवातकवचाः कालेया हिरण्यपुरवासिन इति विबुधप्रत्यनीका उत्पत्त्या महौजसो महासाहसिनो भगवतः सकललोकानुभावस्य हरेरेव तेजसा प्रतिहतबलावलेपा बिलेशया इव वसंति ॥ ये वै सरमयेंद्रदूत्या वाग्भिर्मंत्रवर्णाभिरिंद्राद्बिभ्यति ॥३०॥ ततोऽधस्तात्पाताले नागलोकपतयो वासुकिप्रमुखाः शंखकुलिकमहाशंखश्वेतधनंजयधृतराष्ट्रशंखचूडकंबलाश्वतरदेवदत्तादयो महाभोगिनो महासर्पा निवसंति ॥ येषामु ह वै पंचसप्तदशशतसहस्रशीर्षाणां फणासु विरचिता महामणयो रोचिष्णवः पातालविवरति

ढा गा अन्विष्य सरमा देवशुनी इंद्रेण प्रहिता संधिमिच्छंतः पणयः प्राहुः ॥ किमिच्छंती सरमेत्यादि सा च संधिमनिच्छंती इंद्रस्तुतिपूर्वकं तान् प्रति परुषमाह ॥ हता इंद्रेण पणयः प्रायध्वं इत्यादि ॥ तच्च श्रुत्वा बिभ्यतीति ॥३०॥ महाभोगिनः महाफणाः महानमर्षः क्रोधो येषां ॥ पंचादिसंख्यानि शीर्षाणि येषां ॥ शीर्ष्णामिति वक्तव्ये शीर्षाणामित्यार्षं ॥३१॥ ॥ एमरामरामरम

प्रह्लादस्त्वेक एवार्थनिष्णात इत्याह ॥ यस्यानुदास्यमिति स्वपितरि उपरते सति स्वपित्र्यं पदं भगवता दीयमानमपि भगवतः खलु
परमन्यदिति कृत्वा न तु जग्राहेत्यर्थः ॥२२॥ ननु त्वमपि वीरः कृतस्तमेव वव्रु मन्यसे तत्राह ॥ तस्यानुपथं अनुवर्त्म अमृजिता अक्षी-
णाः कषाया रागादयो यस्य ॥ परिहीनो भगवदनुग्रहो यस्य सः ॥ को वा उपगन्तुमिच्छतीति ॥२३॥ अथ शुकोक्तिः ॥ नन्वेवंभूतस्य बलिः

यस्यानुदास्यमेवास्मत्पितामहः किल वव्रे न तु स्वपित्र्यं यदुताकुतोभयं पदं दीयमानं भगवतः परमिति भगव-
तोपरते खलु स्वपितरि ॥२२॥ तस्य महानुभावस्यानुपथममृजितकषायः को वास्मद्विधः परिहीनभगवदनुग्र-
ती३ हउपजिगमिषतीति ॥२३॥ तस्यानुचरितमुपरिष्टाद्विस्तरिष्यते यस्य भगवान्स्वयमखिलजगद्गुरुर्नाराय-
ज४ णो द्वारि गदापाणिरवतिष्ठते निजजनानुकंपितहृदयो येनांगुष्ठेन पदा दशकंधरो योजनायुतं दिग्वि-
जय उच्चाटितः ॥२४॥ ततोऽधस्तात्तलातले मयो नाम दानवेंद्रस्त्रिपुराधिपतिर्भगवता त्रिपुरारिणा त्रि-
लोकीशं चिकीर्षुणा निर्दग्धस्वपुरत्रयस्तत्प्रसादाल्लब्धपदो मायाविनामाचार्यो महादेवेन परि-
रक्षितो विगतसुदर्शनभयो महीयते ॥२५॥ नहि तस्यैव चरितं विस्तरेण कथ्यतां तत्राह ॥ तस्य बलेरनुचरित-

मुपरिष्टादष्टमे विच विस्तरिष्यते यस्य द्वार्यवतिष्ठते ॥ निजजनेष्वनुकंपितं ॥ कृतानुकंपं हृदयं यस्य ॥ द्वारपाल-
कर्म दर्शयति ॥ येन श्रीनारायणेन बलेर्दिग्विजये दशकंधर उच्चाटितः ॥ केन पदांगुष्ठेनैव ॥२४॥ यथा
हरिणा स्वभक्तो बलिः सुतले निविहितः सुखमास्ते एवं महादेवभक्तोपि मयस्तलातले सुखमास्ते इत्याह ॥ तत

इति लब्धं पदं स्थानं येन महीयते पूज्यते ॥२५॥

भा०पं०
॥८८॥

चारुणिअंगवलयेविलसिताश्चतेविशदाश्चविपुलाश्चधवलाश्चसुभगाश्चरुचिराश्चभुजाएवरजतस्तंभास्तेषुअगुरु
चंदनकुंकुमानांपंकस्तेनानुलेपःतेनावलिंपमानास्तेषामभिमर्शनेनोन्मथितेहृदयेमकरध्वजस्यावेशेनरुचि
रंचललितंचस्मितंयासांताः।तस्यानुरागेणमदनेनचमुदितेच।ततमदेनविघूर्णितेप्रचलितेच।आईषदरु
णेकरुणावलोकयुक्तेनयनेयस्मिन्तद्वदनारविंदंविलोकयंति॥७॥अमर्षोसहनंरोषःक्रोधः।उपसंहृतस्तयो

यस्यैवहिनागराजकुमार्यआशिषआशासानाश्चार्वंगवलयविलसितविशदविपुल
धवलसुभगरुचिरभुजरजतस्तंभेष्वगुरुचंदनकुंकुमपंकानुलेपेनावलिंपमानास्तदभिम
र्शनोन्मथितहृदयमकरध्वजावेशरुचिरललितस्मितास्तदनुरागमदमुदितमदविघूर्णिता
रुणावलोकनेनयनवदनारविंदंसव्रीडंकिलविलोकयंति॥७॥सएवभगवाननंतोनंतगुणार्ण
वआदिदेवउपसंहृतामर्षरोषवेगोलोकानांस्वस्तयआस्ते॥८॥ध्यायमानःसुरासुरोरगसिद्धगंधर्ववि
द्याधरमुनिगणैरनवरतमदमुदितविकृतविह्वललोचनःसुललितमुखरिकामृतेनाप्यायमानः
स्वपार्षदविबुधयूथपतीनपरिम्लानरागनवतुलसिकामोदमध्वासवेनमाद्यन्मधुकरव्रातम धुरगीतश्रियंवैजयंतींस्वांवनमालां॥

वेगोयेन॥७॥उपासनार्थमाह सुरादिभिर्ध्यायमानःचिंत्यमानः।अनवरतंमदेनमुदितश्चासौविहृतविकृतलोच
नश्च।सुललितेनमुखरिकामृतेनवचनामृतेनस्वपार्षदान्विबुधयूथपानांपतींश्चाप्याययन्हर्षयन्॥ ॥८८॥

इति पंचमे चतुर्विंशः ॥ २४ ॥ पंचविंशेऽनंतोऽधस्तादाह शेषस्य संस्थितिं ॥ संजिहीर्षोरिदं काले यत्र रुद्रसमुद्भवः ॥ सात्वतीया
ः सात्वततंत्रनिष्ठाः ॥ चतुर्व्यूहोपासने यं संकर्षण इत्याचक्षते ॥ तथाख्याने हेतुः ॥ द्रष्टृदृश्ययोः ॥ सम्यक्कर्षणमेकीकरणं येन
तत्कृतः अहमित्यभिमानो लक्षणं चिह्नमधिष्ठातुर्यस्याहंकाराधिष्ठाने नद्दृष्टृदृश्य संकर्षणात् संकर्षण इत्यर्थः ॥ १ ॥ अ

इति श्रीमद्भागवते महापुराणे पंचमस्कंधे विलसर्गवर्णने चतुर्विंशोऽध्यायः ॥ २४ ॥ श्रीशुक उवाच ॥ त
स्य मूलदेशे त्रिंशद्योजनसहस्रांतर आस्ते या वै कला भगवतस्तामसी समाख्याताऽनंत इति सात्वती
या द्रष्टृदृश्ययोः संकर्षणमहमित्यभिमानलक्षणं संकर्षण इत्याचक्षते ॥ १ ॥ यस्येदं क्षितिमंड
लं भगवतोऽनंतमूर्तेः सहस्रशिरस एकस्मिन्नेव शीर्षणि ध्रियमाणं सिद्धार्थ इव लक्ष्यते ॥ २ ॥ य
स्य ह वा इदं कालेनोपसंजिहीर्षतोऽम [illegible] र्षविरचितरुचिरभ्रमद्भ्रुवोरंतरेण सं
कर्षणो नाम रुद्र एकादशव्यूहस्त्र्यक्षस्त्रिशिखं शूलमुत्तंभयन्नुदतिष्ठत् ॥ ३ ॥ यस्यांघ्रिकमलयुग
लारुणविशदनखमणिखंडमंडलेष्वहिपतयः सह सात्वतर्षभैरेकांतभक्तियोगेनावनमंतः स्वव
दनानि परिस्फुरत्कुंडलप्रभामंडितगंडस्थलान्यतिमनोहराणि प्रमुदितमनसः खलु विलोकयंति ॥ ४ ॥

नंतत्वमाह ॥ यस्येदमिति ॥ यच्छब्दानां स एष भगवाननंत इत्युत्तरेणान्वयः ॥ १ ॥ नामसत्वमाह ॥ यस्येदं विश्वमुपसंहर्तुमिच्छ
तः ॥ अमर्षेण विरचिते रुचिरे कुटिलीकृते भ्रमंत्यौ भ्रुवौ तयोर्मध्ये ॥ ३ ॥ तं भयन्नुन्नमयन् ॥ ३ ॥ सुभगत्वमाह ॥ यस्यांघ्रिकम

[illegible]

म ६
पं

भा० पं० ८९

किंच ॥ आस्तां तस्य कृपया वपुर्धारणं तद्गुणकीर्त्तनं वा तन्नाम्नो दार्ढ्यमेवातिचित्रमित्याह ॥ यस्य नाम यदि पतितो महापातक्यपि
यतोऽसावेव नृणामशेषमंहः सद्यो हंति ॥ कथमनुकीर्त्तयेत् ॥ अन्यतः श्रुत्व
अनुकीर्त्तयेत् ॥ तर्हि सर्वं रुद्धेदिति किंच क्व च ॥ तस्माच्छेषादन्यं ॥११॥ गिर्यादिसहितं भूगोलं सत्वानि प्राणिनः सह
वात्र कस्माद्वा ॥ आर्त्तो वा सन् ॥ प्रलंभनाद्वा परिहासात्

यन्नामश्रुतमनुकीर्त्तयेदकस्मादार्त्तो वा पतितः प्रलंभनाद्वा ॥ हंत्यंहः सपदि नृणामशेषमन्यं कं शेषाद्भ-
गवत आश्रयेन्मुमुक्षुः ॥११॥ मूर्द्धन्यर्पितमणुवत्सहस्रमूर्द्ध्नो भूगोलं सगिरिसरित्समुद्रसत्वं ॥ आनं-
त्यादनिमितविक्रमस्य भूम्नः को वीर्याण्यधिगणयेत्सहस्रजिह्वः ॥१२॥ एवंप्रभावो भगवाननंतो
दुरंतवीर्योरुगुणानुभावः ॥ मूले रसायाः स्थित आत्मतंत्रो यो लीलया क्ष्मां स्थितये बिभर्त्ति ॥१३॥
एता ह्येवेह नृभिरुपगंतव्या गतयो यथाकर्मविनिर्मिताः ॥ यथोपदेशमनुवर्णिताः कामान्कामय-
मानैः ॥१४॥ एतावतीर्हि राजन्पुंसः प्रवृत्तिलक्षणस्य धर्मस्य विपाकगतय उच्चावचा विसदृशा यथा-
न्य १ प्रश्नं व्याचख्ये किमन्यत्कथयामीति ॥१५॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे संकर्षणमाहात्म्यं

हस्रजिह्वोऽपि को गणयेत् ॥१२॥ दुरंतवीर्यं बलं यस्य उरवो गुणा अनुभावश्च यस्य स च रसायाः भूमेर्मूले स्थितस्ति-
ष्ठति ॥ आत्मतंत्र आत्माधारः ॥१३॥ उक्तस्य लोकविभागस्योपयोगं वदन्नुपसंहरति ॥ एता ह्येवेह कामान्कामयमानैः
नृभिरुपगंतव्या इत्यन्वयः ॥१४॥ तस्य प्रपंचस्य एतावत्यः ॥ विपाकगतयः फलभूता गतयः ॥ या च व्याख्ये व्याख्यातवानस्मि ॥१५॥२

नीलेवाससीयस्य॥ हलस्यककुदिपृष्टेकृतःन्यस्तःसुभगश्चसुंदरश्चभुजोयेन॥ उदारालीलायस्यसः॥ नपरिम्लानो
रागःकांतिर्यस्याः॥ तस्यानवतुलसिकाया आमोदमध्वासवेनसुरभिमधुररसेनमाद्यतांमधुकराणांयेव्रातास्तेषांम
धुरगीतेनश्रीर्यस्याःतांमालांकंठेबिभ्रत्॥ ७॥ संश्लोकयामासवर्णयामास॥ च॥ अस्यजगतउत्पत्त्यादिहेतवोगु

नीलवासाएककुंडलोहलककुदिकृतसुभगसुंदरभुजोभगवान्माहेंद्रोवारणेंद्रइवकांचनींकक्षामुदा
रलीलोबिभर्त्ति॥ ७॥ सएषएवमनुश्रुतोऽभिध्यायमानः मुमुक्षूणामनादिकालकर्मवासनाग्रथि
तमविद्यामयंहृदयग्रंथिंसत्वरजस्तमोमयमंतर्हृदयंगतआशुनिर्भिनत्ति॥ तस्यानुभावान्भगवान्
स्वायंभुवोनारदःसहतुंबुरुणासभायांब्रह्मणःसंश्लोकयामास॥ ८॥ उत्पत्तिस्थितिलयहेतवोस्य
कल्प्याःसत्वाद्याःप्रकृतिगुणायदीक्षयासन्॥ यद्रूपंध्रुवमकृतंयदेकमात्मन्नानाधात्कथंनाधात्क
थमुहवेदतस्यवर्त्म॥ ९॥ मूर्त्तिंनःपुरुकृपयाबभारसत्वंसंशुद्धंसदसदिदंविभातियत्र॥ यल्लीलांमृग
जं१ पतिराददेऽनवद्यामादातुंस्वजनमनांस्युदारवीर्यः॥ १०॥ एयस्येक्षयाकल्प्याःस्वस्वकार्य्येसमर्थाआसन्॥ यस्यतुरू
पंध्रुवं॥ अनंतं॥ अकृतं अनादितत्रहेतुः यदेकमेववस्तु॥ आत्मन्॥ आत्मनि॥ नानाकार्य्यप्रपंचमधात्॥ तस्यब्रह्मरूपस्यवर्त्मतत्त्वं
वे२ जनकथमुहवेदनवेदेत्यर्थः॥ ९॥ तर्हिकथमस्मोमुमुक्षुभिःसेव्यतेतत्राह॥ मूर्त्तिमिति यत्रेदंसदसद्विभातिसनोऽस्माकंभक्ता
नांबहुकृपयासंशुद्धंसत्वंमूर्त्तिंबभार॥ स्वजनानांमनांस्यादातुंवशीकर्त्तुंकृतांयस्यलीलांमृगपतिःसिंहः॥ आददेअशिक्षत॥ य
तःउदाराणिवीर्याणियस्यतस्मादन्यंमुमुक्षुःकमाश्रयेदित्युत्तरेणान्वयः॥ यद्वाकृपयेत्यत्रहेतुः॥ यद्यस्मात्स्वजनानांमनांस्या

दातुंलीलामाददे मृगपतिरिवोदारवीर्यः॥ यद्वा॥ मृग्यंत इतिमृगाःकामप्रदास्तेषांपतिर्मुख्यः॥ १०॥

भा० पं०
९०

कर्मदोषमनतिक्रम्यादोषमवदत्स्वं पापफलं दंडं करोति । न तूल्लंघितं भगवच्छासनं येन ॥ ५ ॥ मन्नांतरेणाष्टाविंशतिमा
यत्र ह वाव भगवान्पितृराजो वैवस्वतः स्वविषयं प्रापितेषु स्वपुरुषैर्जंतुषु संपरेतेषु यथाकर्मावद्यं दोषमे
वानुल्लंघितभगवच्छासनः सगणो दमं धारयति ॥ ५ ॥ तत्र हैके नरकानेकविंशतिं गणयंति ॥ अथ तां
स्ते राजन्नामरूपलक्षणतोऽनुक्रमिष्यामः ॥ तामिस्रोंधतामिस्रो रौरवो महारौरवः कुंभीपाकः का
लसूत्रमसिपत्रवनं सूकरमुखमंधकूपः क्रिमिभोजनः संदंशस्तप्तसूर्मिर्वज्रकंटकः शाल्मली
वैतरणी पूयोदः प्राणरोधो विशसनं लालाभक्षः सारमेयादनमवीचिरयःपानमिति किंच क्षारक
र्दमो रक्षोगणभोजनः शूलप्रोतो दंदशूकोऽवटरोधनः पर्यावर्तनः ॥ सूचीमुखमित्यष्टाविंशतिन
रका विविधयातनाभूमयः ॥ ६ ॥ तत्र यस्तु परवित्तापत्यकलत्राण्यपहरति स हि कालपाशबद्धो य
मपुरुषैरतिभयानकैस्तामिस्रे नरके बलान्निपात्यते ॥ अनशनानिपानदंडताडनसंतर्ज्जनादिया
तनादिभिर्यात्यमानो जंतुर्यत्र कश्मलमासादित एकदैव मूर्छामुपयाति तामिस्रप्राये ॥ ७ ॥ ॥ ऽऽ

ह ॥ किंचेति पापभेदेन च तत्तन्नरकयातनाभेदं प्रपंचयति ॥ यस्त्वित्यादिना ॥ यात्यमानः पीड्यमानः एकदैव ॥ ७ ॥ ९०

षड्विंशेततोधस्तान्नरकस्थितिरुच्यते ॥ पापिनोयत्रदह्यंते यमदूतैर्यथायथं ॥१॥ पुंसोगुणत्रय उच्चावचाविदृशाइतिभो
गवैचित्र्यमुक्तंतद्धेतकुंतइति पृच्छति ॥ महर्षइतिकर्मणः समानत्वेपि श्रद्धावैचित्र्यात्फलवैचित्र्यमिति ॥ परिहरति त्रि
गुणत्वादिति ॥ सात्विक्याश्रद्धयाकर्तुः सुखित्वं ॥ राजस्याःसुखित्वं दुःखित्वंच तामस्याः दुःखित्वं मूढत्वंच तत्रापितासांश्रद्धा
स्यक१
राजोवाच ॥ महर्षएतद्वैचित्र्यंलोकंथमिति ॥१॥ ऋषिरुवाच ॥ त्रिगुणत्वात्कर्तुः श्रद्धयाकर्मगतयः पृथग्वि
धाः सर्वस्यतारतम्येनभवंति ॥१॥ अथेदानींप्रतिषिद्धलक्षणस्याधर्मस्यतथैवकर्तुः श्रद्धावैसादृश्या
त्कर्मफलंविसदृशंभवति याह्यनाद्यविद्याकृतकामानांतत्परिणामलक्षणाः सृतयः सहस्रशः प्र
वृत्तास्तासांप्राचुर्येणानुवर्णयिष्यामः ॥२॥ राजोवाच ॥ नरकानामभगवन्किंदेशविशेषा अथवाब
हिस्त्रिलोक्याआहोस्विदंतरालइति ॥३॥ ऋषिरुवाच ॥ अंतरालएवत्रिजगत्यास्तुदिशिदक्षिणस्या
मधस्ताद्भूमेरुपरिष्टाच्चजलाद्यस्यामग्निष्वात्तादयः पितृगणादिशिस्वानांगोत्राणांपरमेणसमाधि
नासत्याएवाशिषआशासानानिवसंति ॥४॥
नांतारतम्यात्सुखादितारतम्यंसर्वेषामित्यर्थः ॥१॥ प्रतिषिद्धंप्र
तिषेधः सएवलक्षणंप्रमाणंयस्य ॥ अधर्मकर्तुः ॥ श्रद्धावैसादृश्यंतमस्तारतम्यात् ॥ तत्रापिकारणंदर्शयन्नाह
अनाद्यविद्याकृतानांकामानांयाःसृतयोनरकाः तासां ॥ अथेदानींताःप्राचुर्येणानुवर्णयिष्यामइत्यन्वयः ॥२॥ किंभूमा
विवंदेशविशेषाः ॥ त्रिलोक्याब्रह्मांडाद्बहिर्वा आवरणेषुमध्ये अंतरालेवाभूमिव्यतिरिक्ते ॥३॥४॥

स्वधर्महा स्वधर्मत्यागी ॥१४॥ स्वनयन् कश्मलं मोहमुपगतो भवति ॥ अदृष्टदोषास्तेनोपरुद्धाः संतो यथा कश्मलमुपगता
स्तद्वत् ॥१५॥ ईश्वरेणोपकल्पिता मनुष्यरक्तपानादिलक्षणा वृत्तिर्येषां मत्कुणादीनां न विविक्ता विज्ञाता परव्यथा यैर

यस्त्विह वै निजवेदपथादनापद्यपगतः पाषंडं चोपगतस्तमसिपत्रवनं प्रवेश्य कशया प्रहरंति ॥ तत्र हासावितस्
ततो धावमान उभयतो धारैस्तालवनासिपत्रैश्छिद्यमानसर्वांगो हा हतोस्मीति परमया वेदनया मूर्छितः
पदे पदे निपतति स्वधर्महा पाषंडानुगतं फलं भुंक्ते ॥१४॥ यस्त्विह वै राजा राजपुरुषो वा अदंडे दंडं प्रण
यति ब्राह्मणे वा शरीरदंडं स पापीयान्नरकेऽमुत्र शूकरमुखे निपतंति ॥ तत्रातिबलैर्विनिष्पिष्यमा
णावयवो यथैवेहेक्षुखंड आर्तस्वरेण स्वनयन् क्वचिन्मूर्छितः कश्मलमुपगतो यथैवेहादृष्टदोषा
उपरुद्धाः ॥१५॥ यस्त्विह वै भूतानामीश्वरोपकल्पितवृत्तीनामविविक्तपरव्यथानां स्वयं पुरुषोपकल्पितवृ
त्तिर्विविक्तपरव्यथो व्यथामाचरति स परत्रांधकूपे तदभिद्रोहेण निपतति तत्र हासौ तैर्जंतुभिः पशुमृ
गपक्षिसरीसृपैर्मशकयूकामत्कुणमक्षिकादिभिर्ये के चाभिद्रुग्धास्तैः सर्वतोभिद्रुह्यमाणस्तमसि वि
हतनिद्रानिर्वृतिरलब्धावस्थानः परिक्रामति यथा कुशरीरे जीवः ॥१६॥

विवेकिभिस्तेषां पुरुषेण ब्राह्मणादिभावेन विधिनिषेधपूर्वकमुपकल्पिता वृत्तिर्यस्य ॥ विविक्ता परव्यथा येन ॥ विवे
किनाभिद्रुग्धा हिंसितास्तैः ॥ विहता निद्रा निर्वृतिः सुखं च यस्य ॥ न लब्धमवस्थानं येन सः तमसि परिक्रामति ॥ १६ ९१

पुरुषं पतिं वंचयित्वा ॥ ८ ॥ एतत् शरीरमिति इदं धनादि ममेति मत्वा स्वं च कुटुंबमेव च प्रपुष्णाति ॥ तेनाशुभेन ॥ ९ ॥ रुरवो भू
त्वेति कर्माण्येव तथा परिणमं प्रापयेत्यर्थः ॥ अतिक्रूरस्य भारस्रुगाख्यस्य सत्वस्यापदेशः संज्ञा ॥ १० ॥ क्रव्येण निमित्तेन मांसा

एवमेवांधतामिस्रे यस्तु वंचयित्वा पुरुषं दारादीनुपभुंक्ते यत्र शरीरी निपात्यमानो यातनास्थो वेदनया नष्ट
मतिर्नष्टदृष्टिश्च भवति ॥ यथा वनस्पतिर्वृश्च्यमानमूलस्तस्मादंधतामिस्रं तमुपदिशंति ॥ ९ ॥ यस्त्विह वा एत
देहमिति ममेदमिति भूतद्रोहेण केवलं स्वकुटुंबमेवानुदिनं प्रपुष्णाति स तदिह विहाय स्वयमेव तदशुभे
न रौरवे निपतति ॥ १० ॥ ये त्विह यथैवामुना विहिंसिता जंतवः परत्र यमयातनामुपगतं त एव रुरवो भूत्वा तथा त
मेव विहिंसंति तस्माद्रौरवमित्याहुः रुरुरिति सर्पादतिक्रूरसत्वापदेशः ॥ ११ ॥ एवमेव महारौरवो यत्र निपतितं
पुरुषं क्रव्यादा नाम रुरवस्तं क्रव्येण घातयंति ॥ १२ ॥ यः केवलं देहंभरो यस्त्विह वा उग्रः पशून् पक्षिणो वा
प्राणत उपरंधयति तमपकरुणं पुरुषादैरपि विगर्हितममुत्र यमानुचराः कुंभीपाके तप्त
तैले उपरंधयंति ॥ १३ ॥ यस्त्विह पितृविप्रब्रह्मध्रुक् स कालसूत्रसंज्ञके नरके अयुतयोजनपरिमं
डले ताम्रमये तप्तखले उपर्यधस्तादग्न्यर्काभ्यामतितप्यमानेऽभिनिविशितः क्षुत्पिपासाभ्यां च दह्य
मानांतर्बहिःशरीर आस्ते शेते चेष्टते अवतिष्ठति परिधावति यावंति पशुरोमाणि तावद्वर्षसहस्राणि ॥ १४ ॥

धेमित्यर्थः ॥ ११ ॥ प्राणतः सजीवान् उपरंधयति ॥ अपकरुणः निष्कृपम् ॥ १२ ॥ खले समे देशे ॥ १३ ॥ राम राम राम

भा० पं० अपाखंडाः सकुलीनाः संतः ॥ द्वितीयांतपाठे सेतुविशेषणं ॥ नदीं विशिनष्टि ॥ विण्मूत्रेति ॥ २१ ॥ पशुचर्यां स्वेछाचारं

ये त्विह वै राजन्या राजपुरुषा वा अपाषण्डान् धर्मसेतून् निंदंति ते संपरेत्य वैतरण्यां निपतंति भि

६२ न्नमर्यादास्तस्यां निरयपरिखाभूतायां नद्यां यादोगणैरितस्ततो भक्ष्यमाणा आत्मना न वियुज्यमा

नाश्चासुभिरुह्यमानाः स्वाघेन कर्मपाकमनुस्मरंत उपरमंते ॥ विण्मूत्रपूयशोणितकेशनखास्थि

मेदोमांसवसावाहिन्यामुपतप्यंते ॥ ३१ ॥ ये त्विह वै वृषलीपतयो नष्टशौचाचारनियमास्त्यक्त

लज्जाः पशुचर्यां चरंति ॥ ते चापि प्रेत्य पूयविण्मूत्रश्लेष्मलालापूर्णार्णवे निपतंति तदेवाति

बिभत्सितमश्नंति ॥ ३२ ॥ ये त्विह वै श्वगर्दभपतयो ब्राह्मणादयो मृगयाविहारा अतीर्थे च मृगान्नि

वै३ घ्नंति तानपि संपरेतान् लक्ष्यभूतान् यमकिंकरा इषुभिर्विध्यंति ॥ ३३ ॥ ये त्विह वै दांभिका

दंभयज्ञेषु पशून् विशसंति तानमुष्मिंल्लोके वैशसे नरके पतितान् निरयपतयो यातयित्वा वि

शसंति ॥ ३४ ॥ यस्त्विह वै सवर्णां भार्यां द्विजो रेतः पाययति काममोहितस्तं पापकृत्तममुत्र रेतः कु

ल्यायां पातयित्वा रेतः संपाययंति ॥ ३५ ॥ ३३ अतीर्थे विहितादन्यत्र विध्यंति इति प्राणनिरोधो दर्शितः ॥ ३३ ॥

३४ निरयपतयो यमपुरुषाः ॥ लालाभक्षमाह ॥ यस्त्विहेति रेतः पानं कारयंति ॥ ३५ ॥ राम राम रामरामराम ६२

यत्किंचनभक्ष्यादिकंउपनतंप्राप्तंतदसंविभज्य॥ननिर्मितःपंचयज्ञायेन॥अतएववायसैःसंस्तुतःसमत्वेनवर्णि
तः॥क्रिमिभोजनः॥क्रिमीनेवभुंजानः॥यत्तावत्॥यावंतियोजनानितत्क्रिमिकुंडंतावंतिवर्षाणि॥याचद्दत्तंत्यात्तकमि

यस्त्विहवाअसंविभज्याश्नातियत्किंचनोपनतमनिर्मितपंचयज्ञोवायससंस्तुतःसपरत्रक्रि
मिभोजनेनरकाधमेनिपततितत्रशतसहस्रयोजनेक्रिमिकुंडेक्रिमिभूतःस्वयंक्रिमिभिरेवभक्ष्य
माणःक्रिमिभोजनोयावत्तदप्रत्ताप्रहुतादोनिवेशमात्मानंयातयते॥१७॥यस्त्विहवैस्तेयेनबला
द्धिरण्यरत्नादीनिब्राह्मणस्यवापहरत्यन्यस्यवाऽनापदिपुरुषस्तममुत्रराजन्यमपियमपु
रुषाअयस्मयैरग्निपिंडैःसंदंशैस्त्वचिनिष्कुषंति॥१८॥यस्त्विहवाअगम्यायमगम्यंपुरुषंपुरुषयो
षिदभिगच्छतितावमुत्रकशयाताडयंतस्तिग्मयासूर्म्यालोहमय्यापुरुषमालिंगयंतिस्त्रियंचपुरुष
रूपयासूर्म्या॥१९॥यस्त्विहवैसर्वाभिगमस्तममुत्रनिरयेवर्तमानंवज्रकंटकशाल्मलीमारोप्यनि
ष्कर्षंति॥२०॥

त्यर्थः॥अप्रमत्तसंविभक्तं अप्रहुतंचात्तीतितथासः॥ननिर्वेशंअकृतप्रायश्चित्तम्॥१७॥निष्कुषंति॥छिं
दंति॥१८॥तिग्मयातप्तयासूर्म्याप्रतिमया॥१९॥सर्वाभिगमःपश्वादुपगन्ता॥२०॥राम राम राम राम

भा० पं० पुरुषस्य मेधेन हिंसया भैरवादीन् यजंते ॥ याश्च स्त्रियः कामरूपाः ॥ रक्षोगणाभूत्वाय ये इह ते पुरुषाद्यः संतः ॥ पूर्वमनन्त्यं तद्वत् ॥ ३० ॥

९३ ये त्विह वै पुरुषाः पुरुषमेधेन यजंते याश्च स्त्रियो नृपशून् खादंति तांश्च ते पशव इव निहता यमसदने
यातयंतो रक्षोगणाः सौनिका इव स्वधितिनावदायासृक् पिबंति नृत्यंति गायंति च हृष्यमाणा यथेह पु
रुषादाः ॥ ३० ॥ ये त्विह वा अनागसोऽरण्ये ग्रामे वा वैश्रंभकैरुपसृतानुपविश्रंभय्य जिजीविषून् शूलसू
त्रादिषूपप्रोतान् क्रीडनकत[illegible]तया यातयंति ते पि च प्रेत्य यमयातनासु शूलादिषु प्रोतात्मानः क्षु
त्तृड्भ्यां चाभिहताः कंकवटादिभिश्चेतस्ततस्तिग्मतुंडैराहन्यमाना आत्मशमलं स्मरंति ॥ ३१ ॥ ये
त्विह वै भूतान्युद्वेजयंति नरा उल्बणस्वभावा यथा दंदशूकाख्ये निपतंति ॥ तत्र नृप दंदशूकाः पंच
मुखाः सप्तमुखा उपसृत्य ग्रसंति यथा बिलेशयान् ॥ ३२ ॥ ये त्विह वा अंधावटकुसूलगुहादि
षु भूतानि निरुंधंति ॥ तानमुत्र तेष्वेवोपवेश्य सगरेण वह्निना धूमेन निरुंधंति ॥ ३३ ॥ यस्त्विह वा
अतिथीन् अभ्यागतान् वा गृहपतिरसकृदुपगतमन्युर्दिधक्षुरिव पापेन चक्षुषा निरीक्षते ॥ त
स्य चापि निरये पापदृष्टेरक्षिणी वज्रतुंडा गृध्रकंकवटकादयः प्रसह्योरुबलादुत्पाटयंति ॥ ३४ ॥

वैश्रंभकैः विश्वासोपायैरुपश्रंभय्य विश्वासस्य ॥ ३१ ॥ बिलेशयान् मूषकान् ॥ ३२ ॥ सगरेण सविषेण ॥ ३३ ॥ अतिथयो ज्ञा

तपूर्वाः ॥ अभ्यागताः अज्ञातपूर्वाः ॥ तान् पापेन वक्रीकृतेन ॥ ३४ ॥

९६

९३

वा२

यमदूता ये श्वानः ॥ सरभसं संभ्रमं ॥२६॥ द्रव्यविनिमये क्रियविक्रयादौ ॥ निरवकाशे निरालंबे ॥ अवीचीशब्दार्थमा
ह ॥ यत्रेति ॥ विचिस्तरंगः ॥ तद्रहितत्वादवीचिः ॥२७॥ यो विप्रस्तत्कलत्रं सुरां पिबति ॥ अन्योपि वा व्रतस्थः सन् राजन्यो

येत्विह वै दस्यवोऽग्निदा गरदा ग्रामान्सार्थान्वा विलुंपंति राजानो राजभटा वा तांश्चापि हि परेत्य यम
दूता वज्रदंष्ट्राः श्वानः सप्तशतानि विंशतिश्च सरभसं खादंति ॥२६॥ यस्त्विह वा अनृतं वदति साक्ष्ये द्र
व्यविनिमये दाने वा कथंचित्स वै प्रेत्य नरकेऽवीचिमत्यधःशिरसं निरवकाशे योजनशतोच्छ्रा
याद्गिरिमूर्ध्नः संपात्यते यत्र जलमिव स्थलमश्मपृष्ठमवभासते तदवीचिमत्तिलशो विशीर्य
माणशरीरो न म्रियमाणः पुनरारोपितो निपतति ॥२७॥ यस्त्विह वै विप्रो राजन्यो वैश्यो वा सोमपी
थस्तत्कलत्रं वा सुरां व्रतस्थो वा पिबति प्रमादतस्तेषां निरयं नीतानामुरसि पदाक्रम्यास्ये वह्निना द्रव
माणं कार्ष्णायसं निषिंचंति ॥२८॥ अथ च यस्त्विह वा आत्मसंभवेन स्वयमधमो जन्मतपोविद्याचारवर्णाश्रम
वतो वरीयसो न बहु मन्येत स मृतक एव मृत्वा क्षारकर्दमे निरयेऽवाक्शिरा निपातितो दुरंता यातना ह्यश्नु
ते ॥२९॥

वैश्यो वा सोमपीथः कृतसोमपान इत्यन्वयः ॥ ततो योऽसोमस्थाने फलचमसविधानात् ॥ सोमपाननिषेधानाच्च ॥ तथा च श्रु
तिः ॥ न्यग्रोधशाखा आहृत्य ताः संपिष्य दधन्युपसृज्य तस्मै भक्षं प्रयच्छेन्न सोममिति ॥२८॥ स एवं मन्यमानः क एव सन्
॥२९॥

ती

आढ्याभिमतिः धनगर्वितः । श्रेष्ठोहमिति मानी तिर्यक्प्रेक्षणं यस्य सर्वतः गुर्वादेरपि धनं चोरयिष्यतीति विशंकमानः परिशुष्य
माणं हृदयं वदनं च यस्य । अनवगतः अप्राप्तः । तस्यार्थस्योत्पादनादिभिः शमलं ग्रहणाति तथा परिसूत्रैः प्रेतान्कुर्वंति ॥ ३५ ॥ ३

यस्त्विह वा आढ्याभिमतिरहंकृतिस्तिर्यक्प्रेक्षणः सर्वतोभिशंकी अर्थनाशचिंतया परिशुष्यमाणहृद
यवदनो निर्वृत्तिमनवगतो ग्रह इवार्थमभिरक्षति ॥ स चापि प्रेत्य तदुत्पादनोत्कर्षणसंरक्षणशमलग्र
हः सूचीमुखे नरके निपतति ॥ यत्र ह वित्तग्रहं पापपुरुषं धर्मराजपुरुषा वायका इव सर्वतोंऽगेषु सूत्रैः प
रिवयंति ॥ ३५ ॥ एवंविधा नरका यमालये संति शतशः सहस्रशस्तेषु सर्वेषु च सर्व एवाधर्मवर्तिनो ये के
चिदिहोदिता अनुदिताश्चावनिपते पर्यायेण विशंति ॥ तथैव धर्मानुवर्तिन इतरत्र ॥ इह तु पुनर्भवे
त उभयशेषाभ्यां निविशंति ॥ निवृत्तिलक्षणमार्ग आदावेव व्याख्यातः ॥ एतावानेवांडकोशो यश्चतुर्द
शधा पुराणेषु विकल्पित उपगीयते ॥ यत्तद्भगवतो नारायणस्य साक्षान्महापुरुषस्य स्थविष्ठं रूपमात्म
माहृतः मायागुणमयमनुवर्णितं पठति शृणोति श्रावयति स उपगेयं भगवतः परमात्मनोग्राह्यमपि श्रद्धाभक्तिवि
शुद्धबुद्धिर्वेद ॥ ३६ ॥

इतरत्र स्वर्गादौ ॥ इह मर्त्यलोके पुनर्भवे पुनर्जन्मनिमित्तं उभयोः अधर्मधर्मयोः शेषाभ्यां ॥ आदावेव द्वितीयस्कंधे वै
श्वानरं याति इत्यादिना ॥ उपगेयं उपनिषदं श्रद्धाभक्तिभ्यां विशुद्धा बुद्धिर्यस्य ॥ ३६ ॥

भा० पं०
६४ यथा यथावत्त॥ श्रुत्वा॥ ३७॥ कथंभूतालोकसंस्थासकलानां जीवनिकायानां धाम आश्रयभूतं वपुः॥ ३८॥ इति श्री श्री

श्रुत्वा यथा स्थूलमत्र दमे रूपे भगवतो यतिः॥ स्थूले निर्जितमात्मानं शनैः सूक्ष्मं
धिया नयेत्॥ ३७॥ भूद्वीपवर्षसरिदद्रिनभःसमुद्रपाताल दिङ्नरकभागणलो
कसंस्था॥ गीता मया तव नृपाद्भुतमीश्वरस्य स्थूलं वपुः सकलजीवनिकायधा
म॥ ३८॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां पंचमस्कंधे
नरकवर्णनं नाम षड्विंशोध्यायः॥ २६॥ शुभमस्तु॥ ॥ ॥ राम

धरस्वामिविरचितायां पंचमस्कंधसंबंधिन्यां भावार्थदीपिकायां षड्विंशोध्यायः॥ २६॥ पंचमस्कंधसंबंधिपदभावा
र्थदीपके॥ श्रीयतीपरमानंदनंदहरिवल्लभाषिते॥ १॥ श्री हरये परमात्मने नमः॥ ॥